सूर्यमगन्म ज्योतिरुत्तमम्

विश्वसंस्कृतसम्मेलनम्

WORLD SANSKRIT CONFERENCE

5-9 April, 2001 Vigyan Bhawan, New Delhi

(Under the auspices of the Ministry of Human Resource Development, Govt. of India)

PROCEEDING OF WORLD SANSKRIT CONFERENCE

VOLUME 3 - PART I

(Sanskrit and Hindi Sections)

Editor
Prof. Vachaspati Upadhyaya

Sub Editor
Prof. Ramesh Kumar Pandey

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
विद्यया विन्दतेऽमृतम्

Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed University)
New Delhi - 110016

PROCEEDINGS
OF
World Sanskrit Conference

Volume 3 — Part I

(Sanskrit and Hindi Sections)

Editor

Prof. Vachaspati Upadhyaya

Vice-Chancellor

S.L.B.S.R.S. Vidyapeetha, N.Delhi

President, Association of Indian Universities, Delhi

Secretary, Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Ujjain

Sub Editor

Prof. Ramesh Kumar Pandey

Head, Research and Publication

S.L.B.S.R.S. Vidyapeetha, N.Delhi

Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha

(Deemed University)

New Delhi-110016

Publisher :
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed University)
Katwaria Sarai, New Delhi-110016
www.slbsrsv.ac.in

Year 2007

Printed at :
Amar Printing Press
8/25, Vijay Nagar, Delhi-110009

प्रो० वाचस्पति उपाध्याय
कुलपति
Prof. Vachaspati Upadhyaya
Vice Chancellor
श्री लालबहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठ
नई दिल्ली-११००१६
Shri Lal Bahadur Shastri
Rashtriya Sanskrit Vidyapeetha,
New Delhi-110016

सचिव
महर्षि सान्दीपनि
राष्ट्रीय वेदविद्या प्रतिष्ठान
(मानव संसाधन विकास मंत्रालय, भारत सरकार का स्वायत्तशासी संस्थान)
प्राधिकरण भवन, द्वितीय तल, भरतपुरी, उज्जैन 456 010 (म.प्र.)
Secretary
Maharshi Sandipani
Rashtriya Vedvidya Pratishthan
(An autonomous organisation of the Ministry of HRD, Govt. of India)
Pradhikaran Bhavan, II Floor, Bharatpuri, UJJAIN-456 010 (M.P.)

AVANT-PROPOS

It is indeed my pleasure in placing before the academic world in general and the votaries of Sanskrit in particular the proceedings of the World Sanskrit Conference held in the year 2001.

Sanskrit as a language is undoubtedly a repository and reservoir of our priceless heritage. The year 2001 was celebrated as the Sanskrit Year. It was a land mark in the annals of Sanskrit when the delegates from all over the country and abroad with great commitment, perseverance and patience gathered together with a view to exploring new horizons in the field of Sanskrit.

Inspite of various impediments to the steady development of this language coupled with the successive disturbances both at internal and external fronts which India had to bear encountering ever since the dawn of history, India has successfully held up to the World her archaic literary map and compares with the literature of any other nation of the globe. The beginnings of her civilization are yet in the obscurity. Relatively to any other language of the ancient World, the antiquity of Sanskrit has an unquestionable priority. "Yet such is the marvellous continuity" says Max Muller "between the past and the present of India, that in spite of repeated social convulsions, religious reforms and foreign invasions, Sanskrit may be said to be still the only language that is spoken over the whole extent of the vast country. So says M. Winternitz: "Sanskrit is not a 'dead' language even today. There are still at the present day a number of Sanskrit periodicals in India, and topics of the day are discussed in Sanskrit pamphlets. Also, the Mahabharata is still today read aloud

publicly. To this very day Poetry is still composed and words written in Sanskrit and it is the language in which Indian Scholars converse upon scientific questions. Sanskrit at the least plays the same part in India still, as Latin the Middle ages in Europe, or as Hebrew with the Jewsë (History of Indian Literature, I.45).

It has been quite aptly remarked that *"the Indian people and the Indian civilization were born, so to say, in the lap of Sanskrit and it went hand in hand with the historical development of the culture which have come down to our day as an inheritance of priceless order for India, may, for the entire world".* Sanskrit with its philosophical insight and humanist inclusivity has flourished and evolved through the millennia tenaciously yet flexibly in different historical periods and in different shades.

I consider it relevant to quote the Landmark Judgement of the Honéble Supreme Court of India of 1993 on Sanskrit Studies in India:

> *"So far as "We, the people of India" are concerned, they have always held in high esteem the cultural heritage of this ancient land. And to foretell our views, learning of Sanskrit is undoubtedly necessary for protection of this heritage. The stream of our culture would get dried if we were to discourage the study of Sanskrit...."*

We may now refer to the policies and programmes as accepted by the Government of India. In the 1968 policy, the following inspiring statement regarding the importance of this language is worthy of notice. I quote:

> *"Considering the special importance of Sanskrit to the growth and development of Indian languages and its unique contribution to the cultural unity of the country facilities for its teaching at the school and university stages should be offered on more liberal basis. Development of new methods of teaching the language should be encouraged, and the possibility explored of including the study of Sanskrit in those courses (such as modern Indian Philosophy) at the first and second degree stages, where such knowledge is useful".*

In addition to the above-quoted statement, reference must be made from the 1986 policy in para 5.33: regarding the future course of action:

> *"Research in Indology, the humanities and Social Sciences will receive adequate support. To fulfil the need for the synthesis of knowledge, inter-disciplinary research will be encouraged. Efforts will be made to delve into India's ancient fund of knowledge and to relate it to contemporary reality. This effort will imply the development of facilities for the intensive study of Sanskrit".*

It has been laid down in Article 351 of our constitution that while dealing with the duty of the Union to promote the spread of Hindi, it would draw, whenever necessary or desirable, for its vocabulary, primarily on Sanskrit. Encouragement to Sanskrit is also necessary because of it being one of the languages included in the Eighth Schedule."

We live in an age of unprecedented challenges and opportunities. On the one hand, we face the grim reality of over population, hunger, ecological disasters, new devastating diseases, and the ever-present possibility of a nuclear holocaust. On the other hand, science constantly expands our intellectual horizon and helps create new technological wonders that, we hope, will solve some of our problems. Biologists are èengineeringë genes to increase the productivity of vegetables and fruit trees; chemists are unlocking enzymes to make them usable for non-biological purposes, such as waste disposal, or to repair DNA in order to enhance and prolong life; and physicists are working on superconductivity and the use of lazer in computers. Scientists are also exploring the possibility of bionic organs, the application of electro-magnetic fields in the healing process, and artificial intelligence. **(From the Preface, In Search of The Cradle of Civilization Georg Feuerstein, Subhash Kak & David Frawley)**

In the backdrop of above-mentioned statement, it is a desideratum for votaries of Indian knowledge system to revisit the heritage passed on to us with a multi-dimensional projection. To understand *'Shastra Parampara'*, it requires enormous grit and stamina coupled with a discerning mind. Our tradition has laid due emphasis on both *Jnan and*

publishing two invaluable volumes entitled: "*Sanskrit Study in India*" and "*Sanskrit Study in Abroad*". These two volumes were distributed to the participants to emphasize that Sanskrit was invaluable and indispensable because of its enormous academic rich resources.

Their papers are being published under the following five volumes:

Volume I : Sanskrit Language & Literature: For the sake of convenience, this volume has been divided into two parts. Part I contains papers written in Sanskrit and Hindi and covers 502 pages whereas Part II comprises articles in English and comes to 364 pages.

Volume II : This volume entitled 'Religion and Philosophy' For the sake of convenience, this volume has been divided into two parts. Part I contains papers written in Sanskrit and Hindi and covers 348 pages whereas Part II comprises articles in English and comes to 470 pages.

Volume III: This volume comprises three Sections such as Manuscriptology, Pedagogy and Technical sciences, this volume also has been divided into two parts. Part I contains papers written in Sanskrit and Hindi and covers 324 pages whereas Part II comprises articles in English and comes to 304 pages.

Volume IV: This volume covers Veda and Vedāṅga. It contains 62 articles divided as Sanskrit (22 articles), Hindi (13 articles) and English (27 articles).

Volume V : This volume consists of the topics such as Purāṇas, Āyurveda, Environmental Science and Indian Culture. Language-wise the number of the articles is Sanskrit (23 articles), Hindi (18 articles) and English (18 articles). Thus the total number of articles in this Volume comes to 59.

The papers received from the participating scholars have been published in five volumes.

The collection of the articles has been christened as *Pañcāmṛtam* according to five volumes under which all the articles have been arranged.They have further been named as *Caṣaka-s* such as *Prathama Caṣaka-s* etc. The two parts of the First Volume (*Caṣaka*) have been named as *Prathmo Binduḥ* and *Dvitīyo Binduḥ.* These articles have been arranged according to Devanāgari and English alphabets of the names/surnames of the author.

It is regretted that all the articles read at the Conference and submitted for publication could not be accommodated for various reasons. Nevertheless, I am grateful to all the participants who attended the Conference and/or presented their papers.

I am also indebted to various funding authorities, but for whose financial assistance such a huge affair as the World Sanskrit Conference could not have been organized on such a large scale and for so many days.

The idea of organising the Conference at such a large scale was mooted by Dr.Murli Manohar Joshi Ji, the then Honéble Minister of Human Resource Development, Government of India, New Delhi.

We are indebted to the officials of the Ministry of Human Resource Development for extending full co-operation due to which the conference could be arranged in the Vigyan Bhavan, New Delhi for long five days. The support made by the Rashtriya Sanskrit Sansthan under the able leadership of Prof.V.Kutumba Shastri provided a fillip for the success of the conference.

I am ending my editorial remark with a sad note. We lost Dr. K.P.A. Menon, an eminent Scholar and Administrator, who was a constant source of inspiration in each endeavor of ours before and after the World Sanskrit Conference. To me, he was my friend, philosopher and guide. I sincerely pay my tributes to the memory of Late Dr. K.P.A. Menon and pray God to give eternal peace wherever he is. During his tenure as the Chancellor of this Vidyapeeth, he guided the destiny of this infant Institution and paved way for enormous academic achievements.

I am especially indebted to Justice Ranganath Mishra, Chairman, Organising Committee who has given the benefit of his mellow wisdom in all the endeavours we have made for publication works. We are really beholden to the members of the Advisory Board of Editors, especially the Chairman Dr. V.R. Panchamukhi, Chancellor, Rashtriya Sanskrit Vidyapeetha, Tirupati and other expert members who have exhibited deep interest in going through the articles penned by eminent Scholars. We place on record our immense gratitude to our knowledgeable contributors who prepared their articles with great authenticity at a very short notice.

We would like to place on record the sincere help, encouragement and the tacit support of a host of scholars especially Prof. Ramesh Kumar Pandey, Professor (Research & Publication), Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha and Prof. Jagadamba Prasad Sinha, Ex.HoD, Department of Sanskrit, University of Lucknow, U.P.

I have the pleasure to make a special mention about the efforts put in by M/s Amar Printing Press who deserves appreciation for their sincere co-operation and qualitative approach but for which these volumes could not have seen the light of the day.

As we stand on the threshold of 21st Century, the five volumes are bound to provide the twin objectives of attempting to take stock of what has already been achieved and sending an agenda for the future. It is time to make resolution for tomorrow's World supported by the eternal values enshrined in Sanskrit, the repository of our pristine glory.



Śrāvaṇapūrṇimā **(Vachaspati Upadhyaya)**

V.S. 2062

सम्पादकीयम्

भारतीयसंस्कृतिसंवाहिका संस्कृतभाषा प्राचीनकालादारभ्येदानीं यावत् सुरसरिदिव शस्यश्यामलां भारतभुवं चिन्तनचैतन्यधाराभिःसिञ्चन्ती चकास्ति सुतराम्। सार्वभौमिकभावनापरिपूरिते साम्प्रतिके काले बहुविधघातकातङ्काकुलिते विज्ञान-तकनीकिविद्योत्कर्षाकलिते लोकेऽनाकुलाचारप्रचारप्रचारिणी विद्वन्मानसहंस-विलासिनी वेदविद्याम्भोजविकासिनी च दैवी वागेवौषधं सर्वविधातङ्कप्रशमनस्य, सुमहद्रसायनं मानवजीवनोद्देश्यविधानस्य, निर्मलजलं परस्परद्वेषादिकालुष्यपङ्कप्रक्षालनस्य। यत्र च विलसति निरातङ्कवीथिः आत्मोत्कर्षस्य, सद्भावनागीतिः जनसमवायस्य, संभूयसमुत्थाननीतिः समग्रविश्वस्य, आत्मवत्प्रीतिः प्राणिवर्गस्य, विज्ञानवैभवरीतिः प्रकृतेः, सनातनपद्धतिः नूत्नाविष्कृतेः प्रतिपदम्। एवंविधां बहुविधविद्याविज्ञानविद्योतितां विकसितसुमोभरभरितां संस्कृतलतिकामाश्रित्य तदमन्दमकरन्दैश्च सम्पूर्णं विश्वं सुरभीकर्त्तुं भारतशासनस्य मानवसंसाधनविकासमन्त्रालयस्य भाषाविभागेन २००१तमे ख्रीष्टाब्दे भारतराजधान्यां देहल्यां विश्रुते विज्ञानभवने पञ्चदिवसात्मकं विशिष्टं विश्वसंस्कृतसम्मेलनमायोजितम्।

विशिष्टस्य विश्वसंस्कृतसम्मेलनस्यास्य महासचिवत्वेन नैकशास्त्राभ्यासप्रथितमतयः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः प्रो. वाचस्पतिउपाध्यायमहोदयाः नियुक्ताः। तत्प्रभावादेव विद्यापीठमिदं मुख्यं संयोजनकेन्द्रं सुनिश्चितमभूत्। सम्मेलनेऽस्मिन् नानादेशवेषभाषाचारनिपुणाः संस्कृतविद्यानदीनदीष्णाः सहस्राधिकाः विद्वांसः समागत्य विविधेषु शोधचर्चासत्रेषु भागं गृहीतवन्तः।

सम्मेलने प्रस्तुतानां सर्वेषां निबन्धानां प्रकाशनमासीदसम्भवमितिकृत्वा नैके विषयविशेषज्ञाः विद्वांसः नियुक्ताः प्रकाशनार्हपत्राणां निश्चयार्थम्। तैरेव विद्वद्भिः प्रकाशनार्थं संस्तुतानामेव लेखानां पञ्चसु भागेषु प्रकाशनं विधीयते। प्रथमो भागः खण्डद्वयात्मकोऽस्ति—प्रथमे खण्डे संस्कृत-हिन्दीभाषामाध्यमेन पठितानां निबन्धानां द्वितीये च खण्डे आङ्ग्लभाषामाध्यमेन पठितानां शोधपत्राणां संग्रहोऽस्ति। एवमेव द्वितीयो भागोऽपि खण्डद्वयात्मकोऽस्ति। अन्येषु भागेषु संस्कृत-हिन्दी-आङ्ग्लभाषामाध्यमेन पठितानां निबन्धानां यथाक्रमं निबन्धनमस्ति। सर्वेषु भागेषु भाषामाध्यमेनोपविभागं परिकल्प्य प्रारम्भे विषयसूची अन्ते च लेखकसूची चित्रवीथिश्च समुपनिबद्धाऽस्ति। भाषान्तर्गतलेखकानामुपनामवर्णक्रमानुसारमेव निबन्धानां क्रमोऽस्त्यङ्गीकृतः।

निबन्धानामेषां प्रकाशने बहूनां विषयविशेषज्ञानां विदुषां साहाय्यमस्माभिर्लब्धं तेषां साहाय्यनौकां विना दुस्तरसरिदिवासीदेतन्नितान्तकठिनं कर्म। अतस्तेभ्यः सर्वेभ्यः विद्वत्तल्लजेभ्यो हार्दं कार्तज्ञ्यं विनिवेदयामि।

प्रकाशनस्यास्य प्राक्कथनं विधाय विधाय च सर्वविधं साहाय्यमस्माकं कुलपतयः प्रो. वाचस्पतिउपाध्यायमहोदयाः न केवलमस्मान् सततमुत्साहितवन्तः अपितु प्रतिपदं मुख्यसम्पादकत्वेन मार्गदर्शनं प्रदाय उपकृतवन्तः, अतस्तेषां सुरभारतीसमुन्नायकानां कृत आत्मनः आधमर्ण्यं बिभर्मि शिरसा। आचार्याणां श्रीमतां जगदम्बाप्रसादसिन्हामहोदयानां मार्गदर्शनं साहाय्यञ्च विना नैवासीतेतत् सुकरं कर्म सम्पादनस्य। अतस्तान् प्रति कृतज्ञभावं हृदयेन विज्ञापयामि।

अन्ते सुरुचिपूर्णं प्रकाशनं विधातुं प्रयतमानाय अमरप्रेसाधिकारिणे श्रीहीरालालमहोदयाय साधुवादान् वितीर्य विरमामि विस्तरात्।

रमेशकुमारपाण्डेयः

विषयसूची

हिन्दी

विश्वसभ्यतायां संस्कृतस्य योगदानम्

श्रीप्रियांशुप्रबल उपाध्यायः

विश्वसभ्यतां प्रति संस्कृवाङ्मयस्यावदानविषये चिन्त्यमाने, सभ्यता नाम का इति जिज्ञासायां, शिष्टानुशासितपथानुवर्तनम्, तदनुसारेण च जीवनेषु शिष्टव्यवहार-सत्यनिष्ठा-परोपकार-समदर्शित्व-दयादाक्षिण्यादि-गुणाधानेन मानवजीवनस्य विकास-संसाधनमित्यवधार्यते । सभाशब्दोत्तरमर्हार्थक-यत्प्रत्यययोगेन सभ्यः, तस्य च भावः सभ्यता इति । सभाशब्दविषये स्मर्यतेऽस्माभिरभियुक्तोक्तिः यत्—

न सा सभा यत्र न सन्ति वृद्धाः ।
वृद्धा न ते ये न वदन्ति धर्मम् ।।
नासौ धर्मो यत्र न चास्ति सत्यम् - इत्यादिः ।

एवं तर्हि सत्यरक्षाव्यतिरेकेण न यथार्थतः धर्मसाधनं स्यादिति । श्रीमद्भागवतमहापुराणप्रारम्भे 'सत्यं परं धीमहि' इति कथनं परमसत्याधिगमाय प्रचोदयत्यस्मान् । तदेव सत्यं यथा प्रतिभातं स्यादस्मासु तदर्थं संप्रार्थ्यते अस्माभिः— 'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।'इति ।

गुरुगृहात् शिक्षां समाप्य समावर्तनकाले गुरुदेवः शिष्याय उपदेशप्रदानवेलायां सर्वप्रथममेव उपदिशति- 'सत्यं वद, धर्मं,...... सत्यान्न प्रमदितव्यम्' इत्यादिः । जागर्ति चात्र उपनिषत्प्रवचनम् - 'सत्यमेव जयते, नानृतम्-' इत्यादि । उपनिषत् अस्माकं भारतराष्ट्रस्य मूलमंत्र-रूपेण सम्मानितमस्तीति देदीप्यते समन्तादमोघरूपेणैतदुपनिषत्प्रवचनम् ।

तदेवं मानवकल्याणरूपधर्मसाधनाय, परस्परेषु भ्रातृत्वबोधादिगुणाधानाय, च Theosophical Society प्रतिष्ठापयद्भिः मैडम् ब्ल्याभाड्स्किमहोदयाभिरन्यैश्च तदीयसहकारिभिः तत्सङ्घस्य आदर्शरूपेण परिगृहीतमेतदेव वचनजातं यत्, There is no religion higher than the Tru'h'

तथा च निखिलजीवजगतां कल्याणसाधनाय 'मा हिंस्यात् सर्वाभूतानि' इति वैदिकशिक्षानुशासनं विश्वजगति समग्रजीवजगत्कल्याणसाधकं विश्वस्य सर्वत्रैवाद्य अहिंसा परमो धर्म्म इति संस्कृतवाङ्मयोपदेश-पालनस्यौचित्यं विशेषतया अनुभूयते ।

परोकारसाधकं च वचनजातं बहुश उपलभ्यते संस्कृतवाङ्मयशास्त्रेषु । 'परोपकाराय सतां विभूतयः' इति संस्कृतवाङ्मयस्य प्रत्यक्षसार्थकप्रतिफलनरूपेण विश्वस्य बहुषु स्थलेषु ऋद्धिमद्भिः U.N.E.S.C.O.

इत्यादिप्रतिष्ठापितसंस्थानैः आधिदैविकतापप्रपीडिते जगति कियन्तो महान्त उपकाराः संसाध्यन्ते । परोपकारसाधकानि तानि संस्थानानि हार्दिक-धन्यवादार्हान्यस्माकम् । स्मर्यते हि अत्रास्माभिः प्रसङ्गक्रमेण यत् -

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ।। इति ।

'आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः' 'उदारचरितानां तु वसुधैव कुटुम्बकम् इत्यादि संस्कृतवाङ्मयवचनजातं बहुजनहिताय बहुजनसुखाय प्रत्यक्षतया विश्वसभ्यता—विकाससाधनक्षेत्रेषु महदादर्शस्थानीयमिति । सा हि आत्मौपम्यभावना समदर्शित्वरूपसाधनां विना नैव'सम्भवेदिति । तदत्र श्रीमद्भगवद्गीताशास्त्रे श्रीभगवान् उपदिशति यत्—

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतस्थमात्मानं ततो न विजुगुप्सते ।। इति ।

विविधेषु जगद्व्यवहारक्षेत्रेषु ऐक्यभावनाबोधोद्बोधनाय संस्कृतवाङ्मयविवृतयः समुपलभ्यन्ते आवैदिकयुगात् । वेदेषु तावदुपलभ्यते प्रथमतः पृथक्पृथग्रूपेण बहु विभिन्नदेवस्तवनम्, विभिन्नदेवताभ्यः पृथक्पृथग्यज्ञविधिः क्रमाच्च तत्र 'एकं सद् विप्रा बहुधा वदन्ति' - इति सत्रूपायामेकमात्रदेवभावभावनायां सकलदेवभावभावनापर्यवसानम् । तादृशज्ञानोद्बोधितधारणया अपरेवु न देवभावभावनाविनिवृत्तिरपि तु अन्येषु देवेषु देवभावनामपरिहृत्यैव एकदेवभावभावनायां सर्वेषां पर्यवसानम् । 'एको देवः सर्वभूतेषु गूढः'इति प्रवचनेन च एकस्यैव देवस्य निखिलविश्वाधारत्वमवबोधयति श्रुतिः । तेन विभिन्ननामरूपाभ्यां जगतः वैचित्र्यसत्त्वेऽपि तेषु अभिन्नभावधारणावबोधनमभिप्रायः श्रुतेः । तदैक्यभावभावनासिद्धं Unity in Diversity' इति प्रसिद्धं गतमस्ति वचनं दार्शनिकजगति ।

प्रोक्तभावसंसिद्धो च—

माता मे पार्वती देवी पिता देवो महेश्वरः ।
स्वजनाः मानवाः सर्वे स्वदेशो भुवनत्रयम् ।।

इति सर्वात्मैक्यभावभावनया परमां शान्तिमवाप्नुवन्ति महानुभवसम्पन्नाः शान्त-समाहितसाधकाः तादृशोदारचरितसंसिद्धये च संगच्छध्वं संवदध्वमित्यादिप्रार्थना ।

यस्याः खलु 'One Nation' इत्येवंविधायाः भावनायाः साधनमद्य चिन्त्यमानं विश्वस्य विद्वज्जगति, संस्कृतवाङ्मये तादृशी भावना, न केवलं भावना अपितु भावनानुसारिणी जगद्व्यवहारसंसिद्धिः पूर्वमेवोपलब्धेति । एवं श्रुतं कस्यचन मुखात् यत्, भारतसर्वकारप्रतिनिधिरूपेणासौ इन्दोनेशिया देशं गत आसीत् । तत्र सम्मिलितविभिन्नदेशागत-प्रतिनिधिभ्यः इन्दोनेशियादेशकर्तृपक्षस्तेभ्य एवं स्वागतं व्याजहार यत्, 'सातु नगरम्, सातु-वंशः, सातु-वाहाषा' इति । अर्थात् एको देशः, एकः परिवारः, एका च भाषा इति । तादृगैकात्म्यभावनया विश्वस्य महत्-कल्याणं साधितं स्यादित्यविसंवादितम् । तादृशी शुभबुद्धेरुदयो भवतु मानवानां विश्वस्य सर्वत्र, तेन च भवतु परस्परेषु विरोधपरिहारेण विश्वशान्तिरिति शम् ।

वैदिकसंस्कृते सामाजिक-संघटन-चेतना

डॉ. एल.पी. उपाध्यायः

वेदो विश्वस्य प्राचीनतमं वाङ्मयमस्ति। मानवस्य कल्याणार्थं यः कोऽपि धर्मः प्रावर्तत तस्याधारो वेद एव।[१] 'वेदाः स्थानानि विद्याया' इति सकलविद्यास्थानतया स्मृतो ज्ञानार्थकाद् विद्धातोर्घञ् प्रत्यये कृते निष्पन्नोऽयं वेदशब्दो ज्ञानराशेर्वाचकः।[२] विद् सत्तायाम्, विद् विचारणे, विद्लृ लाभे इति धातुभ्योऽपि 'हलश्च' इतिसूत्रेण करणाधिकरणकारकयोर्घञ् कृते वेदशब्दः साध्यते।[३] सर्ववेदभाष्यकारेण सायणाचार्येणापि स्वीयायाम् ऋग्वेद-भाष्यभूमिकायां वेदस्य वेदत्वं सुस्पष्टीक्रियते।[४] सायणाचार्यमते 'इष्ट-प्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।'[५] एवं वेदा ज्ञानराशित्वात् शाश्वतस्थायिनः ज्ञाननिधयः मानवहितप्रापकाः मनुजकर्तव्य-बोधका इति विविधधात्वर्थग्रहणाद् ज्ञायते।

'वैदिक' इति पदं 'वेद' शब्दात् ठञि ठकि वा कृते निष्पद्यते। ठञ् प्रत्यये कृते अस्यार्थः— 'वेदान् वेत्ति अधीते वा स वैदिकः।' ठकि प्रत्यये कृते अस्यार्थो भविष्यति— 'वेदेषु विहितः, तद्विषयको वा स वैदिकः। अयमर्थः 'वेदेषु भवः वैदिकः' इति रूपे ठञ्कृतेऽपि भवति। अस्मिन् शोधपत्रे वैदिकशब्दस्य अयमेवार्थोऽभिलषितः— 'वेदेषु विहितः वेदेषु भवो वेति। अत्र 'वैदिकसंस्कृते' इत्यस्य 'वैदिकसाहित्ये' इत्यर्थो ग्राह्यः। साहित्यरूपे वेदशब्दः मुख्यत्वेन ऋग्यजुःसामाथर्वनामभिः प्रचलितानां चतसृणां वेदसंहितानां बोधकः। एतेषामेव चतुर्णां वेदानां व्याख्यानभूताः ब्राह्मणग्रन्थाः सन्ति, येषु वैदिककर्मकाण्डस्य विशदं वर्णनमस्ति। एतेषु वेदानाम् आध्यात्मिकी

---

१. वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥
यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोभिहितो वेदे सर्वज्ञानमयो हि सः॥ मनु. २/६,७

२. विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिर्धर्मादिपुरुषार्था इति वेदाः।'— ऋ.प्राव.वृ., सम्पा. मंगलदेवशास्त्री, इण्डियन प्रेस लिमिटेड, इलाहाबाद, १९३१, p.५

३. विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति विन्दन्ते लभन्ते, विन्दन्ते विचारयन्ति सर्वे मनुष्याः सर्वाः सः विद्याः यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः।— दयानन्द, ऋ. भा.भू., सम्पा. युधिष्ठिर मीमांसक, p.२२

४. प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥— तै. भा. भूमिकायाम् (p. २) सायणाचार्येणोद्धृतम्

५. तै.भा.भू., सम्पा. बलदेव उपाध्याय, चौ.सं.सि. १९३४, p.२

व्याख्याऽपि प्रस्तूयते । एतेषां परिशिष्टरूपेण आरण्यकग्रन्थाः सन्ति । एषु अध्यात्मविद्याया विवेचनं प्राप्यते । उपनिषत्सु च तस्या एवाध्यात्मविद्यायाश्चरमोत्कर्षः संलक्ष्यते । एवं वैदिकसाहित्यशब्देन समग्रोऽपि मन्त्र-ब्राह्मण-आरण्यक-उपनिषद् संग्रहरूपो निधिर्गृह्यते । अत एव 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति निर्दिश्यते ।[१] यदि विचारदृशा समीक्ष्यते तर्हि वेदेषु बीजरूपेण दर्शनम्, राजनीतिः, अध्यात्मम्, नाट्यशास्त्रम्, काव्यशास्त्रम् इति विविधाः विषयाः वर्णिताः, तथाऽपि समाजशास्त्रीयदृष्ट्याऽपि वेदाः अतीवमहत्त्वपूर्णाः सन्ति । साहित्यं भवति समाजस्य दर्पणः । समाजस्य विकासस्य, सभ्यतायाः समुन्नतेः वर्णानां विविधवृत्तिपराणां नराणां च कर्मकलापस्य सामाजिक्या व्यवस्थायाश्च महत्त्वपूर्णम् इतिवृत्तं वेदेषूपलभ्यते । वैदिकसाहित्यं सामाजिकभावनायाः विचारस्य च विशुद्धाभिव्यञ्जकत्वेन सांस्कृतिकाचारविचारयोः प्रचारकत्वेन च संस्कृतेः संदेशं सहृदयेषु जनेषु प्रापयति । अतः अधुनाऽपि समाजस्य संघटने वैदिकसाहित्यम् उपयोगि वर्तते ।

अद्य समाजे राष्ट्रे विश्वस्मिन् वा यत्र कुत्रापि लक्ष्यते, तत्रैव संहतेश्चर्चा । इयं संहतिरेव संघटनं संघीभावो वा । यासां जातीनां वर्गाणां कुलानां च संघटनं भवति तेषां सर्वविधं बलं वर्धमानं लक्ष्यते । एकलस्तु नाद्योच्छ्वसितुमपि प्रभवति । परमद्य भारतस्य समाजः परमां विघटनोन्मुखतां गतोऽस्ति । स्वार्थान्धैः जाति-वर्ग-सम्प्रदाय-धर्म-व्यवसाय-राजनीतिदलादिव्याजेन समाजोऽयं पृथक्पृथक्तां नीतः विकृतश्च कृतोऽस्ति । एवं जनमानसेषु परस्परं निन्दनम्, अविश्वासः, समवेदनाराहित्यं द्वैषश्च प्रवृद्धोऽस्ति । समाजे विघटनप्रवृत्तेरुपशमनाय संघटनचेतनायाः प्रवर्धनाय च वैदिका आदर्शाः अतीव क्षेमकराः सेत्स्यन्ति । तेषामेव केचिद् आदर्शाः अत्र प्रस्तूयन्ते—

अद्यत्वे गृहे नित्यं कलहायमाना जनाः समाजे राष्ट्रे चैकतामपेक्षन्ते । परं राष्ट्रे संघटनं तावन्न सम्भविष्यति यावत् परिवारे विघटनात्मकः कलहो विद्यते, यथा व्यक्तिभिः परिवारः तथा बहुभिः परिवारैः समाजः राष्टं च सम्पद्येते । अद्य सीमितेऽपि कुटुम्बे पुत्रः पितुराज्ञां न पालयति, मात्रा सहापि सौमनस्यं न भजते । दम्पती परस्परं कलहायमानौ वर्तेते । भार्या कटुवादिनी भर्तुरवमानिनी च विद्यते । अस्यां स्थितौ कुटुम्बिनः जातु सुखं शान्तिर्वा न सम्भवति । अतः परिवारे वैदिकविधिना व्रतपालनं स्यात् । उपदिश्यतेऽथर्ववेदे— पुत्रः पितुः स्वकार्यैर्नितान्तमानुकूल्यं भजताम् । माता पुत्रैः साकं समानमनस्काऽनुकूला च भवतु । जाया पत्ये मधुरां शान्तिप्रदायिनीं कल्याणमयीं वाणीं वदतु ।[२] भ्राता सोदरो भ्रातरं मा द्विष्यात् । दायभागादिनिमित्तेन भ्रातृविषयमप्रियं मा कुर्यात् । स्वसा च स्वसारं भगिनीं मा द्विष्यात् । सर्वे भ्रातरः सम्यञ्चः (समानगतयः), सव्रताः (समानकर्माणो) भूत्वा भद्रया (कल्याण्या) वाचा वदन्तु ।[३]

व्यक्तीनां परस्परं सांमनस्यं स्नेहवृत्तिश्च सामाजिकसंघटनस्य मूलम् । परस्परं विवदमानाः क्वापि विषये नैकमत्यं गच्छेयुश्चेत्तत्रापि न कश्चित् निर्णयः संभवति । अतः पुरुषाणां हृदये सांमनस्यं भवत्विति भव्या

---

१. बौ.गृ.सू. ३/२/६३

२. अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् ॥— अथर्व. ३/३०/२

३. मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा ।
सम्यञ्च सव्रता भूत्वा वाचं वदत भद्रया ॥— तत्रैव ३/३०/३

कामना विराजते वेदेषु ।[१] सांमनस्यशब्दस्यार्थं सायणाचार्यः स्वभाष्य इत्थं विवृणोति— मिथः संप्रीतियुक्ता मनुष्याः संमनुष्यास्तैरेकमानसैर्भूत्वा निवर्तितं यत् तत् सांमनस्यं समानमनस्कत्वं सख्यमिति भावः । निखिलेऽस्मिन् संघर्षदौर्मनस्यादिभिः खिलीकृते जगति सांमनस्यमेव वर्तते तत् साधनं येन मानवाः सर्वैः साकं समानमतयो भूत्वा स्वीयानि कर्तव्यानि स्नेहेन प्रेम्णा सहानुभूत्या च निर्वाहयन्तु ।

सामाजिकपर्यावरणपरिशोधनाय विशुद्धो मानसिकः परिवेषः सर्वाधिकं महत्त्वं भजते । अतः यजुर्वेदे मनःशुद्ध्यर्थं निराकरणीयानि कर्तव्यानि वाऽनेकानि तत्त्वानि निर्दिष्टानि । तद्यथा— मानवेनानृतं परित्यज्य सदैव सत्यं वरणीयम् ।[२] न दुष्टभाषणं करणीयम् ।[३] न कञ्चिदपि प्रति क्रौर्यमाचरणीयम् ।[४] कौटिल्यं च कदापि न समाश्रयणीयम् ।[५] केवलं भद्रेणैव सम्पर्को विधेयः ।[६] द्वेषवृत्तिः परित्याज्या स्नेहवृत्तिराचरणे विनियोज्या भवेद् इति हेतोः वेदेषु अन्यत्रापि बहूपदिष्टम् ।[७] वेदोक्तदिशा सर्वविधान् मानवान् प्रत्यादरः स्थापनीयः सर्वविधं भेदभावं विहाय । समेऽधमवर्गीयाः निर्धना वा समाजस्य मेरुदण्डायिताः, न चेत् ते पशून् पालयेयुः, अन्नम् उत्पादयेयुः, यन्त्रागारेषु यन्त्राणि चालयेयुः, वस्त्रादीनि निर्मिमीरन् फलानि शाकांश्च जनयेयुः, प्रासादान् प्रतिष्ठापयेयुर् अपि नाम कथं समाजः समृद्धः स्यात् । निर्धना एव श्रमिकाः, तन्तुवायाः, नापिताः, यान्त्रिकाः, नाविकाः, सैनिकाः, लिपिकाः, भारवाहाः, सारथिनः, परिचारकाः, सूदाः, रजका भूत्वा समाजस्य समृद्धये श्राम्यन्ति, स्वेदं वाहयन्ति स्वयं च सदाभावग्रस्ता एव यथागतं विलीयन्ते । अतो वेदे तक्षरथकारकुलालकर्मारनिषादपुञ्जिष्ठमृगयुःश्वपतिप्रभृतयः सर्वे जनाः समादणीयाः उक्ताः ।[८] कल्याणी वेदवाक् न केवलं चतुर्वर्णेभ्य एवापितु सर्वजनेभ्यः आविर्भूता ।[९] एवंविधो मिथः सद्भावः समाजे संघटनं जनयति सामाजिकपर्यावरणपरिशोधनाय च कल्पते ।

---

१. संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥
समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥
समानी वः आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥ ऋ.१०/१९१/२-४

२. इदमहमनृतात्सत्यमुपैमि । यजु.१/५

३. प्रजां मा निर्वादिष्टम् । तत्रैव ५/१७

४. यत्ते क्रूरं यदास्थितं तत्त आप्यायताम् । तत्रैव ६/१५

५. युयोध्यस्मज्जुहुराणमेनो । तत्रैव ४०/१६

६. सं मा भद्रेण पृङ्क्तम् । ९/४

७. विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् । ऋ.४/१/४
यूयं द्वेषांसि सनुतर्युयोत । २/२९/२
मा सो अस्मान् द्विक्षत मा वयं तम् । अथर्व.१२/२/३३

८. नमस्तक्षेभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कमरिभ्यश्च वो नमो ।
नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वोनमो नमः श्वनिभ्ये मृगयुभ्यश्च वो नमः ॥ यजु.१६/२७

९. यथेमां वाचं कल्याणीमावदानि जनेभ्यः ।

स्वस्थसमाजस्य निर्माणाय स्वस्थव्यक्तीनाम् आवश्यकता भवति। जीवने दैन्यस्य नैराश्यस्य च च्छायाऽपि न स्यात्। यावज्जीवं समर्थेन्द्रियो भूत्वा जिजीविषेन्नरः। अतः उद्यन्तं सूर्यं प्रेक्ष्य समुल्लसितमानसः प्रकाशशक्तिं च लिप्समानो वैदिकर्षिराशास्ते सर्वथा स्वस्थं जीवनम्।[१] 'समम् अञ्जन्ति जना यस्मिन् स समाजः' इति व्युत्पत्त्या स एव समाजः कथयितुं शक्यते यस्मिन् व्यष्टयः एकीभूय गतिं कुर्वन्ति। आधुनिकविचारकैरपि समाजवादस्योद्देश्यं एतदेव निश्चीयते यत् समाजे असमानताया अपनयनं स्यात्। समाजवादः समाजे वर्गविभेदं जातिभेदं धर्मवैषम्यम् उच्चावचं धनिक-निर्धनभेदं न मान्यत्वेनाङ्गीकरोति। तद्दृष्ट्या सर्वेऽपि लोकाः समानाः। सर्वेषामेव राष्ट्रियसम्पत्तौ प्रकृतिप्रदत्तेषु च वस्तुषु समानाधिकारः। संक्षेपतः अद्यत्वे समाजवादे असमानताया अपनयनम्, जनस्य तत्क्षमताऽनुकूले कर्मणि नियोजनम्, उत्पाद्यवस्तुषु व्यक्तिविशेषस्य वर्गविशेषस्य वा स्वामित्वमपसार्य समाजस्य राज्यस्य वाऽधिकारस्य संस्थापनम्, अकर्मण्याय आवश्यकसुविधानिवारणम्, पूंजीवादं विनाश्य सर्वविधशोषणप्रकारस्य विनाशनम्' इत्यादिविषयाः पठ्यन्ते पाठ्यन्ते च शिक्षणसंस्थासु। अस्मिन् प्रसङ्गे पूंजीवादस्य चर्चाऽपि प्रासङ्गिकी। समग्रेऽपि भुवने विषमताया अत्याचारस्यान्यायस्य शोषणस्य च मूलं पूंजीवाद एव निर्णीयते। पूंजीपतयः कं कं नाऽपराधं कुर्वन्ति ते करेऽपि चौर्यं विदधति, खाद्यवस्तुषु गर्ह्यवस्तूनि मिश्रयित्वा सर्वस्य राष्ट्रस्य स्वास्थ्यं दूषयन्ति, भूयांसमायं गोपायन्ति, दुर्लभवस्तूनि प्रचुरलाभार्थिनः संगोप्य रक्षन्ति। एवं समाजविरोधी पूंजीवाद एव स दोषाकरो विधिः, येन भुवने वैषम्यं वर्गसंघर्षः शोषणं, पतितोत्पीडनं, पराभ्युदयोपेक्षित्वं च प्रचरति। एष एव विधिः विश्वशान्तिविनाशप्रवणः, मानवमौलिकाधिकारसंहारकः, मानवविकासमार्गावरोधकश्च विज्ञायते।

एवं समाजे व्याप्तस्यार्थिकवैषम्यस्य समाधानाय वैदिकचिन्तनमतीव हितकरं वर्तते। यजुर्वेदे उपदिश्यते यत् सर्वस्य चराचरात्मकस्य जगतः एकाधिपतिः परमेश्वर एव, अतः सांसारिकाः सकला अपि विभूतयस्तस्यैव। प्राणिनस्तु तदनुग्रहार्थिनः। प्रभुणा यावदपि द्रव्यं पात्रधिया दीयते तत्रैव तुष्टेन जनेन स्वापेक्षाः पूरणीयाः। धनेऽत्र नास्तिकस्यापि जनस्य स्वामित्वम्। अतः 'इदं मम न तवे' ति स्थाने 'इदं न ममे' ति. भावमाश्रित्य त्यागवृत्तिर्ग्राह्या।[२] एवं कृतेऽसन्तोषस्य तज्जन्यविवादस्य वा नास्त्यवसरः। अत्रेदं तात्पर्यं यत् स्वार्थसिद्धिरेवार्थिकवैषम्यस्य मूलम्। स्वार्थभावनैव मानवं मानवशोषणे प्रेरयति। यदि परार्थनिष्पादनपूर्वकं स्वसुखसाधनमभिलष्येत तर्हि पारस्परिको विवादः कलहः परशोषणं च न प्रवर्तेरन्। अपि च, धनं सञ्चरिष्णु इति सूक्तं वेदे।[३] अतो वस्तुतोऽस्थायिनः अर्थस्य कृते स्तेयापहरणादिजन्यस्य कलहस्य विघटनस्य वा नास्त्यौचित्यम्।

ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च॥ तत्रैव २६/२

१. तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं
प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥ तत्रैव ३६/२४

२. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्॥ यजु.४०/१

३. ओ हि वर्तन्तेन् रथ्येव चक्राऽन्यमन्यमुप तिष्ठन्त रायः। ऋ.१०/११७/५

वितरणव्यवस्था समाजवादस्य मुख्याङ्गभूता वर्तते। समाजवादे सर्वेषामपि जनानां सौस्थ्यं काम्यतेऽपेक्ष्यते च। यथाऽप्यङ्गुलीनामिव सर्वेषां समानी सम्पन्नता दुःशका। तस्यां स्थितौ सुसम्पन्ना अर्थकृशैः सह संविभज्यैव सम्पदो भुञ्जीरंश्चेन्न परेषामेवापितु तेषामपि क्षेमाय सिद्ध्येत्। अन्यथाऽभावग्रस्तेषु विपरीता प्रतिक्रिया सम्भवति। अद्य कृपणानात्मम्भरिणां परशोषकाणां वा धनिनाम् अन्नाद्यभावविशीर्णचित्तैः क्षुत्पिपासाऽऽशीविषसंदष्टैर्लुण्ठकैर्दस्युभिः क्रियमाणा लुण्ठनहिंसितादिनृशंसक्रियाः पदे पदे श्रूयन्ते दृश्यन्ते च। अतो वेदः समाजे व्याप्तामार्थिकीमव्यवस्थां परस्परमादानप्रदानाभ्यां दूरीकर्तुं निर्दिशति।[१]

अद्य समाजे जातिकुलवित्तपदवर्गभेदकृतं वैषम्यमाश्रित्य व्यापकोऽसन्तोषः सर्वत्र लक्ष्यते। हिंसाताण्डवञ्च यत्र तत्र श्रूयते दृश्यते च। देहात्मवादे एवैतादृशी भेदबुद्धिः प्रतिशरीरं भिन्नतया व्यक्तीनां बोधात्। विविधा मातापितृपुत्रादिसम्बन्धाश्चापाततो लोकं मिथो योजयन्तोऽपि भिन्नमेव सूचयन्ति। परं सर्वत्र जीवमात्रेऽनन्यस्यात्मनः सत्तायां ज्ञातायां तस्या भेदबुद्धेरयाथार्थ्यं प्रतिपादयन्ति वेदाः। परमपुरुषः परमेश्वर एवात्माहुतिप्रदानेन विश्वस्यास्य जनयिता बभूवेति पुरुषसूक्ताज्ज्ञायत एव।[२] अस्मिन्नेव सूक्ते चातुर्वर्ण्यस्य सृष्टिः विराट्पुरुषाद्वर्णिता।[३] वयं सर्वे एकस्यैव परमात्मनः पुत्राः पुत्र्यश्चेति तथ्यं वैदिकसाहित्येऽन्यत्रापि प्राप्यते।[४] अस्माकं माताऽपि एकैव।[५] सैव विविधधर्मानुयायिनो विविधभाषाभाषिणः अस्मान् बिभर्ति।[६] अतः किं कारणं भेदप्रथनम्? यदा समाजे वैदिकीयमभेददृष्टिः प्रवर्तते, तदा जगदिदं स्वर्ग इव चकास्ति। न तत्र मोहशोकादेरवसरः, न च तदा विजुगुप्सा विचिकित्सा वा बाधते। एकत्वबुद्धौ न दुःखाग्निलेशोऽपि, क्लेशलवोऽपि च।[७] अपि चात्मन उत्तमाधमभावनया पृथग्वर्तित्वं निषिध्य सामाजिकं सामान्यं प्रतिपादितं वेदे। समाजे संघटनं मिथो ज्येष्ठकनिष्ठभावनात्यागेनैव सम्भवतीति वैदिकं महत्त्वपूर्णं चिन्तनम्।[८] पुनः स्मरणीयमिदमत्र यन्मनः शिवसङ्कल्पं भवेत्समे-

---

१. देहि मे ददामि ते, नि मे धेहि नि ते दधे। यजु. ३/५०
केवलाघो भवति केवलादी— ऋ. १०/११७/६
अदित्सन्तं चिदाघृणे पूषन् दानाय चोदय। पणेश्चिद् वि म्रदा मनः॥ ऋ. ६/५३/३

२. तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।
तेन देवा अजयन्त साध्या ऋषयश्च ये॥ ऋ. १०/९०/७

३. ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ तत्रैव १०/९०/१२

४. स नो बन्धुर्जनिता स विधाता....। यजु. ३२/१०
स नः पिता जनिता स उत बन्धुः। अथर्व. २/१/३

५. माता भूमिः पुत्रो अहं पृथिव्याः। तत्रैव १२/१/१२

६. जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्। तत्रैव १२/१/४५

७. यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति॥
यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद् विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ यजु. ४०/६,७

८. अज्येष्ठासो अकनिष्ठास एते सम्भ्रातरो वावृधुः सौभगाय। ऋ. ५/६०/५

षामिति सामाजिकसंघटनायाऽऽवश्यकम् । न ह्यशिवेन मनसा शिवं भद्रं वैकत्वं सम्पाद्यते । अत एव यजुर्वेदे मनसः शिवसङ्कल्पयुक्तत्वं चिकीर्षितम् ।[१] अत्रेदं स्मरणीयं यद् वेदोक्त-ज्येष्ठकनिष्ठभेदत्यागस्य नायमभिप्रायो यत् समाजे गुणविद्यापदादिकृता वरावरत्वभावनोपेक्षणीया । एवं कृते समाजेऽशान्तिर्जायेत । अतः हीनोच्चभाव-निरासपूर्वकं सर्वस्यापि सामान्ये काम्यमानेऽपि समाजे वयोविद्यादिदृशाऽवरा वरीयसोऽवश्यमाद्रियेरन्निति तात्पर्यमत्र वेदस्य । वैदिकर्षिर्जनान् वरीयेभ्यो मानं प्रदायापि सामाजिककल्याणकर्मणि स्वनियोगानुष्ठाने चाभिरतये उपदिशति ।[२] लोकेऽपि शिक्षासेवादिविभागेषु पदेनावरा वरीयस आद्रियमाणा परस्परं नियोगमनुतिष्ठन्तीति पश्यामो वयम् ।

भारतीयसंस्कृतौ मन्यते जगदिदं कर्मक्षेत्रम् । अतः सामाजिकसंघटने प्रबलो बाधकः कर्मप्रमादः । अद्यतनः समाजः सर्वथा विलासप्रियः स्वयमकर्मण्यः परद्रव्ये गृध्रदृष्टिः विविधानि कुत्सितानि कर्माण्याचरति । अद्य केचन दिवानिशं भैक्ष्यं चरन्तः संन्यस्तकर्माणो भारभूताः समाजं क्लिश्नन्ति । अन्ये निर्धनत्वपीडिताः समाजव्यवस्थां कुत्सयन्ति भाग्यं च निन्दन्ति, न तु श्रमं चिकीर्षन्ति । एते समाजं राष्ट्रं च पतनोन्मुखं कुर्वन्ति । एतैरवश्यं स्मरणीयमिदं यन्नेदं जीवनं नैष्कर्म्यमयम् । स्वकर्तव्यभावनया कर्मणोऽनुष्ठानं जीवनं परमावश्यकम् । अतो जनान् स्वस्वकर्तव्यनिर्वाहाय प्रेरयति वैदिकर्षिः ।[३] पुरुषसूक्ते गुणकर्मविभागशः एव परस्परमभिन्ना अपि ब्राह्मणादयश्चत्वारो वर्णाः विभक्ताः । एवं सृष्टेर्विस्तीर्णरङ्गमञ्चे स्व-स्वभूमिकानिर्वाहदृशा चतुर्धा विभक्तेऽपि समाजे परस्परसहयोगदृशा सामञ्जस्यमिष्टं वेदे । विशेषेण बुद्धिबलस्य शरीरबलस्य च सामञ्जस्यं समाज (राष्ट्र) हिताय नितरामपेक्ष्यते ।[४] बुद्धिबलस्य ब्राह्मणस्य तपःप्रीतिको धर्मः सर्वसामान्यनोक्तः आन्तरिकरूपेण शरीरबलस्य क्षत्रियस्यापि धर्माः सुविदिता एव । परं राज्ञः कृते कश्चिद् विशेषः । राष्ट्रस्य रक्षणाय संभरणाय च नियुक्तेन राज्ञा सर्वदाऽवहितेन भाव्यम् । तस्य प्रजाः राज्ये बहिश्च घटमानं प्रत्येकं वृत्तं तस्मै निवेदयेयुः ।[५] एवं राष्ट्ररक्षणं कामं प्राधान्येन राष्ट्रस्य सर्वोच्चाधिकारिणः एव नियोगः, परं बाह्यान्तरिकरिपुभ्यो नैकलः स युगपत् तद् रक्षितुं शक्नोति । अतः नागरकस्य जानपदस्यापि तत्र योगोऽपेक्ष्यते । बाह्यशत्रुकृताभियोगे सदाशङ्क्यमाने अन्तःप्रकोपे च प्रत्यक्षीक्रियमाणे जने जने च राष्ट्ररक्षाया भावो नितरामपेक्ष्यते । इयमेव निष्ठा अथर्ववेदे 'माता भूमिः पुत्रो अहं पृथिव्याः'[६] तथा यजुर्वेदे 'नमो मात्रे पृथिव्यै'[७] इत्यादि मन्त्रैः प्रकटिता । एषां मन्त्राणां पाठमात्रेण गानमात्रेण वा

१. तन्मे मनः शिवसङ्कल्पमस्तु । यजु. ३४/१-६

२. ज्यायस्वन्तश्चित्तिनो मा वियौष्ट संराधयन्तः सधुराश्चरन्तः ।
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान् वः संमनसस्कृणोमि ॥ — अथर्व. ३/३०/५

३. कुर्व- ेह कर्माणि जिजीविषेच्छतं समाः । यजु. ४०/२

४. यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह ।
तल्लोकं पुण्यं प्रज्ञेयं यत्र देवः सहाग्निना ॥ तत्रैव २०/२५

५. निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ॥ तत्रैव २०/२

६. अथर्व. १२/१/१२

७. यजु. १/२२

राष्ट्ररक्षा न संभविष्यति । यदा राजा 'प्रजाश्च स्वस्वकर्मण्यभिरताः समाजे (राष्ट्रे) जागृयुः, तदैव समाजस्य (राष्ट्रस्य) सुरक्षोन्नती सुनिश्चिते भविष्यतः । अतः अस्माकं जागरणाय प्रदत्तो वैदिकः संदेशः अतीव हितकरः । राष्ट्रस्य सर्वतोऽभ्युदयं कामयमाना न कस्यापि वैमत्यावहा वैदिकी प्रार्थना'[१] अद्यापि सर्वथा प्रासङ्गिकी । अत्र स्मरणीयमिदं यत् समाजे संघटनायानुशासनस्यास्ति परमावश्यकता । नेतारः स्वयमनुशासनबद्धाः स्युः । ते उत्कोचादिग्रहणेन कोटिशो वित्तमर्जयितुं तत्पराः न स्युः । भिन्नरुचयोऽपि लोकाः अनुशासनसूत्रे ऐक्यबद्धाः स्युः । नेतुः शासनपालनं तेषामनिवार्यं कर्तव्यं स्यात् । हिंसावृत्तिकलुषितमानसानां विनाशकानां रक्षसाम्, औदार्यविधुराणां परपीडनपराणामरातीनाञ्च बाधने, पराभवे, विनाशे वाञ्छा वर्तते वैदिकर्षेः ।[२] समाजे स्तेनैस्तस्करैः पापकर्मभिश्च जनैर्नैव भाव्यम् ।[३] ते हि सर्वे भद्रापघातिनः । एवमेव मत्सरान्धितधियां निन्दानन्दमनुभवतां कुटिलाचारमाचरतां द्वैषैकधर्माणां जनानामपसारणं बाधनं वधश्च ऋषिभिश्चिकीर्ष्यते मुहुर्मुहुः ।[४] विनाशकानां विनाशे नास्ति कोऽपि दोषः ।[५] समाजे संघटनमभिलषता जनेन सेवनीयः इन्द्रियसंयमः दमनीया स्वार्थलिप्सा, परित्याज्या विघटनकारिणी प्रवृत्तिः । अथर्ववेदे परमैश्वर्यसम्पन्नो जीवः स्वारिषड्वर्गं हन्तं हातुं वा सम्बोधितः ।[६] अत्रोलूकयातुं शुशुलूकयातुमित्यादिभिः तेषां तेषां मृगपक्षिणां स्वाभाविकदोषान् प्रकारान्तरेण कामक्रोधादिषड्दोषान् हन्तुमुपदिष्टः येन समाजसंरचनाया काऽपि बाधा न भवेत् ।

इत्थमतिसूक्ष्मा सर्वतो भद्रकाङ्क्षिणी च वर्तते वैदिकी सामाजिकसंघटनचेतना । उपरि निर्दिष्टाः वैदिकमन्त्राः विश्वजनीनं सत्यं ख्यापयन्तः समाजसंघटनदृशाऽसाधारणं वैशिष्ट्यं भजन्ते । आवश्यकताऽस्ति यथायथमाचारे तेषां विनियोगस्य जनसामान्ये च तेषां समुचितप्रचारस्य इत्यलमतिविस्तरेण ।

---

१. आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्या धी महारथो जायतां... योगक्षेमो नः कल्पताम् । यजु. २२/२२

२. इदमहं रक्षसां ग्रीवा अपि कृन्तामि । यजु. ६/१

३. ये स्तेना ये च तस्करास्ताँस्त अग्नेऽपि दधाम्यास्ये । तत्रैव ११/७७

४. यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्यो अस्मान्धिप्साच्च सर्वं तं मस्मसाकुरु ॥ तत्रैव ११/८०

५. धूरसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान्धूर्वति तं धूर्वयं वयं धूर्वामः । तत्रैव १/८

६. उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुतकोकयातुम् ।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्रमृण रक्ष इन्द्र ॥ अथर्व.८/४/२२

सामयिकपर्यावरणसमस्या संस्कृतञ्च

डॉ. विनीतघिल्डियाल:

'संस्कृतभाषया प्राप्तं ज्ञानं सर्वतोमुखं, जीवनस्य विभिन्नक्षेत्रै: सह सम्बद्धं, व्यापकं विततञ्चास्ति। इदं वक्तुं सर्वथानुचितं यद् संस्कृतसाहित्यं, धार्मिकक्रियाकलापानामनुष्ठानानाञ्च संग्रहमात्रमिति। संस्कृतसाहित्ये ऋग्वेदादारभ्य लौकिकसंस्कृतसाहित्यपर्यन्तं व्यापकं वैज्ञानिकविवेचनं विद्यते। इदं विवेचनम् आधुनिकयुगात् पूर्ववर्तिन: कस्यापि देशस्य ज्ञानपरम्परापेक्षया अधिकं व्यापकं विद्यते। आधुनिकानां पर्यावरणसमस्यानां समाधानानामुपायानाञ्चोल्लेखोऽप्यत्र पर्याप्तरूपेण प्राप्यते।'

प्राचीनकाले मानवप्रकृत्यश्च सम्बन्धा: मधुरा आसन्। मानव: प्रकृतेरुपासक आसीत्। प्रकृते: प्रत्येकमंगं स श्रद्धाभावेन पूजयति स्म। तदानींतन: स प्रकृतेरभिन्नाङ्गरूपेण अनुकूलतामवाप्तवान्। अद्य तादृशं सन्तुलनं, स्वस्थं पर्यावरणं नास्ति यादृशश्च अस्मिन् भूमण्डले चत्वारिंशत्सहस्रवर्षपूर्वं मानवस्य प्रादुर्भावकाले आसीत्। इदं सत्यमेव प्रतीयते यद् पृथिवीग्रह एव जीवनस्य उद्‌भवोऽभवत्। सर्वेऽपि मानवा:, पशुपक्षिण:, वृक्षा अन्येऽपि जीवजन्तव: अस्मिन्नेव ग्रहे निर्भरा: सन्ति। वैज्ञानिकानामियं मान्यता यद् अर्बुदवर्षपूर्वं सूर्यस्य प्रज्वलितमेकं खण्डं तस्मात् पृथग् अभवत्। तत् सूर्यखण्डं बहुभिर्वर्षै: शीतलमभवत्। यदा सूर्यस्येदं खण्डं पूर्णरूपेण शीतलमभवत् तदा एतस्य खण्डस्य विलक्षणाकृति: सञ्जाता। इदमेव पृथग्भूतं खण्डं भूमण्डलं पृथिवीमण्डलं वा कथ्यते। परिवर्तनस्येदं चक्रं पृथिव्यामविरतरूपेण प्राचलत्, परिणामत: अस्यां पृथिव्यां समुद्रस्य, पर्वतस्य, समविषमभागस्य नदीगर्तानाञ्चोत्पत्तिरभवत्। एवं पृथिव्यामविरतरूपेण जैवरासायनिकपरिवर्तनै: विकासस्य कारणैश्च वनस्पतीनां जीवजन्तूनाञ्चोद्‌भवोऽभवत्।

पर्यावरणमिति शब्द: परि + आ + वृ धातो: ल्युट्-प्रत्ययस्य संयोगेन निष्पन्नो भवति। वस्तुत: यत् किञ्चिदपि अस्माकं परित: दृश्यते—भौतिकं, जैविकं, सामाजिकसांस्कृतिकपरिवेशश्च, आर्थिकव्यवहारो, राजनैतिकक्रियाकलापश्च तत् सर्वमपि पर्यावरणं कथ्यते। प्राकृतिकपर्यावरणस्य दृष्ट्या पृथिव्या: पर्यावरणं मुख्यत: त्रिषु भागेषु विभक्तम्— प्रथमम्, यत्र स्थूलशिलामृदासिकतादयो वर्तन्ते तत् स्थलं भूमण्डलं वा कथ्यते। एवमेव प्रकृते: तद् भागं यत्र जलमस्ति, जलीयमण्डलं कथ्यते। भूमण्डलजलमण्डलयो: मध्यस्थं नौसीयावरणं वायुमण्डलमुच्यते। वायुमण्डले ऑक्सीजननाइट्रोजनकार्बनडाइआक्साइडइत्यादय: 'गैसा:' सर्वदा विद्यमाना: सन्ति। पृथिव्या: तत् खण्डं यत्र जीवजन्तव: निवसन्ति, जीवमण्डलमिति उच्यते। प्रकृत्या संतुलिते पर्यावरणे निवासेनैव क्षेत्रविशेषे मानवा:, जीवजन्तव:, वनस्पतयश्च जीवनं धारयन्ति। यदा क्षेत्रविशेषे प्रकृतेरसंतुलनं जायते तदा तस्य

प्रभावेण संपूर्णपर्यावरणं प्रभवितुमारभते । प्रकृतेः पृथिव्या वा असन्तुलनस्य प्रभावः जीवजगतः उपरि दृश्यते । गुरुत्वाकर्षणशक्त्यैव पृथिव्या अस्तित्वमस्ति । यदि अत्रासंतुलनं भवेत् तर्हि तस्या अस्तित्वमपि न भवेत् ।

अद्य मानवः स्वात्मानं प्रकृतेरंगं न मत्वा प्रकृतेरधिपतिं मनुते । एवञ्च स्वार्थपूर्तये पर्यावरणस्य प्रत्येकस्यावयवस्य प्राकृतिकसाधनानाञ्च—यथा वनजलवन्यप्राणिखनिजादीनाम् अत्यधिकं दोहनं कृत्वा प्रकृतिं समूलं विनाशयति । अस्मादेव कारणात् अनेकाः पर्यावरणसमस्याः जाताः यथा—जलप्रदूषणं, वायुप्रदूषणं, जैवविविधतायाः ह्रासः, वन्यप्राणिनां विभिन्नानां प्रजातीनां लोपः, वनानां छेदनं, पृथिव्याः तापमानस्य वृद्धिः, उर्वरामृदायाः क्षरणम् अम्लीयवर्षादयश्च । इयं स्थितिः अत्यन्तभयावहा यस्याः शीघ्रं निराकरणमपेक्ष्यते । तत्तु प्राचीनसंस्कृतसाहित्ये एव निहितमस्ति ।

इदमत्यधिकं महत्त्वपूर्णं तथ्यं यत् संस्कृतमद्याप्यस्मभ्यममूल्यमस्ति यतो हि अत्र ज्ञानराशिर्विद्यते या साम्प्रतिके संकटग्रस्तकाले अस्माकं दिग्दर्शनं करिष्यति । समग्रविश्वे भारतवर्ष एव एतादृशो देशो यस्य 'अरण्यसंस्कृतिः' वर्तते । अस्माकम् ऋषयः प्रकृतेः रहस्यं जानन्ति स्म । अल्पमपि प्रकृतेरसामञ्जस्यं पर्यावरणस्यासन्तुलनमुत्पादयिष्यति, अतएव स भूलोकाय, अन्तरिक्षलोकाय द्युलोकाय च शान्तिं कामयते—

"द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः । शान्तिर्ब्रह्मशान्तिः । सर्वशान्तिः शन्तिरेव शान्तिः । सा मा शान्तिरेधि ।" शुक्लयजुर्वेदः, ३६

वैदिकऋषिः ब्रह्माण्डं परस्परं सम्बद्धरूपेण मनुते स्म । स एतदपि जानाति स्म यत् संपूर्णपरिवर्तनानां गतेश्च कारणमेका नियंत्रिता ऊर्जा वर्तते । ऊर्जाया अपरिमितं स्रोतोरूपः सूर्यो देवताऽस्तीति स्वीकुर्वन् सः कथयति — "सूर्यदेवो भव ।" सूर्यः संपूर्णचराचरस्य आत्मा इति स्वीकृतम् ऋग्वेदे —

'सूर्य आत्मा जगतस्तस्थुषश्च' । इति । १/११५/१

सूर्यः प्रश्नोपनिषदि प्राणरूपेण वर्णितः — 'आदित्यो ह वै प्राणः ।' अतएव तस्य वियोगो न स्यात् — 'मा नः सूर्यस्य संदृशे युयोधाः' ऋग्वेदः २/३३/१

वैदिकसंस्कृतसाहित्ये वायुर्हि आयुरिव वर्णितः —

आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।
घोष इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ॥ ऋग्वेदः — १०/१६८/४

ऋग्वेदे वायुर्हि ओषधिगुणोपेतः निर्दिष्टः —

आ वात वाहि भेषजं विवातं वाहि यदपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥ १०/१३७/३

वस्तुतः प्रदूषणरहितः शुद्धः पूतः वायुरेव स्वास्थ्यप्रदः, जीवनदायकश्चेति वैज्ञानिकं तथ्यं सुविदितमासीत् अस्माकमृषीणाम् । शुद्ध आरोग्यकरश्च भेषजवातो विशेषतः हृदयरोगिणां कृते सुखशान्तिदायकः, आयुवर्धकश्चेति रहस्यमपि सम्यग् जानन्ति स्म वैदिका ऋषयः—

वात आ वातु भेषजं शंभु मयोभु नो हृदे । इति
प्राण आयुंषि तारिषत् ।। ऋक् १०/१८६/१

संस्कृतसाहित्ये पर्यावरणस्य शुद्ध्यर्थं यज्ञस्य महनीयं महत्त्वमङ्गीकृतम् । यदा तु घृतमिश्रिता आहुतयो यज्ञकुण्डे प्रदीयन्ते तदा तदुत्थितो धूमः वायुम्, आकाशं, पृथिवीं सकलञ्च वातावरणं शोधयति सुगन्धितञ्च विदधाति—

'घृतेन द्यावापृथिवी पूर्येथाम्' — यजुर्वेदः, ५/२८

तथा च सामवेदे—'आ जुहोता हविषा मर्जयध्वम्', १/७/१

कालिदासेन अभिज्ञानशाकुन्तलेऽपि यज्ञस्य महत्त्वं प्रतिपादितम् —

अमी वेदिपरितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां बहुशः पावयन्तु ।।

वैदिकाः ऋषयः मन्यन्ते यद् अग्निहोत्रस्य वृक्षेषु, वनस्पतिषु तेषां मूलेषु, शाखासु फलेष्वपि च सुप्रभावो जायते, यद्यपि आधुनिका वैदेशिकाः विद्वांसः अस्मिन् विषये शोधरताः सन्ति ।तत्र वेदे प्रकाशितं यत् —

मूलेभ्यः स्वाहा । शाखाभ्यः स्वाहा । वनस्पतयः स्वाहा । फलेभ्यः स्वाहौषधीभ्यः स्वाहा । (यजुर्वेदः २२-२८)

अतएव संस्कृत-साहित्ये यज्ञस्य महत्त्वं वर्णयद्भिः प्रोक्तमस्ति—**'यज्ञो वै श्रेष्ठतमं कर्म', 'यज्ञो वै विष्णुः'** इत्यादयः । अत्र तु मया केवलं प्राकृतिकपर्यावरणस्य दृष्ट्यैव यज्ञस्य महत्त्वं प्रतिपादितम्, आध्यात्मिक-दृष्ट्या तु यज्ञस्य महत्त्वं स्वतः सिद्धमेव ।

पर्यावरणसंरक्षणार्थमद्य वैज्ञानिकाः वृक्षाणां वनानाञ्च महत्त्वं सर्वोपरि स्वीकुर्वन्ति । संस्कृतसाहित्येऽपि वृक्षाः प्राचीनकालादेव देवता इव पूजिता आसन् — **'नमो वृक्षेभ्यः'**(यजु. १६-१७), **'ओषधीनां पतये नमः'**(तत्रैव १६-१९), **'अरण्यानां पतये नमः** (यजुः १६-२०)' **'नमः वन्याय च'** (यजुः १६-३४) ।

ऋग्वेदे तु एकं संपूर्णं सूक्तं वनदेवतायै प्रस्तुतं यत्र प्रभूतान्नयुता अरण्यानी सर्वेषां जन्तूनां मातृरूपेण वर्णिता —

आञ्जनगन्धिं सुरभिं बह्वन्नामकृषीवलाम् ।
प्राह मृगाणां मातरमरण्यानिमशंसिषम् ।। (१०/१४६/६)

यद्यपि 'वनस्पतिः', 'वृक्षः', 'ओषधिः' इत्यादयः शब्दाः वेदेषु लौकिकेषु च काव्येषु एकस्मिन्नेवार्थे प्रयुक्ताः तथापि मन्त्रद्रष्टारः ऋषयः तथ्यमिदं सम्यग्रूपेण जानन्ति स्म यत् वृक्षाः लताश्च न केवलं पुष्पैः, फलैः काष्ठादिभिश्च विश्वं समृद्धं कुर्वन्ति, अपि तु प्राणदायकवायुना पर्यावरणमपि माधुर्यमयं कुर्वन्ति । अतएव वृक्षाः सर्वथा संरक्षणीयाः । न केवलं संरक्षणीया अपि तु नूतनवृक्षा अप्यारोपणीयाः । अत ऋग्वेदे उक्तम् — **'वनस्पतिं वन आस्थापयध्वम्'**(१०,१०१,११) । एतदेव मत्स्यपुराणे निर्दिष्टम् —

दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ॥

एवमेव वृक्षाणां छेदनमपि संस्कृताहित्ये निषिद्धमस्ति —

'माऽपो मौषधीर्हिंसीः' (यजु., ६/२२)

अतएवाभिज्ञानशाकुन्तले कालिदासः कण्वोक्तिरूपेण प्रकाशितवान् यत् मण्डनप्रियापि शकुन्तला पत्रच्छेदं न करोति — **'नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्'** (शाकुन्तलस्य चतुर्थेऽङ्के)

बादरायणश्रीकृष्णद्वैपायनेन पर्यावरणसंतुलनाय बनानां महत्त्वमित्थं प्रतिपादितं महाभारतस्योद्योगपर्वणि—

निर्वनो वध्यते व्याघ्रो निर्व्याघ्रः छिद्यते वनम् ।
तस्माद् व्याघ्रो वनं रक्षेद् वनं व्याघ्रं च पालयेत् ॥'

अतएव वैदिकमन्त्रदर्शिभि जलानां भूमेश्चापि हिंसा निषिद्धा — **"माऽपो मौषधीर्हिंसीः** (यजु., ६-२२), **'पृथिवीं मा हिंसीः'** (यजु. १३-८) । जलानां प्रदूषणं तत्र मलमूत्रविसर्जनेन कलयन्त्रालयानां प्रदूषितजलेन भवति । तेन हेतुना मनुस्मृतौ निर्दिष्टमेतत्—

नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् ।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ॥ (४/५६)

दिव्यस्रोतोरूपेण शुद्धजलानां पत्किरत्वं जीवनप्रक्रियासाधकत्वञ्च वैदिकमहर्षयः सम्यग् जानन्ति स्म तेन हेतुना तत्र वेदे पूर्वमेव प्रकाशितम्—

या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजा ।
समुद्रार्था या शुचेयः पावकास् ता आपो देवीरिह मामवन्तु ॥ ऋक्. आप. सू. ४६/२/३७१'

एवमत्र शुचयः पावका आपश्च अस्मान् रक्षन्तु इति प्रार्थना विहिता । इत्थमेव स्वार्थपूर्तये बहुलाभाय वा रासायनिकानामुर्वरकाणामतिप्रयोगेन दूषितपदार्थानां प्रक्षेपणेन च पृथिवीं दूषितां न कुर्यात् । त्यागपूर्वकमेव मानवाः पार्थिवपदार्थोपभोगं कुर्युरिति विचारेण तत्रेशोपनिषदि प्रोक्तमस्ति—**'तेन त्यक्तेन भुञ्जीथाः मा गृधः... ।'**

संस्कृतसाहित्यं प्रायशः सर्वत्र पृथिवीं प्रति मातृभावो दृश्यते—**'माताभूमिः पुत्रोऽहं पृथिव्याः ।'** 'जननीजन्मभूमिश्च स्वर्गादपि गरीयसी ।' इति संस्कृतसूक्तिषु प्रसिद्धैव ।

किं बहुना, यदा पृथिवी पुत्रवत् अस्मान् पालयति तर्हि अस्माभिरपि खनिजपदार्थादिप्राप्त्यर्थं पृथिव्या अत्यधिकं खननं, स्वार्थपूर्तये भूधराणां भेदनं वनानां वा च्छेदनं कदापि न करणीयम् एवंविधैः कार्यैः पृथिव्याः हिंसा न विधेया । यदि वयं पर्यावरणे सन्तुलनं वाच्छन्ति तर्हि तस्य समाधनं संस्कृतसाहित्ये निहितम् । प्रकृतिः अस्माकं माता वयञ्च अस्याः सन्ततिः । सन्ततिर्हि मातृ रक्षणं यदि करोति तदैव माता सन्ततये दीर्घकालपर्यन्तं सर्वविधपदार्थान् अर्पयितुं समर्था भविष्यति । अतएव वैदिकेभ्यः ऋषिभ्यः प्रेरणा ग्राह्या अस्माभिः, रामायणमहाभारतपुराणादीनि किञ्च समग्रं संस्कृतसाहित्यमेव पठनीयानि, यैरेवास्या समस्यायाः समाधानं प्राप्नुयाम ।

संस्कृतं विश्वसभ्यता संस्कृतिश्च

श्रीजीवानन्दझा

सभ्यायां साधुः सभ्यः तस्य सम्यगाचरणादिकं सभ्यता शब्देन व्यवह्रियते । अत एव वैदिके आशीर्वादात्मके मन्त्रे सभेयो युवास्य यजमानस्य वीरो जायताम् इत्याशंसा विहिता । गुरुवर्येण रवीन्द्रनाथठक्कुरेण मानवस्य अवस्थात्रयं प्रतिपादितम्—तच्च प्राकृतिकं नैतिकम् आध्यात्मिकञ्च । तत्र प्राकृतिकावस्थायाम् आधिभौतिकक्षेत्रे मानवः इन्द्रियसम्बन्धिसुखलाभाय ज्ञान-विज्ञानमाध्यमेन पाञ्चभौतिकपदार्थानामधिकाधिकोपयोगिस्वरूपं परिज्ञाय आत्मानं बहु मन्यते । अत्र च परमाणुशक्तेराविष्कारोऽधुना सर्वोत्कृष्टा उन्नतिः परिगण्यते । अष्टादशविद्यास्थानानां नितरामभ्यासेन नीतिशास्त्रमाध्यमेन च मानवः नैतिकमूल्यं प्राप्नोति । आत्मगुणानां शीलानामभिवृद्धिः सामाजिकसंविधाने धर्मव्यवहारेण सम्पाद्यते । अनेनैव परोपकाराय सतां विभूतयः, वसुधैव कुटुम्बकम्, आदानं हि विसर्गाय, परोपकारः पुण्याय, एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये इत्यादयः शिष्टाचारस्य प्रकाशस्तम्भाः सनातनाः सन्ति । आध्यात्मिकक्षेत्रे योगस्य दर्शनस्य च महिमा वर्त्तते । योगदर्शनाभ्यामात्मनः परमात्मनश्च ज्ञानेन अनुभूत्या च परमानन्दो लभ्यते । समाधिः ब्रह्मनिष्ठता च आत्मनः विकासो वर्त्तते ।

एवं च निरवधिकालं मानवो ज्ञानेन दर्शनेन रसवृत्या धर्मभावेन च अत्यधिकानन्दस्य प्राप्तये यत्नं करिष्यति । प्रकरणमिदमधिकृत्य मानव अध्यात्मवृत्तेः सौन्दर्यभावनायाः नैतिकमूल्यस्य च नित्यमेव सम्वर्द्धनं कृतवान् करिष्यति च । इयमेव सवर्द्धनप्रकिया मानवसंस्कृतिरित्याख्यायते । संस्कृतिर्हि मानवजीवनस्य कला, मानवव्यक्तित्वस्य विकसनमेवास्ति । यजुर्वेदे संस्कृतिशब्दस्य प्रयोगः विहितः अस्ति "सा संस्कृतिर्विश्वधारा", ऐतरेयब्राह्मणेऽपि आत्मसंस्कृतिर्वाविशिल्पानि एतैर्यजमान आत्मानं संस्कुरुते । संस्कृतेरुपकरणानि तावत् । प्राकृतिक-राजनैतिकदशाः महापुरुषाणां कर्तृत्वम्, स्वाभाविकप्रवृत्तयश्च भवन्ति । सांस्कृतिकप्रवृत्तयः प्रधानतः प्रकृतिप्रदत्तसाधनैः निरूप्यन्ते । मानवस्तु प्रकृतिप्रदत्तसाधनैः जीवनं धारयति । मानवः प्रथमं प्रकृतेः औदार्यस्य सहिष्णुतायाश्च शिक्षां गृह्णाति । प्राकृतिकसाधनानुरूपं हि भारतस्य सांस्कृतिकं सामाजिकं राजनैतिकञ्च ऐक्यं विकसितम् । सांस्कृतिकविकासे राजनैतिकस्थितीनां प्रभावः संलक्षितो भवति । "यथा राजा तथा प्रजाः" इति सिद्धान्तानुसारं राज्ञो गुणाः प्रजासु प्रतिबिम्बिताः अभूवन् । भारतस्येतिहासे प्रतियुगं राजनैतिकस्थितीनां सांस्कृतिकसंघटनविघटनयोरुपरि प्रभावः प्रसिद्ध एव । उपलशकलमेकं भेदकं गोमयानामिति चाणक्य-वसतेर्वर्णनेन तदानीन्तनसंस्कृतेः सौष्ठवं परिलक्ष्यते । कस्यापि देशस्य संस्कृतिमार्गे तत्रत्य निवासिनां स्वाभाविकप्रवृत्तीनां प्रभावो दृश्यते । यथा भारतवासिनः स्वभावतः दार्शनिकाः भवन्ति । भारतीयसंस्कृतेः निर्माणं वनवासिभिः मुनिभिः

विहितम् । तेषां मुनीनां कुटीराः भारतीय संस्कृतेः आश्रयत्वेन तिष्ठन्ति । तत्रैव राजापि समागत्य नतमस्तकोऽभवत् ऋषिपथं च स्वीचकार । तेषामेव आदर्शान् समीकर्तुं सर्वे समीहन्ते । यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा तत्तदेवाभिमन्तव्यं मत्तेजोंशसम्भवमिति गीतोक्तेः ईश्वरवत् राजा प्रजाभिः समादृतः । महाकविकालिदासप्रणीते रघुवंशमहाकाव्ये राज्ञः दिलीपस्य वर्णनप्रसङ्गे– प्रजानां विनयाधानाद्रक्षणाद् भरणादपि एतेषां प्रजाजनानां पिता आसीत् इति । एवं स्वभावत एव भारतीयाः देवपराः भवन्ति । सर्वं खल्विदं ब्रह्म इति महावाक्यं जगतः दिव्यतां निदर्शयति । आचार्यदेवो भव, अतिथिदेवो भव, मातृदेवो भव, पितृदेवो भव, गोब्राह्मणहितकरो भवेत्यादयो भारतीयसंस्कृतेः उद्घोषाः । उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः । इति अतिथिपूजायाः उत्कृष्टतया भारतीयसंस्कृतेः गौरवम् । सांस्कृतिकप्रवृत्तिषु ज्ञानेन्द्रियैः अनूभूतानि तत्त्वानि उत्कृष्टानि न मतानि यथा योगिदृष्टिभिः परिगृहीतानि अध्यात्मतत्त्वानि । इत्थञ्च अध्यात्मसुखं सर्वोच्चमिति विशिष्टाशयः । देवपरायणता समर्पणभावो वा भारतीयसंस्कृतेः विशिष्टं तत्त्वम् । यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।

देवादान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥

इति गीता प्रतिपादितां सरणिं कालिदासोऽप्यनु करोति ।

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददाना छायेव तां भूपतिरन्वगच्छत् ॥

सम्पूर्णसमर्पणभक्तेः निदर्शनमेतत् । ईश्वराज्ञामिव गुरोराज्ञापालनं सभ्यता । यथा आरुणिनः गुरुभक्ते-रुत्कर्षः समुत्थापितः । गुरोःवशिष्ठस्याज्ञया नन्दिनीं पालयन् राजा दिलीपः नन्दिनीरक्षणार्थं स्वकीयशरीरसमर्पण-मपि विहितवान् । कस्यापि मानवस्य समाजस्य वा तान् गुणानधिकृत्य सभ्यता जायते यैः ते समाजस्य संघटनं कुर्वन्ति परस्परं सम्बर्द्धयन्ति सौहार्दं सहिष्णुतां च प्रदर्शयन्ति । इत्थं च सभ्यतापदेन मानवस्य सर्वोच्चगुणाः सामस्त्येन व्यक्ताः भवन्ति । संस्कृतिस्तु कस्मिंश्चिदपि वस्तुनि सर्वोच्चयोग्यताया आधानमेव सङ्क्षेपेण भवति, मानवीयसंस्कृत्या मानवव्यक्तित्वस्य विकासः परिलक्ष्यते कल्याणकारित्वं च संस्कृतेः सभ्यतया सञ्जायते । कोऽपि वैद्यः प्राप्तविद्यः संस्कृतोऽपि यदि रोगिणामार्थिकशोषणं करोति तर्हि स वैद्यः सभ्यः न वाच्यः भवति । व्यक्तित्वस्य विकसनमेव संस्कृतिः । संस्कृतेः समारम्भो भारतदेशे प्रथमं संस्कारेभ्यो भवति । संस्कारेणैव शिशौ मानवताया प्रथमोद्बोधो भवति । गर्भाधानात् प्रभृति मरणपर्यन्तं संस्कारविधिना पुरुषस्य शरीरतः मनसश्च शुद्धिर्भवति । तत्समक्षं च भाविजीवनस्य उत्थानमयी परम्परा आविष्कृता भवति । व्यक्तित्वस्य विकासाय तत्सम्बन्धितत्त्वानुशीलनम् उपदेशश्रवणं गुरुजनानां वैदिकमन्त्रैः शुभाशंसनम् अवश्यमेव सत्प्रभावमुत्पादयन्ति । यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इति महतां विदुषां सामाजिकानां मुनिवृत्तीनां नैतिकमादर्शमनुर्कुवन्ति जनाः, अतो यदि नेतारः आदर्शमुपस्थापयन्ति तर्हि तद्देशीया जनाः तदीयमादर्शमनुकुर्वन्ति, यदि नेतारः भ्रष्टा भवन्ति तत्रत्या जना अधिकांशतः भ्रष्टा एव भवन्ति ।

फिलीस्तीननामके देशे महात्मनः ईशामहोदयस्य जन्म अभूत्तस्य शैलोपदेशे संस्कृतस्य प्रभावः दृष्टिगोचरतामञ्चति यथा तदुपदेशेषु दयालुता प्रशंसिता, विशुद्धान्तःकरणः ईश्वरं साक्षात्कर्तुं शक्नोति इत्यादीनि उपदेशवाक्यानि संस्कृतेन प्रभावितान्येव विराजन्ते । इस्लामधर्मे इस्लामसंस्कृतौ च संस्कृतस्य प्रभावः द्रष्टुं शक्यते यथा उपवासः भ्रातृत्वं परमेश्वरस्य सर्वोत्कृष्टत्वेन ख्यापनम्, दरिद्रेभ्यो दानम्, इन्द्रियनिग्रहः परोपकारभावना तेषु च सर्वेषु संस्कृतस्य प्रभावः प्रदर्शितो भवति एकेन मुस्लिमबन्धुना गायत्रीफरहा मंत्रयोः स्फुटं साम्यं प्रदर्शितम् । चीनदेशीयसंस्कृतिस्तु बहोः कालात् भारतीयसंस्कृतिमनुकरोति । मलेशियादेशीया संस्कृतिः जापानदेशीया संस्कृतिः संस्कृतेन प्रभावितास्ति । चीनदेशे बौद्धधर्मः, इस्लामधर्मः, कन्फ्युसियसधर्मः ताओधर्मश्चेति प्रधानतः चत्वारः धर्माः प्रतिष्ठिताः । तत्र तेषु- तेषु धर्मेषु, दया, परोपकारः, सन्तोषः, वाक्संयमः इन्द्रियजयः सर्वे एव संस्कृतस्य संस्कृतशास्त्रस्य उद्गारभूताः । अमेरिकादेशीया संस्कृतिः भ्रष्टाचरणं नाङ्गीकरोति । रूसदेशीया संस्कृतिरपि मूलतः भारतीयसंस्कृतेरविरोधिनी । अतः इदं निश्चप्रचं यत् विश्वसभ्यतासंस्कृत्योः संस्कृतस्य प्रभावः अस्ति । अत एव च संस्कृतस्य संस्कृतेराधारभूतत्वाद् भारतदेशो विश्वगुरुत्वेन सम्मानितः ।

पुराणसाहित्ये मेघो जलञ्च

डॉ० मञ्जुलादेवी

मेघो जलञ्च इति विषयमधिकृत्य बहुधा विवेचितं पुराणसाहित्ये। मेघवर्णनावसरे प्रथमं पृथिव्याः वायुमण्डलस्य चर्चा विधेया। भूगोलशास्त्रे पृथिव्याः वायुमण्डलमिति यदुच्यते तस्य वायुमण्डलस्य सप्त आवरणानि इति ब्रह्माण्डपुराणे प्रकाशितम्। तत्रोक्तं यथा—'सप्तस्कन्धास्तथा वायोः सन्तीतिसदना द्विजाः' इति।[१] शिवपुराणेऽपि पठ्यते—'वायव्याः शतशस्तत्र सप्तस्कन्धेषु वै तथा' इति।[२] स्कन्दपुराणे कीर्तितानि वायुमण्डलावरणानि सन्ति—प्रवहः, संवहः, विवहः, उदावहः परावहः परिवहश्चेति।[३] मत्स्यपुराणे त्वेतानि—आवहः, प्रवहः, विवहः, उदावहः, परावहः, संवहः, परिवहश्चेति नामभिः प्रोक्तानि।[४] वायोरेतानि सप्तावरणानि पृथिवीं समन्तात्तिर्यगूर्ध्वावृतां कुर्वन्तीति इति विगीतं तत्र ब्रह्माण्डपुराणे —

बाह्यतो घनतेजश्च तिर्यगूर्ध्वं तु मण्डलम्।
समन्ताद् धनवातेन धार्यमाणं प्रतिष्ठितम्॥[५] **इति**

आधुनिकभूगोलशास्त्रज्ञाश्च पृथिव्या उपरि वायोः सप्त आवरणानि मन्वते। प्रथमं ट्रापेस्फियर् (Troposphere) नामकम् आवरणम्। मेघमहावातझंझावातविद्युत्प्रभृतीनामुत्पत्तिस्थलं तावत् ट्रोपोस्फियर् नामकम् आवरणम्। अस्यावरणस्योपरितनमावरणं त्रपोपंज (Tropopanse) इति। तस्योपरि स्ट्रेटस्फियर् (Stratosphere) इति आस्तरणम्। अस्मिन् स्तरे जलीयबाष्पमेघमहावातादीनामुत्पत्तिर्न जायते। तस्योपरि ओजनोस्फियर् (Ozonosphere) इति मण्डलम्। सर्वेषामुपरि च आयणोस्फियर् (Ionosphere) इति नामकम् आवरणं विद्यते। आवरणमेतत् पुनस्त्रिधा विभज्यते। एवं सर्वथा वायुमण्डले सप्त आवरणानि इति भूगोलशास्त्रविदः तर्कयन्ति। पुराणेष्वपि वायुमण्डलस्य सप्त आवरणानि सम्यगुपलभ्यन्ते येषां नामानि पूर्वमेवोल्लिखितानि सन्ति। पुराणेषु यत् प्रथमं प्रवहाख्यमावरणमुक्तमस्ति तदेवाधुनिकविज्ञानविदां ट्रोपोस्फियर् इति

१. ब्रह्माण्डपुराणम्, १.२.१९.१७१
२. शिवपुराणम्, ४.५.१५
३. स्कन्दपुराणम्, १.२.३८.४२-६०
४. मत्स्यपुराणम्, १६३.३२,३३
५. ब्रह्माण्डपुराणम्, १.२.२१.२६,२७

मण्डलम्। यतः प्रवहाख्ये स्तरे मेघोत्पत्तिर्जायते इत्युच्यते पुराणेषु। आधुनिकभूगोलशास्त्रविदां मतानुसारं भूभागतः अष्टार्धक्रोशपरिमितं परिसरं व्याप्य तिष्ठति स्तरोऽयं पृथिव्याः वायुमण्डलस्य। अस्मिन्नेव मण्डले मेघोत्पत्तिर्जायते। पुराणोक्तवर्णनानुसारम् अत्रैव प्रवहाख्ये मण्डले भूपृष्ठतः परिव्यापृते मेघा इतस्ततः परिभ्रमन्ति। अतो मण्डलमिदं मेघमण्डलमिति ज्ञायते। स्कन्दपुराणोक्तवचनं तथा —

पृथिवीं समभिक्रम्य संस्थितो मेघमण्डले।
प्रवहो नाम यो मेघान् प्रवहत्यतिशक्तिमान्॥[१]

इति पुराणेषु त्रिविधाः मेघाः उदीरिताः सन्ति। यथोक्तं ब्रह्माण्डपुराणे —

मेघानां पुनरुत्पत्तिस्त्रिविधा योनिरुच्यते।
आग्नेया ब्रह्मजाश्चैव पक्षजाश्च पृथग्विधाः॥

विधा मेघाः समाख्याताः ..... ।[२] इति।

तत्र प्रथममाग्नेयो नाम मेघविशेषः। ब्रह्माण्डपुराणे उक्तमस्ति यत् एते मेघाः उष्णजाः अर्थात् तापसम्भवाः, तेभ्यो मेघेभ्यो धूमाः निष्क्रमन्त इव परिलक्ष्यन्ते। एते मेघाः महाकायाः विद्युद्गुणविहीनाश्च जायन्ते।

उक्तं हि तत्र ब्रह्माण्डपुराणे —

आग्नेयास्तूष्णजाः प्रोक्तास्तेषां धूम्रप्रवर्तनम्।
विद्युद्गुणविहीनाश्च जलधारा विलम्बिनः।

मूकमेघा महाकाया आवहस्य वशानुगाः॥[३] इति।

भूगोलविद्यायामपि Cumulus इत्याख्यस्य मेघस्य वर्णनं विद्यते। Cumulus इत्यनेन पदेन स्तूपीकृतमेघराशिर्बुध्यते। पृथिव्याः कश्चन भूभागः कदाचित् केनचिद् हेतुनाऽत्युष्णो जायते। तत्सम्पर्कितो वायुरपि तदा तथावोष्णीभवति चोर्ध्वं चलति। ततश्च वायोः जलीयबाष्पभागानां घनीभवनेन मेघराशेः उपागमो भवति। एतेषां मेघानामायतनं बृहत् जायते तथा च स्तूपीकृतोर्णराशिरिव लक्ष्यते। बाष्पयन्त्राद् यथा बाष्पोद्गिरणं भवति तादृशवमलोक्यन्ते एते मेघाः। एवं पुराणेषु वर्णिताः आग्नेयमेघाः Cumulus मेघेभ्यः नान्याः विद्यन्ते, उभयत्रैव वर्णनयोरैकविध्यं परिलक्ष्यते।

द्वितीयाः ब्रह्मजमेघविशेषा सन्ति। अतीव वर्षणशीलाः एते मेघाः। ब्रह्माण्डपुराणेऽधिगम्यते—'ब्रह्मजाः नाम ते मेघाः ब्रह्मनिश्वाससम्भवाः। ते हि विद्युद्गुणोपेतास्तनयित्नुप्रियस्वनाः' ॥[४] इति मेघोऽन्योऽपि भवति।

१. स्कन्दपुराणम्, १.२.३८.५३
२. पूर्वोक्तग्रन्थः, १.२.२.३०, ३१
३. तत्रैव, १.२.२२.३१-३४
४. तत्रैव, १.२.२.३७

पुष्करावर्तको मेघ एव पक्षजमेघ इत्युच्यते । उक्तञ्च ब्रह्माण्डपुराणे—'पुष्करावर्तका नाम ते मेघा: पक्षसम्भवा:'[१] इति । एतेषां मेघानां पुष्करावर्तक इति संज्ञा किमर्थं भवति इत्यस्मिन् प्रसंगे ब्रह्माण्डपुराणे पठ्यतेऽस्माभि: —

पुष्करा नाम ते मेघाः बृहंतस्तोयमत्सराः ।
पुष्करावर्तकास्तेन कारणेनेह शब्दिताः ।।[२] इति ।

एतेन ते मेघा: भृशं वर्षणशीला: इति ज्ञायते । उक्तञ्च तत्रैव पुराणे पुष्करावर्तकमेघवर्णनावसरे —

नानारूपधराश्चैव महाघोरस्वनाश्च ते ।
कल्पान्तवृष्टेः स्रष्टारः संवर्तकाग्नेर्नियामकाः ।।[३] इति ।

एवं ब्रह्मजाश्च पुष्करावर्तकाश्च मेघा: भृशं वर्षन्ति इति ज्ञायते । भूगोलविद्यायायां निम्बस् (Nimbus) ष्ट्रेटस् (Stratus) च इत्यभिधेया: येऽतिवृष्टिप्रदा: मेघा: सन्ति तेषां वर्णनेन एतन् निर्णेतुं शक्यते यद् एते मेघा: ब्रह्मजपुष्करावर्तकमेघेभ्यो भिन्ना: न सन्ति । निम्बस्मेघा: कृष्णा: अतिवृष्टिकारका: मेघा: भवन्ति । ष्ट्रेटस्मेघा अपि नीलवर्णा अपि वा धूसरवर्णा: विद्यन्ते । यत् नीलवर्णा: मेघा अतिमात्रं वर्षन्ति इत्येतदुदीर्यते स्कन्दपुराणे यथा—

धूमजाश्चोष्मजा मेघाः सामुद्रैर्ये न पूरिताः ।
नीलाङ्गा तोयैर्भवन्ति वर्षिष्ठाश्चैव भारत ।।[४] इति

मेघैर्वायोरवरोधे जाते वृष्टि: समुत्पद्यते इति भौगोलिकी धारणा पुराणेषु निहिताऽस्ति । तत्र तु ब्रह्माण्डपुराणे वृष्टिकारणमेवं लक्ष्यते —

'मेघा वायुविघातेन विसृजन्ति जलं भूवि ।'[५] इति ।

मेघशब्दस्य व्युत्पत्तिवर्णनप्रसङ्गेऽपि पठ्यतेऽस्माभि: ब्रह्माण्डपुराणे यथा —

'मेहनाच्च मिहेर्धातोर्मेघत्वं व्यंजयंति हि ।'[६] इति ।

'मिहेर्धातोरर्थस्तावद् मेहनम् जलवर्षणम् ।' इति ।

केचन मेघा: वृष्टिप्रदानं न कुर्वन्ति । ते मेघा: अभ्रनामका: विद्यन्ते । एतेभ्यो मेघेभ्य आपो न भ्रश्यन्ति । अतएवैतेषां मेघानाम् अभ्र: इति संज्ञा जायते । प्रसङ्गेऽस्मिन् ब्रह्माण्डपुराणोक्तवचनं यथा—'न भ्रश्यन्ति यतश्चापस्तदभ्रं कवयो विदु:'[७] इति ।

१. तत्रैव,१.२.२२.८०
२. तत्रैव,१.२.२२.४२
३. तत्रैव,१.२.२२.४३
४. स्कन्दपुराणम्,१.२.३८.४८
५. ब्रह्माण्डपुराणम्,१.२.२२.१६
६. तत्रैव,१.२.२२.३५
७. तत्रैव

भूगोलविद्यायामपि चाइरास् (cirrus) इत्याख्या मेघा: वर्ण्यन्ते । ते मेघा: स्वल्पपरिमाणजलीयबाष्पयुक्तत्वाद् वर्षणपरा: न जायन्ते ।

वृष्टे: प्रकारविशेषा अपि भूगोलशास्त्रे वर्णिता: सन्ति । शैलोत्क्षेपो (orographical) वृष्टिपात इति यदुच्यते तत्र कारणं प्रदर्शितं यत् यदा आर्द्रबाष्पनिचयस्य कश्चित् पर्वतो बाधको जायते तदा तस्य बाष्पनिचयस्य उद्गतिर्भवति । तत्र बाष्पनिचयस्य उद्गमनेन शीतलीभवनात् घनीभवनाच्च बाष्पनिचय: वृष्टिपातरूपेण पर्वताग्रे निपतति । एवंविधाया वृष्टेरुल्लेखोऽस्ति ब्रह्माण्डपुराणे । तत्रोच्यते—'पर्वताग्रनितम्बेषु वर्षन्ति च रमन्ति च ।'[१] आग्नेयमेघा: पर्वताग्रनितम्बेषु वर्षन्ति इति कथ्यते । तत्र कारणं तु पर्वतैरवरोध एव ज्ञातव्य: । एवं मलयपर्वते अवरूद्धा: मेधा: भृशं वर्षन्ति इति पद्मपुराणे प्रोक्तमस्ति । तद्यथा —

प्रागायतो महाभागो मलयो नाम पर्वत: ।
ततो मेघा: प्रवर्तन्ते प्रवर्षन्ति च सर्वश: ।[२] इति

परिचलनो (convectional) नामापि वृष्टिपातो वृष्टे: प्रकारविशेषोऽस्ति: । वृष्टिरेषा मेघगर्जनैर्विद्युद्भि: सह ग्रीष्मकाले सम्पद्यते । पुराणेष्वपि वर्ण्यते यदभ्रब्रह्मजपुष्करावर्तकमेघसम्पर्कात् धारासारो वृष्टिपातो जायते । ते मेघा: विद्युद्गुणोपेता: महाघोरस्वनाश्च भवन्ति इति पूर्वमेवालोचित विद्यते ।[३]

पुराणेषु तुषारवृष्टेरपि उल्लेखनमस्ति । वायुमण्डलस्थानां जलीयबाष्पाणां यदा घनीभवनं जायते तदा यदि तन्मण्डलमतीव शीतं विद्यते अर्थात् उष्णताया अतिमात्रं ह्रासो भवति तदा जलीयबाष्पस्था: आर्द्रभागा: हिमाकारेण शिलीभवन्ति । भूपृष्ठस्य तापमात्रा यदि द्वाविंशद् डिग्री फारेनहाइट् इत्यस्य परिमाणस्य अधोगामिनी वर्तते तदा हि केवलम् एते हिमखण्डा: हिमपातरूपेण भूमौ पतन्ति । उल्लिखिता परिमितिस्तु हिमाङ्को भवति । अन्यथा हिमसम्भवा वृष्टिरेव सम्भवति । ब्रह्माण्डपुराणे उक्तमस्ति यत् हिमवत: उत्तरदिग्वर्तिनि पौण्ड्रनगरे या वृष्टिर्भवति सा तुषारमूला । यथा हि —

उदग्हिभवत: शैल उत्तरप्रायदक्षिणे ।

पुंड्रं नाम समाख्यातं नगरं तत्र विस्तृतम् ।
तस्मिन्निपतितं वर्षं तत्तुषारसमुद्भवम् ।।[४] इति

एतद्विषयकं तथ्यं मत्स्युपराणे[५] वायुपुराणे[६] च समायुतमस्ति । ब्रह्माण्डपुराणादपि अधिगम्यते —

---

१. तत्रैव, १.२.२२.२१
२. पद्मपुराणम्, १.३.१४
३. पूर्वोल्लिखिता टीका द्रष्टव्या, १, १२
४. ब्रह्माण्डपुराणम्, १.२.२२.५३, ४८
५. मत्स्यपुराणम्, १२५.२३-२५
६. वायुपुराणम्, १.५१.४८, ४१

पर्जन्यो दिग्गजाश्च हेमन्ते शीतसम्भवाः ।
तुषारवृष्टिं वर्षन्ति शि;ष्टाः श ास्यप्रवृद्धये ।।[१]

भूगोलशास्त्रे या अधःक्षेपणप्रक्रिया (Precipitation) वर्णिता विद्यते । तस्याः प्रक्रियाया एव प्रकारविशेषः एते— वृष्टिपातः, हिमपातः इत्यादयः । जलीयवाष्पस्थानाम् आर्द्रभागानां वृष्टिपात-हिमपात-शिला-वृष्टिपातरूपैः भुवि पतनमेव अधःक्षेपणमिति ज्ञायते ।

घनीभवनवाष्पीभवनप्रक्रिययोरपि सम्यगालोचनं विधीयते पुराणसाहित्ये । जलीयवाष्पानां यदा जले रूपान्तरं भवति सैव घनीभवनप्रक्रियेति (Condensation) ज्ञातव्या । घनीभवनप्रक्रियायाः अवस्थान्तरेषु एव मेघवृष्टितुषारनीहारप्रभृतीनामुत्पत्तिर्जायते । अन्यथा तु जलानां जलीयवाष्परूपताप्राप्तिरेव वाष्पीभवनम् (Evaporation) वाष्पीभवनप्रक्रिया घनीभवनप्रक्रियायाः विपर्यासोऽस्ति । तडागनदीसागरादिजलानां जलीयबाष्परूपेणोद्गमनं भवति सूर्यरश्मिना । अतएव सूर्यः वारितस्कर इति कथ्यते ब्रह्माण्डपुराणे । [२] अपि चोपलभ्यते—सवनात्तेजसोऽपां च तेनासौ सविता मतः ।[३] तत्रैव पुनरुच्यते —

सूर्यः किरणजालेन वायुयुक्तेन सर्वशः ।
जगतो जलमादत्ते कृत्स्नस्य द्विजसत्तमाः ।।[४] इति

पाठेऽस्मिन् कृत्स्नस्य जगतः जलमादत्ते सूर्यः इति कथनेन न केवलं नदीसागरादीनामेव जलाकर्षणं सूच्यते परन्तु सूर्यः समग्रस्यैव जगतो जलमादत्ते इति बुध्यते । तदनन्तरं वायुना परिचालिताः सन्तः सूर्यरश्मयस्ता आपः ऊर्ध्वं वहन्ति इति स्पष्टं कीर्त्यते तत्र —

तेजोऽर्कः सर्वभूतेभ्य आदत्ते रश्मिभिर्जलम् ।
समुद्राद्वायुसंयोगाद् वहन्त्यापो गभस्तयः ।।[५]

सूर्यरश्मिना ऊर्ध्वं चालितानि जलीयबाष्पाणि एव वृष्टिरूपेण भूमौ निपतन्ति । अतएव कीर्त्यते अग्निपुराणे —

हिमोष्णवारिवर्षाणां कारणं भगवान् रविः ।[६]

ब्रह्माण्डपुराणोक्तवचनमपि उल्लेखार्हं विद्यते प्रसङ्गेऽस्मिन् —

---

१. ब्रह्माण्डपुराणम्, १.२.२२.४९
२. जगत्प्रतापनमृते भास्करे वारितस्करम् ।
३. तत्रैव, १.२.२४.७६
४. तत्रैव, १.२.२१.१४
५. तत्रैव, १.२.२२.२४,२५
६. अग्निपुराणम्, १ २०.३२

सूर्य एव तु वृष्टीनां स्रष्टा समुपदिश्यते।
सूर्यमूला च वै वृष्टिर्जलं सूर्यात् प्रवर्तते ॥[१] इति

एवं जलीयबाष्परूपेण भूभागजलानामुद्गमनं ततश्च मेघे निचितानां तेषां जलीयबाष्पाणां भुवि पतनं सैषा या जलविज्ञानस्याविच्छिन्ना धारा प्रवहमाणा विद्यते सैव भूगोलशास्त्रे Hydraulic cycle इति ज्ञायते। पुराणेष्वपि तथ्यमेतत् सूक्ष्मं निरीक्षितं विद्यते। ब्रह्माण्डपुराणोक्तवचनं यथा —

एवमुत्क्षिप्यते चैव पतने चासकृज्जलम्।
न नाश उदकस्यास्ति तदेव परिवर्तते।
संधारणार्थं लोकानां मायैषा विश्वनिर्मिता ॥[२] इति

एवं पुराणकाले भारतवर्षे एवैतासां भौगोलिकधारणानां सम्यग् बोधनमासीदिति सुष्ठु परिलक्ष्यते। वर्तमानकाले भूगोलशास्त्रस्य यानि तथ्यानि निरूपितानि सन्ति तानि पुराणेषु उपलभ्यन्ते। एतदर्थमेतन् निर्णेतुं शक्यते यद् भूगोलशास्त्रस्य आधारग्रन्थरूपेण अस्ति पुराणानां महानुपयोगः।

---

१. ब्रह्माण्डपुराणम्, १.२.२२.५७,५८

२. तत्रैव, १.२.२२.१६,१७

पर्यावरणदृष्ट्या संस्कृतवाङ्मयसमीक्षणम्

प्रो. जयप्रकाशनारायणद्विवेदी

पर्याङिति उपसर्गद्वयपूर्वक वृञ् धातोः ल्युट्प्रत्यये कृते पर्यावरणशब्दो निष्पद्यते। परितः आवरणं पर्यावरणम्। यद्यपि वस्तु किमपि कस्यापि आवरणम्भवितुमर्हति तथापि सर्वस्यास्य जगतः स्थावरजङ्गमात्मकस्यावरकत्वात् जलवाय्वाकाशादयः सामान्यतया पर्यावरणशब्देन बोध्यन्ते। समग्रापि पृथिवी जलेन त्रिगुणेनावृतास्ति। तज्जलमपि ततोऽपि त्रिगुणेन वायुनावृतं वर्तते। वायुश्चापि आकाशेनावृतः अस्ति। त्रिभिरप्येभिरावृतस्यास्माकं जगतः जीवनमेवैतेषु त्रिष्वाश्रितमस्ति। यावदेतेषां शुद्धत्वं निर्दोषत्वञ्च भविष्यति तावदस्माकं वैयक्तिकं, सामाजिकं जागतिकं वा जीवनमपि शुद्धं निर्दोषमथ च स्वस्थं भविष्यति। परन्तु किम्भवत्यद्यत्वे? औद्योगिकयान्त्रिकविकासेन यथैते दूष्यन्ते तन्न तिरोहितं कस्यचिदपि। महानगरेषु नगरेषु च पानार्थं जलं, श्वसनार्थं प्राणवायुश्चापि शुद्धरूपेण नोपलभ्यते। यदा जीवनमेवास्माकं दूषणेनानेन बाध्यते, तर्हि का कथान्येषां योगानाम्? अतः समस्यायाः अस्याः निराकरणमस्माकं प्राथमिक्यावश्यकतास्ति।

संस्कृतसाहित्ये किमस्त्यमुमधिकृत्यविषयम्? इति विचार्यमाणे तु वर्णनप्रधाने संस्कृतसाहित्ये वनोपवनपर्वतजलाशयादिनैसर्गिकानां वस्तूनां वर्णनं प्राचुर्येणोपलभ्यते। यदद्यत्वे कल्पयितुमप्यशक्यं तादृशस्यनिर्मलस्य जलस्य वायोश्चोपभोगः तदानीं क्रियते स्मेति निरीक्ष्यताम् द्वित्रैः श्लोकैः —

इत्थं शरत् स्वच्छजलं पद्माकरसुगन्धिना।

न्यविशद् वायुना वातं सगोगोपालकोऽच्युतः॥ — श्रीमद्भागवतमहापुराणे

न तज्जलं यत्र सुचारुपङ्कजं,

न पङ्कजं तद् यदलीनषट्पदम्।

न षट्पदोऽसौ न जुगुञ्ज यः कलं

न गुञ्जितं तन्न जहार यन्मनः॥

श्रीमद्भागवते वृन्दावनस्य निवासार्हत्वं प्रतिपादयन् श्रीकृष्णः तस्य भर्यम्बुतृणवीरूधत्वं वर्णयति। एतदतिरिक्तं सिद्धसरस्वतीस्तोत्रे सर्वेषां स्वच्छतायाः, सूर्यचन्द्राग्निप्रभृतीनाञ्च वर्णनं पर्यावरणशुद्धिमहत्त्वं प्रति सङ्केतयति। यथा —

स्वच्छव्रतः स्वच्छचरित्रचञ्चुः स्वच्छान्तरः स्वच्छसमासतवृत्तिः ।

स्वच्छं भवत्याः प्रपदं प्रपन्नः स्वच्छे त्वयि ब्रह्मणि जातु यातु ॥

रवीन्दुवह्निद्युतिकाटिदीप्रं..... वारिवाहम् ॥[१] पर्यावरणं प्रति निष्ठा अनेनैव चिन्तनेन ज्ञातुं शक्यते यद् भगवत्याः भारत्याः सम्पूर्णं रूपमेव शुभ्रं विद्यते —

शुभ्रां शुभ्रसरोजवदनां ...... श्रीभारतीं भावये ।[२]

किं बहुना अवतीर्य भगवान् रामः श्रीकृष्णश्च नगरं विहाय दण्डकारण्यं वृन्दावनञ्च निवासार्थमङ्गीकृतवन्तौ । किमतः परं वक्तव्यं भवति वनस्य माहात्म्यं संस्कृतसाहित्ये हरितवृक्षच्छेदने महत् पापं निर्दिष्टमस्ति —

वृक्षांश्छित्वा पशून् हत्वा कृत्वा रुधिरकर्दमम् ।

यद्येनं गम्यते स्वर्गं नरकः केन गम्यते ?

हेमाद्रिसङ्कल्पे परिगणितानां पापानां मध्ये आर्द्रवृक्षच्छेनमपि महत् पापमस्ति । यस्य कृते प्रायश्चित्तमपि विहितमस्ति । महाभारतस्यैकस्मिन्नाख्याने तडागान्तः प्रविश्य हस्तपादादिप्रक्षालंतनं कुर्वन्तं भीष्मं तथाकरणाद् निवारयति तत्पुत्रः बर्बरीकः । तयोर्वार्तालापप्रसङ्गेनेदं सुस्पष्टतया ज्ञायते, यद् तदानीन्तने समये जनाः जलवायुपृथ्व्याकाशसौरमण्डलप्रभृतीनां पूर्णशुद्ध्यर्थं रक्षार्थं वा कीदृशाः सावधानाः आसन् । कविकुलगुरुकालिदासाः यदा ग्रन्थरचनां कुर्वन्ति, तदाग्रन्थारम्भे एव पर्वतदिक्सूर्यचन्द्रसागरऋतुमासरात्रिदिवसादीनां वर्णनं कुर्वन्ति । यथा —

अस्त्युत्तरस्यां दिशि देवतात्मा ...... मानदण्डः ।[३]

कश्चिद् कान्ता ...... रामगिर्याश्रमेषु ।[४]

प्रचण्डसूर्यः ...... प्रिये ।[५]

सूक्ष्मतया विचार्यमाणे पर्यावरणं द्विविधं वक्तुं शक्यते — आभ्यन्तरं बाह्यञ्च । बाह्याभ्यन्तरयोर्मध्ये प्रधानम्भवत्याभ्यन्तरम् । यस्य तात्पर्यमस्ति सनातनवैदिकपरम्परया निर्धारिताः मानवीयजीवनाचारनियमाः । तदनुसारेणाचर्यमाणे सति वाह्याभ्यन्तरीयपर्यावरणसमस्याः एव नह्यायास्यन्ति । यतो हि यद्यस्माभिः पृथिवीगङ्गातुलसीप्रभृतयः मातृरूपेण मन्यन्ते । अश्वत्थः वटवृक्षश्चेत्यादयः सर्वे समाद्रियन्ते मानवैः तर्हि एतेषामुच्छेदनं प्रदूषणं वा कथमपि नहि करिष्यन्ति जनाः । यदि सर्वेषां मनस्सु श्रीमद्भगवद्गीतां प्रति आदरः भविष्यति तर्हि सर्वे गीतावचनपालनं करिष्यन्ति सर्वे च स्वीकरिष्यन्ति यत् —

१. बृहत् स्तोत्ररत्नाकर पृष्ठ - २७१
२. तत्रैव
३. कुमारसम्भवम् १/१
४. तत्रैव
५. ऋतुसंहारम् १/१

अश्वत्थः सर्ववृक्षाणामस्माकमाराध्यः भगवान् श्रीकृष्णचन्द्रोस्ति तथायमेव वासुदेवः स्रोतसां जाह्नवी-रूपेऽपि विराजते। अतः एतदुच्छेनं प्रदूषणकरणञ्च निषिद्धं पापजनकञ्च भविष्यति, एतद् सर्वे चिन्तयिष्यन्ति। अनेनैव प्रकारेण श्रीमद्भगवद्गीतायां सर्वेषां प्राणिनां प्राकृतिकोपादानानाञ्च महत्त्वं वर्णितं दृश्यते। यथा —

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥

तथैव मेरुः शिखरिणामहम्, सरसामस्मि सागरः, स्थावरणां हिमालयः, गन्धर्वाणां चित्ररथः, उच्चैः श्रवसमश्वानामैरावतं गजेन्द्राणां, धेनूनामस्मि कामधुक्, सर्पाणामस्मि वासुकिः, अनन्तश्चास्मि नागानां, वरुणो यादसाहम्, मृगाणाञ्च मृगेन्द्रोऽहं, वैनतेयश्च पक्षिणाम्, पवनः पवतामस्मि, झषाणां मकरश्चास्मि, मासानां मार्ग-शीर्षोऽहम्, ऋतूनां कुसुमाकरः, यच्चापि सर्वभूतानां बीजं तदहमर्जुन ! इति। एतेषु सर्वेषु श्लोकेषु श्लोकखण्डेषु च सर्वत्र गिरिजलाशयगन्धर्वाश्वगजधेनुसर्पमृगपक्षिझषमासऋतुप्रभृतिवस्तुषु अशरणशरणाकारणकरुणकरुणा-वरुणालयानन्दकन्दश्रीकृष्णचन्द्राः क्रमेण मेरुहिमालयसागरचित्ररथोच्चैश्रवसैरावतकामधेनुवासुक्यनन्तमकरमा-र्गशीर्षकुसुमाकरादिरूपे सततं निवसन्ति। न केवलमियदेव प्रत्युत् सर्वभूतेषु बीजरूपे विराजन्ते भगवन्तः इति स्वयं स्वीकुर्वन्ति ते गीतायाः दशमेऽध्याये।

अनेनैव प्रकारेण विद्वन्निकषभूते श्रीमद्भागवतमहापुराणे न केवलं भगवते श्रीकृष्णचन्द्रमयैव महत्त्वं प्रदत्तम् प्रत्युत राष्ट्रस्यास्य उपेक्षितानां प्राणिनामपि महत्तां प्रतिपादयन्तः गुरुणां गुरवः अवधूतदत्तात्रेयाः चतुर्विंश-तिगुरुणामुपस्थापनं कुर्वन्ति; यथा —

पृथिवीवायुराकाशमापोऽग्निश्चन्द्रमारविः।

कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद्गजः॥

मधुहा हरिणो मीनः पिङ्गलाकुररोऽर्भकः।

कुमारीशरकृत्सर्प ऊर्णनाभिः सुपेशकृत्॥

एते मे गुरवो राजन्! चतुर्विंशतिराश्रिताः।

शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः॥[1]

विचारणीयमिदमस्ति यत् भारतीयचिन्तनपरम्परायाः अवधूतगुरवः सर्वान्प्राकृतिकोपादानान् गुरुरूपे स्वीकुर्वन्ति। न केवलं पृथिवीवाय्वाकाशादिभ्य एव प्रत्युत कपोताजगरपतङ्गसिन्धुमधुकृद्गजहरिणमीनपिङ्गलाकु-ररार्भककुमारीसर्पादिभ्यश्चापि महत्त्वं प्रददति। यतोहि सम्प्रति लघुजीवानां वनस्पतीनाञ्च अहर्निशं विनाशः दृश्यते, यद् पर्यावरणदृष्ट्या नोचितम्। अस्माकं सांस्कृतिकसिद्धान्तानुसारेण तु "सर्वे भवन्तु सुखिनः ..... इति भवितव्यम्। संस्कृतवाङ्मये पृथिवीपर्जन्यौ लोकहिताय एवं स्तुतौ, यथा —

१. श्रीमद्भागवतमहापुराणम् ११/७/३३-३५

काले वर्षतु पर्जन्यः पृथिवी शस्यशालिनी।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥

अस्मिन् श्लोके कुत्रापीदं नहि निगदितं यदमुकक्षेत्रेऽमुकायां च जातिनिवासभूमौ पर्जन्यः वर्षतु अन्यत्र न वर्षतु। अमुकक्षेत्रीयजनाः सुखिनः भवन्तु अमुकक्षेत्रीयाः न भवन्तु इत्यपि नोक्तम्, यतोहि भारतीयदृष्टिः व्यापिका विशला चास्ति। अत्र तु पञ्चतन्त्रस्य शृगालसदृशः प्राण्यपि एवं कथयति यत् —

अयं निजः परो वेति गणनालघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

यद्युपर्युक्ताः सर्वेऽधमकोटयस्थजीवाः जडवस्तूनि च गुरुदत्तात्रेयाणां गुरुस्थाने विराजन्ते। एतेषां स्वभावा; कार्याणि च अवधूतं धृतिक्षमाशौचेन्द्रियनिग्रहधीर्विद्यादीनामुपदेशं कुर्वन्ति, तर्हि अस्मदादीनां का कथा? वयं तु न केवलं शिक्षणीयाः एतैः अपितु चतुर्विंशतिः इमे सर्वे अस्मदादीनामादरणीयाः पूज्याः अनुकरणीयाश्च सन्ति। यद्येतादृक् सम्मानमस्ति प्राकृतिकोपादानानामुपेक्षणीयवस्तूनाञ्च श्रीमद्भागवते तर्हि एतदुपेक्षा हत्या च कथमपि विधिसम्मतता भवितुं नहि शक्यते।

किम्बहुना विद्यावतां परीक्षास्थलश्रीमद्भागवतस्य वक्ता एव ऋषिवर्यः श्रीशुकदेवः विद्यते, यत्र गत्वा "वाणी बाणो बभूव ह" एतादृशेन बाणभट्टेन विरचितकादम्बरीगद्यकाव्यस्य वक्ता वैशम्पायननामधारी शुकः एवासीत्। विद्वत्तल्लजाः जानन्ति इदं तथ्यं यद् नलदमयन्त्योर्विवाहोऽपि एकेन हंसपक्षिणैव कारितः। इमे पशुपक्षिणोऽपि पर्यावरणाङ्गरूपाः भवन्ति। गृध्रजटायुः भगवता रामचन्द्रेण दशरथतुल्यः कथितः विनयपत्रिकायाम्। नैषधीयचरिते हंसः करुणरसमुपस्थापयन् यादृशान् श्लोकान् वदति, करुणरसस्यैतादृशाः श्लोकाः सम्पूर्णं संस्कृतवाङ्मयेऽन्यत्र दुर्लभाः सन्ति। यथा —

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेकजनस्तमर्दयन्नहोविधेस्त्वां करुणारुणद्धि नः ॥[१]

अस्माकं देशे यदि हंसाः नीरक्षीरविवेकिनः मन्यन्ते तर्हि मयूरः राष्ट्रपक्षिरूपे विराजते। तीर्थस्थलमानसरोवरोऽपि राजहंसं विना न शोभते —

एकेन राजहंसेन या शोभा सरसोऽभवत्।

न सा वकसहस्रेण परितस्तीरवासिना ॥

अभिज्ञानशाकुन्तलस्य नायिका शकुन्तलापि महर्षिकण्वेन शकुन्तेभ्यः शकुन्तमध्याद्वा एव समानीतासीत्। ग्रन्थेऽस्मिन् न केवलं शकुन्तानामेव वर्णनं वरीवर्ति प्रत्युत मृगरक्षाप्रसङ्गोऽप्यत्र वर्णितः। यथा —

आश्रममृगोऽयं न हन्तव्यः न हन्तव्यः

१. नैषधीयचरितम् १/१४५

महाकविना कालिदासेन पशुमारणकार्यं दारुणमुद्घोषितम्[१] शाकुन्तले ।

संस्कृतकवय; पर्यावरणं प्रति सावधाना: आसन् सन्ति च । अस्माद्धेतो: कालिदासस्य मेघ: दूतरूपे विराजते । यत: मेघं विना वर्षाया: वर्षां विना च जनजीवनस्य कल्पना केन प्रकारेण कर्तुं शक्यते ? कविकुलगुरो; सर्वासु कृतिषु हिमालय:, नद्य: वनानि, पशुपक्षिण:, वनस्पतय:, जलाशया:, सागरा:, सूर्याचन्द्रमसौ अन्यानि च पर्यावरणसम्बन्धीनि सर्वाणि वस्तूनि सम्यग्रूपेण वर्णितानि सन्ति । किन्त्वेतेषां सर्वेषां रक्षा तदैव भविष्यति यदास्माभि: संस्कृतवाङ्मये सन्निरूपिता: सिद्धान्ता:, धर्मनियमा: नीतिवचनानि च पालयिष्यन्ते । यतो हि "पर्यावरणरक्षा" इत्यस्य शब्दस्य तात्पर्यमेतावन्मात्रं नास्ति यत् प्राकृतिकवस्तूनां रक्षा यत्नेन करणीया । प्रत्युत् अवश्यमेव करणीया; यत :—नास्तिमूलमनौषधम्

अर्थात् सर्वं मूलमौषधम् वर्तते । अत: मूलविनाशेन ओषधि: विनंक्ष्यति तथा च यदि ओषधिरेव विनंक्ष्यति तर्हि रोगेभ्य: व्याधिभ्यश्च प्राणिनां रक्षां क: करिष्यति ? ओषधिं विना पृथिव्यां मानवजीवनमेव दुर्भरं भविष्यति । ओषधयश्च पर्यावरणाङ्गरूपे वर्तन्ते । इमा: प्रकृतिप्रदत्ता: भवन्ति । किन्त्वनेन सह धर्मरक्षणमप्यावश्यकं विद्यते । कथितञ्च —

वृत्तं यत्नेन संरक्षेत् वित्तमायाति याति च ।

तथा च

धर्मो रक्षति रक्षित:

शास्त्रेषु भगवता नृसिंहमत्स्यकच्छवराहादिरूपेषु अवतारा: गृहीता: । एतस्य तात्पर्यमिदमस्ति यत् संसारस्य जडचेतनात्मकस्य सर्वेषु वस्तुषु प्राणिषु च प्रत्यक्षाप्रत्यक्षरूपेण भगवान् विराजते । अत: कस्यचिदुपेक्षापमानश्च नहि करणीया । अन्यथा भगवदपमान: भविष्यति ।

ऋग्वेदे पृथिवीद्युप्रभृतिलोकानां तेषाञ्च रक्षणार्थं सावधानोऽस्ति ऋषि: । यदा लोका: सुरक्षिता: भविष्यन्ति तर्हि तत्सम्बद्धं सर्वमपि जीवजातं वस्तुजातं वा सुरक्षितमेव स्थास्यति । अत: ऋषि: कथयति, यत्—

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवीमहीयम् उत्तानयोश्चम्बोर्यो निरन्तरत्रा पितादुहितुर्गर्भमाधात् ॥ — ऋसं. १/१६४/३३

शासद्वह्निर्दुहितुर्नप्त्यं गाद्विदाँ ऋतस्य दीधितिं सपर्यन् ।

पिता यत्र दुहितु: सेकमृंजन्त्संशग्म्येन मनसा दधन्वे ॥ — ऋसं. ३/३१/१

वेदास्तु पर्यावरणदृष्ट्या सृष्टिरक्षणायाद्वितीयसाधनरूपे भगवता ब्रह्मणा प्रदत्ता: मनुवंशावतंसेभ्य: । यत: "अग्निमीले पुरोहितं यज्ञस्य..."[२] अस्मादेव स्थलात् आरभते ऋग्वेदमृषि: । पश्चात्तु सूर्योषश्चन्द्रेन्द्रमरुत्पूष-

१. अभिज्ञानशाकुन्तलम् — अंक -१

२. ऋ.सं.१/१/१

न्वरुणपर्जन्ययमयमीविष्णुप्रजापति-सवितावायु-आदित्यप्रभृतीनामसव्यदेवानामुपासना: दरीदृश्यन्ते, येषामपरं स्वरूपं परवर्तिवैदिकवाङ्मये द्रष्टुं शक्यते । एकस्मिन् मन्त्रे तु उषस् सूर्यपत्नीरूपे स्वीकृतास्ति, यथा —

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।[१]

यजुर्वेदानुसारेण सर्वेषां वस्तूनां माधुर्यमावश्यकम् । अत: प्रार्थयत्यत्र ऋषि:—

मधुवाता ऋतायते मधुक्षरन्ति सिन्धव: । माध्वीर्न: सन्त्वोषधी: मधुनक्तमुतोषसो मधुमत्पार्थिवं रज: । मधुद्यौरस्तु न: पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्य: । माध्वीर्गावो भवन्तु न: ॥[२]

अर्थात् हे प्रभो ! संसारे वायु: मधुर: भवतु, नद्य: मधुरा: भवन्तु, ओषधिरात्रिप्रभातपृथिवीद्यौवनस्पतिसूर्यगावश्च सर्वे माधुर्यसम्पन्ना: भवन्तु । अनेनैव प्रकारेण सर्वेषां सुखार्थमभयार्थं कल्याणार्थञ्च प्रार्थयन्ति ऋषय:—

यतो यत: समीहते ततो नोऽभयं कुरु ।
शं न: कुरु प्रजाभ्योऽभयं न: पशुभ्य: ॥[३]

अभयं न: कत्यन्तरिक्षमभयं द्यावापृथिवी उभे इमे ।
अभयं पश्चादभयं पुरस्तादुत्तरादधरादभयं नो अस्तु ॥

अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो य: ।
अभयं नक्तमभयं दिवा न: सर्वा आशा मम मित्रं भवन्तु ॥[४]

अनेनैव प्रकारेण —

शन्नो मित्र: शं वरुण: शन्नो भवत्यर्यमा ।
शन्न इन्द्रो बृहस्पति: शन्नो विष्णुरुरुक्रम: ॥ ९ ॥

आपो हिष्ठा मयो भुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ १४ ॥

द्यौ: शान्तिरन्तरिक्षं शान्ति: पृथिवी शान्तिराप: शान्तिरोषधय: शान्ति: वनस्पतय: शान्तिर्विश्वेदेवा: शान्ति: ब्रह्मशान्ति: सर्वं शान्ति: शान्तिरेव शान्ति: सा मा शान्तिरेधि ॥ ७ ॥[५]

यदा भारतीयवैदिककर्मकाण्डे पुरोहितेन स्वस्तिवाचनं क्रियते तदा सर्वप्रथमं सर्वेषां कल्याणकामना एव क्रियते । कस्यचिद्राष्ट्रस्य पर्यावरणं तदैव व्यवस्थितं पवित्रं वा भविष्यति यदा राष्ट्रस्य राजा प्रशासक: वा आदर्शगुणसम्पन्न: भवेत् । यत: महाभारते महर्षिवेदव्यासेनेदं निगदितम् —

१. ऋ.सं.
२. यजु. सं.(१३/२७-२९)
३. यजु. ३६/२२
४. अथर्व.— १९/१५/५-६
५. यजु. सं.(३६/९,१४,१७)

कालो वा कारणं राज्ञः राजा वा कालकारणम् ।
इति मे संशयो माभूद्राजा कालस्य कारणम् ॥[१]

अतः वेदे धर्मव्रतधनुर्वेदशक्त्यादीनामावश्यकतायाः वर्णनं करोति ऋषिः —

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे,
राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम् ।
दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा,
जिष्णू रथेष्ठाः सभयो युवास्य यजमानत्यवीरो जायताम् ।
निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो,
न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥[२]

केनचिद् हिन्दीकविना इमे मन्त्राः अनूदिताः । यथा —

हे जगदीश दयालु ब्रह्म प्रभु । सुनिये विनय हमारी ।
हों ब्राह्मण उत्पन्न देश में धर्मकर्मव्रतधारी ॥

क्षत्रिय हों रणधीर महारथ धनुर्वेद अधिकारी ।
धेनुदूधवाली हों सुन्दर वृषभ तुंग बलधारी ॥

हों तुरंग गतिचपलअंगना हों स्वरूपगुणवाली ।
विजयी रथी पुत्र जनपद के रत्न तेज बलशाली ॥

जब ही जब जग करे कामना जलधरजल बरसावें ।
फलें पकें बहुसुखदवनस्पति योगक्षेम सब पावें ॥

• जनाः एतच्छर्वं तदैव प्राप्स्यन्ति यदा राष्ट्रस्य राजा आदर्शः भविष्यति । अतः आदर्शराज्ञः च जनस्य व्यवस्थां तक्षणविधानं वा करोति ऋग्वेदस्य ऋषिः; यथा —

आ त्वाहार्षमन्तरेधि ध्रुवास्तिष्ठाविचाचलिः ।
विशस्त्वा सर्वा वाञ्छतु मा त्वद्राष्ट्रमधिभ्रशत् ॥

इहैवैधि माप च्योष्ठा पर्वते वाविचाचलिः ।
इन्द्र इवेह ध्रुवास्तिष्ठेह राष्ट्रमुधारय ॥[३]

आदर्शराज्ञः स्वरूपं निरूपयति अथर्ववेदः—

---

१. महाभारतम्
२. यजु. सं.(२२/२२)
३. ऋ० सं० (१०/१७३/१-२)

भूतो भूतेषु पय आ दधाति स भूतानामधिपतिर्बभूव ।
तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनुमन्यतामिदम् ।।[१]

तात्पर्यमिदमस्ति यत् सर्वेषु प्राणिषु दुग्धादिद्वारा पोषणं करोति, यस्य मृत्यु: राजसूयं प्राप्नोति अर्थात् य: महापुरुष: प्रजापालनार्थं स्वजीवनोत्सर्गं करोति, स एव राजा भवितुमर्हति यत: ईदृशे राज्ञि सति राष्ट्रे अन्यायात्मा-चातङ्कवाददारिद्र्यसामान्यप्राण्युत्पीडनादिसमस्या: एव न भविष्यन्ति । सर्वे परस्परं प्रेमदयामैत्रीपूर्वकं निवासं करिष्यन्ति । जना: शास्त्रीयसिद्धान्तानुसारेण धर्मं पालयिष्यन्ति, येनान्तरिककलहादिकानि न भविष्यन्ति । दण्डा-र्हाश्च दण्डं प्राप्स्यन्ति । वाह्यशत्रव: भयवशादाक्रमणं नहि करिष्यन्ति । परिणामत: राँष्ट्रे शान्तिसन्तोषसौहार्दन्याय-मैत्र्यादीनां प्रतिष्ठा भविष्यति । येन वाह्याभ्यन्तरीयपर्यावरणसमस्या: एव नहि आयास्यन्ति । कथितञ्च यत् — यथा राजा तथा प्रजा: । अपरञ्च यद्यदाचरति श्रेष्ठ: तत्तदेवेतरो जन: ।

आदर्शराजानां राज्ये सैनिका: सततं दुष्टानां केन्द्रान्वेषणं कृत्वा तदसमूलोन्मूलनाय प्रयतन्ते । तदैव राज्ये शान्ति: भवति, इति अथर्ववेदे उक्तम् । यथा —

कृत्या: सन्तु कृत्याकृते शपथ: शपथीयते ।
सुखो रथ इव वर्ततां कृत्याकृत्याकृतं पुन: ।।[२]

अत: राष्ट्रे धर्मनियमपालनेन सह शक्तिसंग्रह: आदर्शराज्ञ: व्यवस्था चापि करणीये । अयथा राष्ट्रोपरि शत्रूणामाक्रमणं दुष्टानाञ्च प्रभुत्वं यदा भविष्यत: तदा पर्यावरणं दूषितमेव भविष्यति । यत: तत्र धर्मनीतिसिद्धान्त न्याससंस्कतिसौहार्दादिगुणा: ह्रासतां यास्यन्ति तर्हि पुन: पर्यावरणरक्षा कथं सम्भविष्यति इति वैदिकानां मतम् ।

अथर्ववेदे कथितं यत् खण्डराज्येषु सततं वैमनस्यस्य भीति:, भवति किन्त्वखण्डराज्येष्वेवं न भवति । एतावता सार्वभौमराज्यमेव वैमनस्यस्य समाधानं वरीवर्ति । यथा —

दूरे पूर्णेन वसति दूर ऊनेन हीयते ।
महद् यक्षं भुवनस्य मध्ये तस्मै बलिं राष्ट्रभृतो भरन्ति ।।[३]

स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा ।
जनराडसि रक्षोहा सर्वराडस्यमित्रहा ।।[४]

अर्थात् सार्वभौमराज्येनैव शत्रु: विनाशतां याति । संस्कृतसाहित्यानुसारेण पर्यावरणं तदा शुध्यति यदा जना: प्रायोगिकरूपेण वेदप्रामाण्यं स्वीकुर्वन्ति । एतत्सन्दर्भे मनु: कथयति —

---

१. अथर्व० (४/०८/१)

२. वही (५/१४/५)

३. अथर्व.(१०/८/१५)

४. मनु.(५/२४)

अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥[१]

पश्चाद् महाभारते महर्षिः वेदव्यासः वक्ति, यत् —

ऊर्ध्वबाहुर्विरोम्येष नहि कश्चित् शृणोति माम्।
धर्मादर्थश्च कामश्च स धर्मः किं न सेव्यते ॥[२]

यतः धर्मं बिहाय अर्थकामप्रसक्तानां बुद्धिशुद्धिः केन प्रकारेण भविष्यति। यदि बुद्धिरेवाशुद्धिं गता तदा तु बुद्धिनाशात् प्रणश्यति एवंविधा स्थितिः भविष्यति। प्राचीनकाले तु मात्रधर्मेणैव संसारः चलति स्म। यतः राज्यं राजा वा कश्चिदपि नासीत्। यथा —

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूयः एवाभिवर्धते ॥[३]

यद्येवं न स्यात् तर्हि एक व्यक्तये एव निखिलब्रह्माण्डस्य सम्पत्तिः पर्याप्ततां नहि यास्यति। द्रष्टव्यमस्ति यत् —

प्रकृतोदाहरणे —

यः पृथिव्यां ब्रीहियवहिरण्यं पशवः स्त्रियः।
नालमेकेन तत् सर्वम् इति मत्वा शमं व्रजेत् ॥

अस्मादेव कारणात् मनुस्मृतिकारः त्यागसन्तोषसौमनस्यवृत्तीन् प्रतिसङ्केतयति यत् —

मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।
आत्मवत् सर्वभूतेषु यः पश्यति स पश्यति ॥[४]

सम्प्रति विश्वेऽखिले सर्वोत्कृष्टा समस्या युद्धस्य वर्तते। युद्धे जनधनयोर्हानिः जायते, दारिद्र्यानर्थयोश्च वृद्धिर्भवति। अस्मिन् वैज्ञानिकयुगे यदा युद्धस्य परिस्थितिरायाति तदा युद्धक्षेत्रे पार्श्ववर्तिनि क्षेत्रे च अनेकविध-प्रदूषणानि भवन्ति येषां प्रभावः चिरकालपर्यन्तं भवति। जापानदेशस्य हिरोशमानागासाकीप्रभृतिस्थलेषु अमरी-काद्वाराकृतेन परमाणुबमबिस्फोटेन महती हानिरभूत्, अधुना चापि तत्प्रभाविताः सन्ति जनाः पशुपक्षिणश्च तत्र। अतः एतादृशी परिस्थितिर्नायातु, एतदर्थं व्यवस्थां कुर्वन् वक्त्यत्र मनुस्मृतिकारः। यथा —

---

१. मनुस्मृति
२. महाभारतम्
३. मनु.
४. मनु.

अनित्यो विजयो यस्माद् दृष्यते युद्ध्यमानयोः ।
पराजयश्च संग्रामे तस्माद् युद्धं विवर्जयेत् ।।[१]

एवं विजयमानस्य येऽस्यस्युः परिपन्थिनः ।
तानानयेद्वशं सर्वान् सामादिभिरुपक्रमैः ।।

यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः ।
दण्डेनैव प्रसह्यैतांश्छनकैर्वशमानयेत् ।।[२]

अर्थात् युद्धे जयपराजयौ उभावनित्यौ स्तः । अतः युद्धं विहाय शान्त्य कार्यं साधयेत् । यदि शान्ति शत्रुः न शाम्येत् तर्हि दण्डविधानमावश्यकम् । अतः ये नीतिविज्ञाने धर्मञ्च नहि जानन्ति ते एव युद्धं कुर्वन्ति । युद्धे सति पर्यावरणं सर्वतोभावेन प्रदूषितम्भवति । अनेन पर्यावरणस्य बाह्याभ्यन्तरीयोभयविधस्वरूपं प्रभावितम्भवति । यस्य प्रभावः त्रैकालिको भवति । अतः पर्यावरणमवश्यमेव रक्षणीयम् । अनेन न केवलं मानवानामेव प्रत्युत् सर्वेषां जडचेतनानां रक्षा भवति ।

निष्कर्षतः इदं वक्तुं शक्यते यद् संस्कृतवाङ्मये निखिले पर्यावरणरक्षणं प्रति सैद्धान्तिकं व्यावहारिकञ्च व्यापकं सूक्ष्मञ्च चिन्तनं कृतं विद्वद्भिः । तच्चिन्तनमवश्यमेवाचरणीयमस्माभिः । अन्यथा सृष्टिरखिला विनंक्ष्यति ।

---

१. महाभारतम् शान्तिपर्व (३४८/६३)

२. मनुस्मृति (७/१०७-१०८)

आयुर्वेदपरिप्रेक्ष्ये संस्कृतस्यावदानम्

कञ्चनमाला पण्डित

हिताहितं सुखं दुःखम् आयुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तम् आयुर्वेदः स उच्यते ॥

विश्वसभ्यतायां आयुर्वेदस्य महद् योगदानम् अस्ति । आयुर्वेदस्य मूलं धर्मः । चरकमहोदयः वदति- धर्मार्थं न अर्थार्थम् आयुर्वेदः महर्षिभिः प्रकाशितः इति । लौकिकचिकित्साकर्मणि धर्मप्राधान्यस्य एतादृशं समर्थनम् एव भारतीयचिन्तनस्य आयुर्वेदस्य च वैशिष्ट्यम् । अत एव एषः आधुनिकविज्ञानिभिः अपि पुरस्क्रियते । धर्मविहीनतायाः दुष्परिणामान् सर्वसमाजे अधुना पश्यन्तः सन्ति केवलं तन्त्र - परिणताः भिषजः ।

विश्वस्वास्थ्यसङ्घटनेन (World Health organisation) इदानीम् अङ्गीकृतम् अस्ति यत् स्वास्थ्यस्य आध्यात्मिकं मुखम् (Spiritual Dimension of Health) अपि अस्ति, आवश्यकमिति ।

आयुर्वेदस्य प्रस्तुतिः अत्र दृश्यते—

विज्ञान-चिन्तनम् -

आयुर्वेदः विज्ञानम् शल्यविज्ञानादयः अपि आयुर्वेदे आसन् ये च इदानीं लुप्ताः सन्ति ।

निसर्गाध्ययनशील-विज्ञानस्य प्रथमं पदं तावत् विपुलवैविध्यस्य वर्गीकरणं (classification) व्यवस्थापनं (systematics) सङ्ख्याकरणं (Eneumaration) च । तत एव कार्यारम्भः । चरकः अपि एतम् एव अंशं वदति । रोगवर्गीकरण-विषये सः लिखति — 'तत्र सङ्ख्येयं तावद्यथोक्तम् अष्टोद्देशीये (In the eight Kinds of Stomach deseases) । अपरिसंख्येयं पुनर्यथा-महारोगाध्याये (In the chapter of the great deseaes) रुग्वर्ण-समुत्थानादीनाम् असंख्येयत्वात् ।' (च.वि. - ६.३)

संस्कृते आयुर्वेदस्य कतिपय- सूत्राणि सन्ति । यस्य पालनम् आवश्यकम् अस्ति । यत् महाकवि-कालिदासेन उक्तम्, "शरीरमाद्यं खलु धर्मसाधनम्" । रोगस्योत्पत्तिरेव यथा न स्यात् तथा जीवन-पद्धतिः आयुर्वेदे प्रतिपादिता ।

मनः स्वास्थ्यम्—

"जितेन्द्रियः नीरोगी भवति" इदम् आयुर्वेदस्य भारतीय- दर्शनशास्त्रस्य च वैशिष्ट्यम् ।

मनः आत्मनः इन्द्रियमात्रम् । मनः पुरुषस्य स्वामी न । तस्मात् तदुपयोगम् आत्माधीनं करोतु ....” इत्येवं वदति आयुर्वेदः ।

आधुनिक- वैद्यविज्ञाने मनः एव सर्वाधिकप्रभावशालिः । किन्तु एषु दिनेषु एतत् मतं परिवर्तमानं दृश्यते । नोबेल्-पारितोषिकविजेता एकलेस (Eccless) वर्येण, विज्ञानदार्शनिकेन पापर (popper) वर्येण च सम्भूय (Self and its Brain) इत्येषः ग्रन्थः १९७७तमे वर्षे लिखतः ।

भारतीयमानसशास्त्रस्य अध्ययनम् आधुनिक-वैद्यविज्ञानस्य सहायकं स्यात् । चरकोक्ताः केचन अंशाः अपि एतद्विषये उपकारकाः भवेयुः । ते यथा—

आत्मनिरूपणम् -

निष्क्रियं च स्वतन्त्रं च वशिनं सर्वगं विभुम् । वदन्त्यात्मानमात्मज्ञाः क्षेत्रज्ञं साक्षिणं तथा ॥चं.शा. १.१५ ॥

वेदनाकारणम् —

धीधृतिस्मृतिविभ्रंशः सम्प्राप्तिः कालकर्मणाम् । असाम्यार्थागमश्चेति ज्ञातव्या दुःखहेतवः ॥च.शा. १.१८ ॥

शुद्धतत्त्वस्य (मनसः) स्वरूपम् —

आरोग्यं प्रथमं रूपं ज्ञानविज्ञानमार्यता । दीर्घमायुः सुखावाप्तिः सामान्यं शुद्ध- लक्षणम् ॥ (च.शा. ४.३८)

पातञ्जलपारिभाषिकपदानि (Technical terminology) अपि अत्र मननयोग्यानि भवन्ति । पातञ्जलयोगः मनसः पर्यायपदानि वदन्ति बुद्धिः, अहङ्कारः, चित्तं, कल्पना, स्मृतिः, वासना, माया इत्येवमादिक्रमेण ।

आयुर्वेदस्य सस्यसम्पत्

तुलसी-निम्ब-आमलक-बिल्वफलं (बेल), हरीतिक्यादयः बहवः सन्ति आयुर्वेदोक्तपादपाः । तेषु अन्यतमा अस्ति सुपरिचिता हरिद्रा ।

सामान्या पाकशास्त्रे नित्योपयोगिनी चैषा चर्मस्वास्थ्यार्थं, प्रसाधनार्थं च नितराम् उपकारका । तस्याः पर्यायपदानि एव सूचयन्ति तत्कर्मवैविध्यम् । तानि यथा—

भद्रा (मङ्गलद्रव्ये अतिप्रसिद्धा)

गैरी (श्वेतमिश्रितहरिद्रावर्णयुक्ता चर्मरागार्थं प्रशस्ता)

हेमरागी (हिरण्यवर्णा कृमिनाशिका)

विषघ्नी (विषध्वंसिका)

वर्णदात्री (वर्णप्रदायिका)

हरिद्राम् कफदोषनिवारकम् (उष्णम्), पित्तदोषपरिहारकम् (कटुम्) वातदोषपरिहारकं च वदति ।

आयुर्वेदः अङ्गरागार्थम् उपयुज्यमाना सा शोथं शमयति, लोकज्ञानपुरस्कृताः बहवः उपयोगाः सन्ति ।

सुश्रुतः चर्मणः सप्तस्तरान् निर्दिशति । ते च अवथसिनी, लोहिता, श्वेता, ताम्रा, वेदिनी, रोहिणी, मांसधरा इति सप्तानां स्तारानां लक्षणानि, तेषां परिमाणं कस्मिन् स्तरे के रोगाः उत्पद्यन्ते इत्यादयः विषयाः अपि तत्र निरूपिताः सन्ति । वराहमिहिरस्य बृहत्सहितायां गन्धयुक्तिनामकः परिच्छेदः अस्ति । महोत्पलविवृतिः अपि उपलभ्यते ।

'पितामह्यः निधयः' (दादी माँ का खजाना) सम्प्रति लोकप्रियम् अस्ति ।

आयुर्वेदस्तु अद्यापि जीवति । अत्र आयुर्विज्ञानस्य शल्यचिकित्सायाश्च पर्याप्तो विकासः आसीत् । तत्र च द्रुतगत्या अभिनवशक्त्याः सञ्चारो भवति ।

मानवस्वास्थ्यसमस्या प्रथमाह्वानं युगस्यास्य । तन्निराकरणं कर्त्तुं संस्कृत- भाषायामेव आयुर्वेद- ग्रंथाः उपलभन्ते । रोगस्य उत्पत्तिः कारणानि, निदानोपायाश्च आयुर्वेदे दर्शिताः । आहार-विहार मनोव्यापारत्रयाणां समन्वयः जीवने आवश्यकं वर्तते । गीतायाम् भगवता श्रीकृष्णेन लघुआहारस्य प्रशंसा कृता ।

विहारद्वारा मानव- जीवन- चर्चा अभिप्रेता । शयनं जागरणं शक्त्यनुसारं देशकालानुसारं वस्त्र-परिधान-व्यायामौचित्यादीनां प्रवृत्तीनां समन्वयः जीवने आवश्यकः भवति ।

जीवन- पद्धतिः मनोव्यापारः । मन एव मनुष्याणां बन्धमोक्षयोः कारणम् इति न्यायेन आचरण- शुद्धि जीवने अपेक्षिता । गीतायां भगवता कृष्णेन प्रतिपादितम् —

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ इति ।

विश्वसंस्कृतौ संस्कृतम्

श्रीतुलसीदासपरौहा

संस्कृतं मातरं नत्वा धात्रीं संस्कृतिं तथा।
सादरं नूयते सोऽपि यो हि संस्कृतपोषितः ॥

संस्कृतं सार्वभौमे प्रतिष्ठीयताम्।
संस्कृतिश्चापि सर्वत्र नन्नन्द्यताम्॥

मानवो मानवः कर्मणा जायताम्।
तद्विधेयं मया भाष्यते श्रूयताम्॥

अत्र भवन्तो भवन्तः जानन्त्येव यद् अस्माकं वैदिकविज्ञानमिव भारतीया संस्कृतिः संस्कृतभाषा च सनातनत्वं भजेते। तथा च भारतस्य भारतत्वं जगद्गुरुत्वञ्च आभ्यामेव पोषिते वरीवृत्येते। अशेषे हि 'विश्वे' राजमानाः संस्कृतयः भाषाश्च एतयोः पुत्र्यः। किन्तु साम्प्रतं कालक्रमेण देशकालपरिस्थितिवशात् उभयोः महद्वैभिन्न्यं लक्ष्यते। वस्तुतः सत्यपि परिवर्तने अखिलविश्वगतेषु राष्ट्रेषु तत्तद्देशकालपरिस्थितिवशात् तेषामाचारविचाराहारव्यवहारादिदृश्यमानासु 'क्रियासु' तैः प्रयुज्यमानभाषासु च संस्कृतं संस्कृतिश्च भारतीयकुलमातेव दरीदृश्यतेतराम्। नानाभाषासु प्रयुज्यमानशब्दोच्चारणार्थगतसमानत्वं प्रमाणयति यत् सर्वा भाषाः संस्कृतमूलाः। भवन्तस्तु जानन्त्येव कस्या अपि भाषायाः परिवर्तनशीलता तस्याः प्रमुखा प्रवृत्तिर्भवति। तत्र च परिवर्तनशीलतायां मुख्या हेतवः भाषिणां वाग्यन्त्रवैभिन्यानुकरणसामर्थ्यन्यूनत्वप्रमादाशिक्षाः प्रयत्नलाघवादयो भवन्ति। अहमत्र कानिचित् प्रमाणानि उपस्थातुं प्रयते येन भारतीयसंस्कृतेः संस्कृतस्य च सार्वभौमत्वं सिध्यति।

विश्वस्य विभिन्नभागेषु भारतीयसंस्कृतेरवशेषः—

प्राचीनभारतीयेतिहासपुराणेषु भारतीयचक्रवर्तिनां दिग्विजयवर्णनम् 'विश्वसंस्कृतिषु' संस्कृतस्य तत्समतद्भवदेशजादिशब्दाश्च विज्ञापयन्ति यद् भारतस्य प्रभुत्वं संस्कृतस्य लोकभाषात्वञ्च पुरा महाभारतकालपर्यन्तं प्रायेण सर्वत्र आसीत्। तिब्बत- चीन- ईरान- ईराक- अफगानिस्तान- पाकिस्तान- प्रभृतिदेशास्तु मूलतः भारतीयत्वमेव भजन्तेस्म एतत् तत्र उत्खननेनापि प्रमाणीक्रियते। फारसी- रुसी च भाषे तु संस्कृत- शब्दबहुले एव। पारसीधर्मावलम्बिनस्तु वस्तुतः वैदिकाः। तेऽपि यज्ञोपवीतं धारयन्ति। सोवियतसंघे कैस्पियनसागरतटे इदानीमपि भारतीयैः स्थापितानि मन्दिराणि लभन्ते। सुराणां देशः सीरिया असुराणां देशः असीरिया अत्र

ग्रीकभाषायां इकार: उकारो भवति । अत्र संस्कृतशब्दबाहुल्यं दृश्यते । आफ्रीकायां नीलकृष्णनामा नदी अद्यावधि मिलति । मिश्रदेशे सूर्योपासना प्रचलिता आसीत् । अमेरीकायां मायासभ्यताकालेऽपि सूर्यमन्दिराणि आसन् । उत्खननेन तत्र अनेका मूर्तय: मिलिता: । या ५००० वर्ष प्राचीना: इति पुरातत्त्वविद्भि: कथितम् । इण्डोनेशियावासिन: इदानीमपि वैदिकधर्मावलम्बिन: । तेषां नामानि अनेकानि संस्कृतस्य सन्ति । ते पञ्चमशताब्दीं यावत् पूर्ण- वैदिका: आसन् । प्राचीनकाले सिंगापुर- बर्मा- मलाया- वोर्मियोप्रभृतिदेशा अपि भारतीयसंस्कृति- मया: आसन् इति तत्रापि प्रमाणं मिलति ।

विश्वव्यापी धर्म:— एकस्मिन् काले भारतीय: सनातन: धर्म: स्वकीयमौलिकरूपेण सर्वत्र राजमान: आसीत् । एकशताब्दी पूर्वत: प्रारब्धेन उत्खननेन ज्ञायते यद् एकस्मिन् दिवसे अवश्यमेन स्वीकरिष्यति विश्वं विश्वगतवैदिकसनातनधर्मत्वम् ।

अमरीकायां उत्खननेन देवमूर्तय: मिलिता: या: ३००० संख्याका: सन्ति । या: डीगोरीवेरा संग्रहालये सुरक्षिता: सन्ति । एता: पञ्च- सहस्रवर्षपूर्वा: सन्ति । यूनानदेशे गणेशं ओरेनस शिवं प्रियनस इति मत्वा जना: पूजयन्ति । जर्मनदेशे शिवं हरनाम्ना पार्वतीं च ईसिस नाम्ना जना: पूजयन्ति । अफ्रीकायां शिवोपासना चलति । उत्तरअफ्रीकायां इजिप्टप्रान्ते अनेका: शिवमूर्तय: मिलन्ति । स्काटलैण्डमध्ये अद्यावधि सुवर्णाच्छादितं शिवलिङ्गं प्राप्नुम: । इटलीदेशे इन्द्र-पार्वती- सरस्वती- देवा जूपीटर- जूवो- मिनर्वा- नाम्ना पूजयन्ति । वर्मादिशे विष्णु-शिवहनुमतादीनां मूर्तय: मिलिता: । हैलांगे तु अद्यावधि विष्णुमन्दिरं अस्ति । बैंकाके इन्द्र- पूजनं भवति । इण्डोचाइनामध्ये कम्बोडियायां च शिवोपासना भवति । इण्डोनेशिया मध्ये तु राजचिह्नं गरुड़ एव । चीनदेशे गोवीरेगिस्ताने तुनहुगुहायां अग्निसूर्य- काम- देवादीनां मूर्तय: मिलिता: । श्रीलंकायां नेपाले, पाकिस्ताने, बंग्लादेशे तु बाहुल्यमेव मूर्तीनाम् । अरबदेशे मक्कामध्ये साम्प्रतमपि शिवलिंगो मिलति । टर्कीदेशे ऋग्वेदीया देवा: पूज्यन्तेस्म । फ्रांसदेशे बलरामोपासना भवति । केलीफोर्नियायां च बलभद्रनाम्ना । जर्मन- स्वीडन- रूसदेशेषु- अर्जुन नाम्नी काचिद् नदी । फ्रांस-आफ्रीका- पेन्सिलबानिया देशेषु अर्जुननामकं नगरम् ।

पर्वाणि वर्णव्यवस्था हिन्दूरीतयश्च—

एवं हि विश्वसंस्कृतिषु भारतीयसंस्कृते: तत्समतद्भवरूपेण वर्तमानत्वात् ज्ञायते यद् अस्मदीया संस्कृति: संस्कृतभाषा च समेषां मानवानाम् वर्तते । मानवताया महतो धर्मस्य संस्थापनायै च एतयो: प्रसारप्रचारौ तथा च सर्वै: मनसा वाचा कर्मणा स्वीकरणं महदपेक्ष्यतेतराम् ।

पर्वाणि

यथाहि अस्माकं देशे दीपावली विजयादशमी होलिकोत्सवा भवन्ति । तथैव विश्वस्य विभिन्नेषु भागेषु अपि । तत्र हि वयं होलिकोत्सवं उल्लासपर्वरूपेण मन्यामहे । अमेरिकादेशे इदमेव हैलोइननाम्ना सम्पद्यते । इटलीदेशे रेडिकानाम्ना फ्रांसदेशे वेल्जियमदेशे च मूर्खोत्सवरूपेण साइबेरियायां वर्मादेशे च भारतीयरीतिना होलिका दाहपूर्वकं भवति । अफ्रीकामध्ये ओमेना- वोंगा- नाम्ना चीन- देशे च्वेजनाम्ना अंडमान-गोआ लंका- जर्मनी नेपालेषु- तु भारतीयपद्धत्यैव सम्पद्यते ।

वर्णव्यवस्था

भारतीया वर्णव्यवस्था या खलु भारतीयसंस्कृतेः वैज्ञानिकी व्यवस्था विद्यते। सा हि सार्वभौमिकी। भारत- नेपालदेशयोः इयं चतुर्विधा। ब्राह्मण- क्षत्रिय- वैश्य-शूद्रात्मिका। इयमेव यूनानदेशे-गाजियान-वारियर-, आटिजन-लेवररूपेण। ईरानदेशे-होरिस्तरन-नूरिस्तरन-कोजिस्तरन-सोरिस्तरनरूपेण। फ्रांसदेशे-क्लर्जी-वोविलिटी-बुर्ज्वालजी-पीजेस्ट्रीरूपेण इटलीदेशे-प्रीस्ट-सीनेटर-पेट्रासीओ-प्लेडीओरूपेण लभ्यते। डॉ० मीज-धिया हिन्दुषु प्रचलिता वर्णव्यवस्था न केवलं भारतस्य अपितु अशेषमानवसमाजस्य वर्तते।

हिन्दूरीतयः

स्यामदेशे राज्ञः राज्याभिषेकं हिन्दूपद्धत्या पुरोहितः करोति। तत्र अभिवादनं करौ संपुटीकृत्य क्रियते। जनाः धौतं धारयन्ति। मलायादेशे मुस्लिमाः अभिषेकानन्तरं ईशं प्रार्थयन्ति। राज्ञे छुरिकां ददति यस्यां भैरवदुर्गयोः चित्रं भवति। फिलीपाइन्सदेशे गुरून् जनाः प्रणमन्ति। जापानदेशे गृहान्तः पादुकया सह नैव प्रविशन्ति। स्त्रियः चूडां बध्नन्ति। अमरीकायां मूलनिवासिनः संयुक्तपरिवारप्रथां पालयन्ति।

प्रो. प्रेस्काटदृष्ट्या परम्परां निरीक्ष्य भारतीयामेरिकावासिनः एकमेव इति प्रतीयते।

एवं हि विश्वसंस्कृतिषु भारतीयसंस्कृतेः तत्समतद्भवरूपेण सनातनत्वात् ज्ञायते यद् अस्मदीया संस्कृतिः संस्कृत- भाषा च समेषां मानवानां वर्तते। मानवतानाम महतो धर्मस्य संस्थापनायै एतयोः प्रचार- प्रसारौ। एतेन वसुधैव कुटुम्बकम् इत्यस्यापि क्रियान्वयनम् भवेत्।

जयतु संस्कृतम् जयतु भारतम्।

संस्कृतं विश्वसभ्यता संस्कृतिश्च

डॉ. रामपूजनपाण्डेयः

कस्यचिदपि राष्ट्रस्य एका आत्मीया संस्कृतिः भवति, यया राष्ट्रस्य सामाजिकं जीवनं तस्य प्राचीनं नूलं वा स्वरूपं ज्ञातं भवति । संस्कृतिमतिरिच्य अत्र विश्वे तस्य राष्ट्रस्य देशस्य वा परिचायकं किञ्चिद् वस्तु न भवति । भारतराष्ट्रस्यापि काचिदतिप्राचीना विश्वमङ्गलकामा सर्वसुखकरी सर्वहितकरी च संस्कृतिः वर्तते । इयं भारतीया संस्कृतिः नैव आङ्लभाषीय 'कल्चर' शब्दपर्यायभूता अपितु विशिष्टा भारतीयजीवनलेखा राष्ट्रपरिचायिका मनोहरा चारुविचारचिन्तनपद्धतिश्च वर्तते ।

संस्कृतिशब्दः संस्कारगतं भावं प्रकटयति, यतः व्याकरणानुसारं संस्कृतिशब्दः 'सम्' उपसर्गपूर्वक 'कृ' धातोः क्तिनि प्रत्यये कृते सति निष्पद्यते । अतः प्रशस्ता (सर्वोत्तमा) उपलब्धिः अभिव्यक्तिश्च संस्कृतिपदेन वक्तुं शक्यते । एतेन तस्याः सम्बन्धो मनुष्यस्य शरीरेण, प्राणेन, मनसा बुद्ध्या च अवश्यमेव वर्तते इति ज्ञायते । सर्वोत्तमाया उपलब्धेः अभिव्यक्तिश्च आधारो भवति श्रुतिस्मृतिपुराणादिवाङ्मयमेव । तत्र संकेतिताः विधिनिषेधादिनिर्देशाः सम्यक् चेष्टारूपेणाङ्गीक्रियन्ते । संक्षेपतः यस्य तत्त्वस्य माध्यमेन मानवता आधिभौतिकीम् आधिदैविकीम् आध्यात्मिकीं च वैशिष्ट्यसन्ततिमासादयति तदेव तत्त्वं संस्कृतिपदवाच्यं भवति ।

भारतीया संस्कृतिः आचारविचारप्रधाना परिलक्ष्यते । विशुद्धैः आचारैः विशुद्धाः विचाराः जायन्ते, ये संस्कृतिसम्पोषे सहायका भवन्ति । दोषादिपरिशोधनक्षमा सा क्रियाऽपि संस्कृतिशब्देन वक्तुं शक्यते, या केनचित् स्थूलपदार्थेन सूक्ष्मतत्त्वाधिगमाय अधिक्रियते । एतेन मनुष्यताया संस्कारिका क्रिया भवति संस्कृतिः । एकदा महात्मागांधीमहोदय उक्तवान् दक्षिणअफ्रीकादेशे 'मां वीक्ष्य या भावना (विचारः) भारतविषये मम विषये वा भवत्सु समुदेति सैव मम देशस्य महनीयस्य च संस्कृतिः । एवमेतादृशी भारतीयसंस्कृतिः मानवसंस्कृतिरूपेण विकासं प्राप्तवती ।

धर्मप्रधाना इयं भारतीयसंस्कृतिः मानवेषु कर्तव्याधिकाररूपान् धर्मान् आधत्ते । अयमेव धर्मः मानवान् पशुभ्यः पृथक्करोति—

आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥

नहि अत्र धर्मपदेन कस्यचन सम्प्रदायविशेषस्य विशिष्टो धर्मो विवक्षितः, अपितु येन पदेन शास्त्रेषु संसारस्योद्धारकानि तत्त्वानि व्याख्यातानि तदेवात्र तत्पदेन विवक्षितम् । तद्यथा—

धारणाद् धर्ममित्याहुः धर्मो धारयते प्रजाः ।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः ॥

किञ्च,

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥

यश्चैहिकमामुष्मिकं च द्विविधं कल्याणमाधत्ते स धर्म इति वैशेषिकदर्शनकर्त्रा भगवता कणादेन "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म" इति सूत्रेण प्रसाधितः । एवमेव भगवता मनुनाऽपि सर्वजनानां कृते दशसख्याकाः सामान्यधर्माः प्रोक्ताः वर्तन्ते । तद्यथा—

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

एवमस्यां संस्कृतौ वेदमूलकोपनिषदाम् अनुशासनम् अपि उपलभ्यते । गुरुशिष्यपरम्परायां प्राचीनकाले आचार्यः स्वान्तेवासिनं छात्रम् एवमनुशास्ति स्म ।

सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । देवपितृकार्याभ्यां न प्रमदितव्यम् । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि । ये तत्र ब्राह्मणाः समदर्शिनः । यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः । एष आदेशः । एष उपदेशः ।

सर्वं जगदीश्वरेण जनितं अभिव्याप्तञ्च विद्यते अत एव श्रुतौ उद्घोषितम्—

"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्र-ह्मेति" ।इति ।

किञ्च

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम् ॥

सर्वत्र एकत्वदृष्टिस्थापनेन नरः कदाचिदपि केनचित् शोकेनाभिभूतो न भवति, अपितु सर्वत्र महान्तमानन्दं अनुगृह्णाति ।

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

यस्मिन् सर्वाणि भूतान्यात्मेवाभूद् विजानतः ।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः ।। यजुर्वेदः ४०/६-७

मानवजीवने परब्रह्मणि विश्वासः अनासक्तिभावनया शास्त्रप्रचोदितकर्मणि प्रवृत्तिः अत्यन्तमावश्यकं भवति । एतेन पथा गच्छतो जीवनस्य अन्तिमे भागे मनुष्यः ब्रह्मसाक्षात्कारमपि कर्तुं प्रभवति । तथा मनुष्यजीवनस्य साफल्यमधिगच्छति ब्रह्मज्ञानेनैव सर्वत्र समदृष्टिः जीवनमुक्तिश्चेति वेदेनापि निर्दिश्यते । तद्यथा —

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः । भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति । केनो. २/५

ब्रह्मसत्यं जगन्मिथ्या, नेह नानास्ति किञ्चन, सर्वं खल्विदं ब्रह्म इत्यादि श्रुत्युद्घोषितवचोभिः सर्वं स्थावरजंगमात्मकं जगत् ब्रह्ममयं ज्ञात्वा मनुष्यैः स्वजीवनस्य सफलतायै परोपकारभावः स्वार्थपरित्यागश्च अवश्यमङ्गीकर्तव्य एव । अपि च समाजस्य राष्ट्रस्य च सर्वविधसमुन्नत्यै सर्वत्र मित्रदृष्टिसम्पादनं वैचारिकसामञ्जस्यञ्च अवश्यं कल्पनीयम् । अत एव श्रुतयोऽस्मानुपदिशन्ति (प्रबोधयन्ति)—

"उत्तिष्ठत, जाग्रत प्राप्य वरान् निबोधत" कठोपनिषद्

किञ्च

"चरन्वै मधु विन्दन्ति चरन् स्वादुमुदुम्बरम् ।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन् ।।

चरैवेति चरैवेति" । ऐ. ब्राह्मण

एवं श्रुतिप्रचोदिताः प्रबुद्धाश्चास्माकं अनूचाना ऋषयो विश्वबन्धुत्वं कामयमानाः सर्वत्र समदृष्टिसम्पादनेन स्वपरहितविभेदनिवारणेन च सार्वभौतिकीमुन्नतिम् अभिलषन्ति स्म । तद्यथा—

"मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुषा समीक्षामहे" । शु.य. ३६/१८

समानी व आकूतिः समना हृदयानि वः
समानमस्तु वो मनो यथा वः सुसहासति । ऋ १०/४/१९१

अनुव्रतः पितुः पुत्रो माता भवतु सम्मना ।
जाया पत्ये मधुमतीं वाचं वदतु शान्ति वाम् ।।"

एतेन इदमवगतं भवति यद् भारतीया संस्कृतिः न केवलं व्यष्टेरपितु समष्टेरपि जीवनप्रदा वर्तते । सैव समग्रस्य लोकस्य राष्ट्रस्य च भूतिं भावयति, सुखं साधयति, सत्यं स्थापयति, मानवीयदुर्गुणान् दोषांश्च दूरीकृत्य सर्वहितं प्रकल्पयति ।

भारतीयसंस्कृतेरेतादृशं गुणगौरवमालोक्य भगवता मनुना प्रोक्तम्

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

भारतीयसंस्कृतेः धारा मुख्यतः स्वाभाविकरूपेण आग्नेयदिशि प्रावहत् । बहुवारं सा उत्तरवाहिन्यपि अभवत् । अतस्तया भारतस्य दक्षिणपूर्व उदीच्याश्च देशा भारतीयप्रभावेण समीचीनतयाऽऽप्लाविताः । पूर्वद-क्षिणएशियाख्येन कश्चन देशेन महान् धर्मो नोत्पादितः किन्तु पश्चिम-एशिया प्रदेशे (देशे) ईसाईनामकस्य इस्लामनामकस्य च द्वयोः धर्मयोः अविर्भावोऽभूत् । भारतीयधर्मेण साकं भारतीयसंस्कृतिः कम्बुजदेशे, चम्पादेशे सुवर्णद्वीपे, सिंहले,स्यामे मध्य-एशियायां चीने जापाने च प्रसृता । पाश्चात्त्यानां देशानां सविधे ख्रीष्टीयाब्दात् परं स्वकीयां निश्चितः व्यवस्थितश्च धर्म आसीत् । सुसंस्कृतेषु राष्ट्रेषु आत्मगौरवं भवति, तानि स्वं जात्यन्तरापेक्षया उन्नतं स्पयञ्च मन्यन्ते । जात्यन्तराणि तत्सम्बद्धानि सर्वाणि वस्तूनि तिरस्कुर्वन्ति । यहूदीसंज्ञका जात्यन्तराणि जैस्टाइलेंतिशब्देन, यूनानवासिनो बर्बरशब्देन, भारतीया म्लेच्छशब्देन एतान् अवमन्यन्ते स्म । ख्रीष्टानुयायिधर्मस्य जन्म एशियायामभूत् किन्तु पाश्चात्त्यैः रोमदेशे विकसितः ईसाईधर्मः स्वीकृतः ।

इस्लामधर्मः एशियामहाद्वीपे साफल्यं प्राप्तवान्, किन्तु स्पेनदेशे पूर्वदक्षिणयोरोपे च यवनानामाक्रमणा-नन्तरं बहुकालं यावत् शासनानन्तरमपि स्वल्पा एव मुहम्मदानुयायिनोऽभूवन् । अत्र अनूकूलां परिस्थितिं प्राप्यापि इस्लामधर्मः असफलोऽभूत् तत्र यदि भारतीयधर्मैः अतीवन्यूनः प्रभाव स्थापित स्तदा तत्र कश्चन विस्मयो न कार्यः किन्तु आश्चर्यन्तु तत्र भवति यत् तावानपि प्रभावो भारतेन कथं स्थापयितुमशक्यत ।

ऐतिहासिके सन्दर्भे प्रतिकूलपरिस्थितौ सत्यामपि पाश्चात्त्यदेशेषु भारतीयसंस्कृतेः कश्चन प्रभावो अवश्यमभवत्/ प्राचीनजगति सुमेर-बाबुल-मिश्र-यूनान-चीनानां संस्कृतयः प्रधाना[1] आसन् । मिश्रवासिभिः प्राचीनकालेऽश्मनां विशालानि पिरामिडानि कारितानि, तानि तु कालस्य क्रूरमाघातं सहमानानि अद्यत्वेऽपि स्वानि शिरांसि आकाशे उन्नमन्ति स्थितानि सन्ति किन्तु तेषां निर्मातृणां संस्कृतिः वैदेशिकानामाक्रमणस्य आघातं सोढुं न पारितवती, किन्तु भारतीया संस्कृतिस्तु कालस्य कठोरान् प्रहारान् सहमाना अद्यापि जीवति । येन इस्लामधर्मेण मिश्रदेशे लघु-एशियायाम् उत्तर-अफ्रीकायाञ्च यूनानसंस्कृतेः नाशोऽकारि, ईरानदेशीयपारसीधर्म, उन्मूलितः स भारतेऽसफलोऽभूत् ।

पाश्चात्त्यानां यूनानसंस्कृतौ अभिमानोऽस्ति । सिकन्दरेण ताम् एशियामहाद्वीपे प्रसारयितुं प्रयतितम्, किन्तु विस्तरस्य प्रभावस्य च चिरस्थायितादृष्ट्या सा भारतीसंस्कृतेः समतामाधातुं नार्हति । चीनदेशे[2] यद्यपि चिरस्थायितादृष्ट्या भारतस्य साम्यं कर्तुमर्हति, किन्तु आश्चर्येण इदं दरीदृश्यते यत् स सभ्यः सुसंस्कृतोऽपि सन् न केवलं स्वयं भारतस्य शिष्योऽभूत् अपितु तस्य प्रतिवेशिषु अनामराज्ये बर्मादेशे तिब्बतदेशे ताइवानदेशे चापि

---

१. प्राचीन इतिहास एन.सी.इ.आर.टी.

२. गच्छति पुरः शरीरं पश्चाद् धावति असंस्तुतं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ अभि. शा. कालिदास

भारतस्य गम्भीरः प्रभावोऽभूत्। ते देशाः वंशदृष्ट्या चीनदेशेन सम्बद्धा आसन्, किन्तु सांस्कृतिकदृष्ट्या भारतस्य अनुयायिनोऽजायन्त।

भारतस्य सांस्कृतिकं साम्राज्यं विस्तारदृष्ट्या चिरस्थायि कल्याणकारि प्रभावदृष्ट्या च विश्वेतिहासेऽनुपमं वर्तते।[१] एतस्य अन्यतमं कारणमस्ति समन्वयवादः। तत्र विविधोपासनानां स्वीकारस्य नवानां पद्धतीनां पाचनस्य स्वस्य नवपरिस्थितियोग्यत्वस्य च असाधारणी क्षमता आस्ते। जलं विविधेषु पात्रेषु तत्तदाकारानुकूलं रूपमादधाति, इयमेव दशा भारतीयधर्मस्य कलायाश्चापि विद्यते।

हिन्दूधर्मानुसारेण उपासनायाः सर्वेऽपि प्रकाराः श्रेष्ठाः सन्ति, ते एकमेव तत्त्वमासादयितुं विविधाः मार्गाः सन्ति। वैदिकयुगाद् वर्तमानयुगपर्यन्तं सकलं भारतीयं साहित्यं सहिष्णुता-समन्वयवादविचारेण सुसम्पृक्तं वर्तते। यथोक्तम् 'एकं सद्विप्रा बहुधा वदन्ति' ऋ. ९/१६४/४६)। किञ्च

सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु, मा विद्विषावहै॥

राज्ञा अशोकेन स्वशिलालेखेषु सहिष्णुतां समीचीनां प्रतिपादयता प्रोक्तं- 'समवाय एव साधुः'।

गीतायामयं विचारः परां काष्ठां प्राप्तः। भगवतः कृष्णस्य अनेन स्वोपदेशेन सन्तोषो नास्ति यत्

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ गी. ४/११

किन्तु तेन एतदपि प्रतिपादितं विद्यते यत्—

येऽप्यन्ये देवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥ गी. ६।

भगवता पुष्पदन्ताचार्येण शिवमहिम्नस्तोत्रे एतदेव तत्त्वं शोभनया उपमया निर्दिष्टं विद्यते—

रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषाम्।
नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥

वस्तुतो भगवान् एकोऽचिन्त्योऽव्यक्तः सर्वज्ञः सर्वशक्तिमांश्च अस्ति, विविधोपासनप्रकारा = तं प्राप्तुं मार्गाः सन्ति, यदा लक्ष्यमेकं तदा मार्गाणां कृते कथं विवादः कर्तव्यः। हिन्दूधर्मः बौद्धधर्मश्च यत्रापि गतौ स्वसिद्धान्तानुसारेण ताभ्यां तत्रत्यानां प्राचीनतमानां देवालायानां खण्डनं न कृतम् किन्तु ते स्वीकृता आत्मीयाश्च विहिताः।

---

१. (क) ह्वेनसांग का यात्रा विवरण
(ख) वैदिक साहित्य का इतिहास आ. बलदेव उपाध्याय

एवम् भारतीयसंस्कृतौ निःसीमं मृदुत्वमाश्चर्यजनकं च वैविध्यमस्ति । तेन सा सर्वान् प्राणिनः (जनान्) प्रसादयितुमर्हति । इयं संस्कृतिः विचित्रा मन्त्रमञ्जूषा आस्ते । अत्र एकतो भूतप्रेतानाम् उपासकानाम् च कृते मन्त्रा अन्यतः दार्शनिकानां कृते गूढविचारा अपि सन्ति । तिब्बतदेशे भारतीयस्य धर्मस्य सफलताया एकं कारणं मन्त्रा आसन् । चीनदेशे निम्नवर्गाः मन्त्रेण भारतीयधर्माभिमुखा बभूवुः । विद्वत्समाजे च महायानस्य गम्भीरदर्शनस्य प्रभावोऽभूत् ।

भारतीया संस्कृतिः चिन्तामणिः अथवा कल्पवृक्षो विद्यते । ततः सर्वेषाम् अभीष्टफलप्राप्तिर्भवति तादृशः चिन्तामणेः सर्वत्र सफलता स्वाभाविकी विद्यते । यतो हीयं उद्घोषयति "मा कश्चिद् दुःखभाग्भवेत् । इति शम्

पर्यावरणस्य सामयिकीसमस्या निरुक्तञ्च

डॉ. रामाशीषपाण्डेयः

पर्यावरण-विवेचनम्–

परि + आङ् + वृ + ल्युट् प्रत्ययेन निष्पन्नेन पर्यावरणशब्देन परितः आवृणोति यत्तत्पर्यावरणमिति। येनावरणेन जना जीवा वा सर्वदाऽऽवृतास्तिष्ठन्ति तदेवावरणं पर्यावरणं कथ्यते। मानवान् जीवान् स्थावरजंगमादिपदार्थान् वा परितः पृथिव्यप्तेजोवाय्वाग्न्याकाशादीनि यानि पञ्चतत्त्वानि विद्यन्ते तैस्ते सर्वे आवृताः सन्ति। पञ्चतत्त्वैरावृता जीवाः स्वकीयमस्तित्वं धारयितुं समर्था भवन्ति। जीवने येषां तत्त्वानां विशेषतः प्रकृतिभूतानां प्रभावो दृश्यते। तानि तत्त्वानि समग्ररूपेण पर्यावरणे परिगणितानि भवन्ति।

वेदान्तप्रक्रियायामपि पञ्चतन्मात्राभिर्जायते स्थूलशरीरोत्पत्तिः यैः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि ज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि क्रमशः प्रभावितानि भवन्ति।[१] सृष्टिप्रक्रियायामुपनिषदि प्राप्यते तस्माद्वा एतस्मादात्मनः आकाशः संभूतः आकाशाद्वायुर्वायोरग्निरग्नेरापोरद्भ्यः पृथिवीति।[२]

पर्यावरणप्रभावः—

पञ्चतत्त्वेषु गुणत्रयस्य सत्त्वरजस्तमाख्यस्यापि विद्यमानता भवति यैः प्रभाविता भवन्ति जीवास्तैरिन्द्रियाण्यपि जायन्ते प्रभावितानि। अनेनैव कारणेन जीवास्त्रिगुणात्मिकाः प्रोच्यन्ते। सामान्यतः प्रकृतिरियं त्रिगुणात्मिका विद्यते। गुणवैशिष्ट्यादेव जीवेषु विभिन्नता दृश्यते। गुणाश्रितैः पञ्चतत्त्वैराश्रिता जीवाः सर्वदैवाकाशादितत्त्वानां सन्तुलनमभिलषन्ति। तत्त्वानां सन्तुलनेनैव जीवानां स्थितिः सामान्या भवति। यदि पञ्चभौतिकतत्त्वेषु कस्मिन्नपि तत्त्वे विकृतिरायाति तदा तत्रासन्तुलनं निश्चितमेव। प्रकृतिभूतानां तत्त्वानां विकृतौ पर्यावरणं संकटापन्नं भवति।

पर्यावरणस्य सामयिकी समस्याः—

सम्प्रति पर्यावरणप्रदूषणस्य समस्या नहि केवलं भारतेऽपितु भारताद्बहिरपि विभिन्नदेशेषु वरीवर्ति। प्राकृतिकं पर्यावरणं यदि दूषितं भवति तर्हि तेन मानसिकं शारीरिकं सामाजिकञ्चापि पर्यावरणं प्रभावितं भवति।

१. वेदान्तसारे पञ्चीकरणवार्तिके सुरेश्वराचार्यः
२. तत्रैव भूमिकायाम् — ३५ पृष्ठे

ध्वनिर्वायुरग्निःपृथिवीप्रभृतीनि पर्यावरणानि विविधकारणात् प्रदूषितानि भवन्ति। वैज्ञानिकाः समाजसेवकाः नेतारश्चापि प्रवर्धितस्य पर्यावरणप्रदूषणस्य जृम्भायितां समस्यां दृष्ट्वा सम्प्रति भृशं चिन्तिताः सन्ति, पर्यावरणप्रदूषणनिवारणाय— यत्नवन्तश्चापि विद्यन्ते । निरुक्ते प्रतिपादितं विविधपर्यावरणमत्र प्रस्तूयते—

निरुक्ते प्रतिपादितं प्राकृतिकं पर्यावरणम्—

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति महाभाष्यवचनेन षडङ्गेषु निरुक्तस्य स्थानं महत्त्वपूर्णम् ।[१] निरुक्तस्य विद्यात्वमपि प्रसिद्धमस्ति ।[२] 'अर्थाववोधे निरपेक्षतया पदजातं यथोक्तं तन्निरुक्तमिति वेदार्थावगमाय निरुक्तस्य महत्त्वं नाविदितम् ।[३] वेदा भारतीयसंस्कृतेः प्रकाशका आर्याणां सामाजिकस्य धार्मिकस्यार्थिकस्य सांस्कृतिकस्य दार्शनिकस्य च स्थितेरादर्शभूता विद्यन्ते, यस्मिन्नादर्शे समग्राणि चित्राणि प्रतिविम्बितानि भवन्ति ।

निरुक्ते परि + वृधातोर्निष्पन्नः परिवृढशब्दो वृहदर्थे प्राप्यते ।[४] तत्रैव ब्रह्मा परिवृढो भवति श्रुतितः, तथा ब्रह्म परिवृढं भवति सर्वतः ।[५] । तत्र प्रयुक्तः परिवृढशब्दः परिव्याप्तरूपमर्थं व्यनक्ति । 'द्विवर्हा' इत्यस्य निर्वचने द्वयोः स्थानयोः परिवृढो मध्यमे च स्थाने उत्तमे च । मध्यमेऽन्तरिक्षे वैद्युतेन उत्तमे लोके सूर्यरूपेण परिवृढः परितो व्याप्तः ।[६] आ + वृधातोः प्रयोगोऽपि आवरणार्थे प्राप्यते ।[७]

पर्यावरणे प्रकृतिभूतानि यानि तत्त्वानि परिगणितानि तानि सर्वाणि निरुक्ते यत्र तत्र विवेचितानि सन्ति । पृथिव्यादिप्रकृतिभूतानां तत्त्वानां यादृशी विवेचना प्राप्यते तयानुमीयते यद् वैदिककाले मन्त्रद्रष्टारः ऋषयः प्रकृतेस्तत्त्वानां विज्ञातारः प्रकृतेर्महत्त्वं सम्यग्विज्ञाय तेषु देवत्वस्याधानं कृतवन्तः । परिणामतस्तत्र प्रकृतयो देवत्वेन वर्णिताः ।

आकाशावरणम्—

आसमन्तात् काशन्ते प्रकाशन्ते सूर्यादयोऽत्रेति निष्पन्नस्याकाशशब्दस्य गगनमन्तरिक्षमम्बरं खमित्यादयः शब्दाः पर्यायत्वेन प्रसिद्धाः । आकाशस्य कृतेऽन्तरिक्षशब्दो निरुक्ते निवेचितः- तत्र प्रयुक्तमन्तरिक्षमन्तराक्षान्तं भवत्यन्तरेमे इति वा शरीरेष्वन्तरक्षयमिति वा ।[८] अन्तरिक्षमिदं द्युलोकपृथिवीलोकयोर्मध्येऽवस्थितमक्षयं

---

१. महाभाष्ये (पतञ्जलिः) परस्पशाह्निके
२. तदिदं विद्यास्थानम् - नि. १/५
३. ऋग्वेदभाष्यभूमिकायां सायणाचार्यः
४. निरुक्ते — १/३
५. तत्रैव - १/३
६. तत्रैव - ६/४
७. अन्नमपि व्रतमुच्यते यदावृणोति शरीरम् नि. २/४
८. तत्रैव २/३

भवति ।[१] दुर्गवृत्तौ लोकत्रयेषु अन्तरिक्षस्य वर्णनं निरुक्तोद्धृते वैदिकमन्त्रे प्राप्यते ।[२] निरुक्तेऽन्तरिक्षलोकादुपरि स्थितो द्युलोकेऽपि आकाशशब्देनैव गृह्यते ।[३] शब्दगुणकमाकाशमित्यनेन शब्दस्य सम्बन्ध आकाशेन सह विद्यत इति । आकाशगुणः शब्दः[४] निरुक्ते विवेचितः शब्दस्य सम्बन्धः कर्णेन सह विद्यते । कर्णेन्द्रियस्य विषयस्तु शब्द एव ।

आकाशाद्वायुः प्रादुर्भवति । वायुभिः परिवेष्टिते आकाशे जीवानां स्थितिः प्राप्यते । आकाशावरणस्य सन्तुलनेन स्वच्छतायाञ्च जीवानां स्थितौ दृढतामायाति ते विकसिताश्च भवन्ति दीर्घायुञ्चावाप्नुवन्ति । निरुक्ते आकाशं वर्णितं तत्रस्था देवाश्चापि वर्णिताः ।

सम्प्रति जनाधिक्याद्विविधवैज्ञानिकोपकरणप्रयोगाद् ध्वनिविस्तारकयन्त्रस्थप्रचुरयोगाच्च ध्वनिप्रदूषणेनाकाशं प्रदुष्टम् । प्रदुष्टेन ध्वनिना विस्फोटादि शब्दैश्च हृदयगतिरनियमिता जायते येन हृदयरोगाः सम्बद्धरोगाश्चोत्पद्यन्ते । श्रुतिरन्ध्रे प्रतिमूलध्वनेः प्रवेशात् तीव्रशब्दसन्धानाच्च कदाचिद् वाधिर्यमपि जायते । निरुक्ते विवेचितेषु आकाशस्थदेवेषु इन्द्रवायुरुद्रादयोऽन्तरिक्षस्थाः प्रसिद्धाः । ध्वनिप्रदूषणनिराकरणाय निम्नलिखितो निरुक्तोद्धृतः ऋग्वेदीयो यन्त्रो विशेषरूपेण द्रष्टव्योऽस्ति—

भद्रं वद दक्षिणतो भद्रमुत्तरतो वद।
भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिञ्जलः ।।[५]

सर्वतोऽस्माकं कृते भद्रं वदेति ध्वनिप्रदूषणस्य निराकरणार्थमेवात्र वर्णितम् । अन्तरिक्षस्य द्युलोकस्य वा महत्त्वं निरुक्तोद्धृते निम्नलिखिते ऋग्वेदीयमन्त्रे यथा—

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।[६]

वायुतत्त्वावरणम्—

वातीति वायुशब्दो वा गतिगन्धनयोः धातोरुण् प्रत्ययेन निष्पन्नो भवति ।[७] रूपरहितस्पर्शवान् वायुरित्यन्नंभट्टः ।[८] वायुरयं गत्यात्मकः पृथिव्यामाकाशे च सञ्चरणशीलो भवति । वायुभिरेव जीवानां स्थावरजं-

१. तत्रैव - २/३
२. तत्रैव १२/२, ऋग्वेदे - १/१५/१
३. महाभाष्य (पतञ्जलि) निर्णयसागर प्रेस बम्बई
४. निरुक्ते - ७/२
५. तत्रैव — १४/४
६. तत्रैव - ९११
७. हलायुधे ६०२ पृष्ठे
८. तर्कसंग्रहे — ६ पृष्ठे

गमादीनां स्थितिर्जायते। यावद् वायुर्भ्रमति तावदेव जीवानां शरीरस्य च स्थितिर्जायते, यत्र वायुर्नास्ति तत्र प्राणधारणमपि दुष्करमेव। वायुतत्त्वस्य सर्वत्र व्याप्त्वात् तेनावृतत्वाच्च वायुर्विशेषेण पर्यावरणे विश्रुतः।

विविधकारणाद् वायुरपि दूषितो भवति। वायोर्दूषिते सति पर्यावरणे दूषणमायाति। वायोः प्रदूषणस्य प्रभावात् स्वच्छवायोरभावाच्च जीवनं संकटापन्नं भवति/सम्प्रति वायोः प्रदूषणस्य विविधकारणेषु नानावाहनेभ्यो निःसृताः धूमाः विषाक्ततैलीयपदार्थाः रासायनिकगैसाख्यादयः प्राथम्येनोल्लेख्याः सन्ति। जनसंख्याभिवृद्धौ आवासनिर्माणस्य कृते कृषिकार्येभ्यो वृहदुद्योगादिस्थापनार्थञ्च इन्धनादिकार्यार्थमपि वृक्षा उत्पाट्यन्ते वनानि विनष्टानि भवन्ति। वृक्षादीनां विनाशे सति वायोरुत्सस्य विशेषतः शुद्धवायोः प्रस्रवणस्य विनाशोऽपि जायत एव।

निरुक्तकालेऽपि वृक्षाः छिद्यन्ते स्म परं तेषां रक्षणमपि रोपणमपि भवति स्म। वायोर्महत्त्वं तत्र नितरां वर्णितम्। तत्र वायुरन्तरिक्षस्थानीयदेवतारूपेण स्वीकृतः। वायुर्वातेर्वैतेर्वा स्याद्गतिकर्मणः इत्यनेन वा गतिगन्ध-नयोः गत्यर्थकवीधातोश्च वायुशब्दो निष्पन्नो भवति।[१] अत्र निर्वचने आयुरेव वायुरिति वकारस्यानर्थकतां स्वीकुर्वन् यास्को वायोर्महत्त्वं प्रतिपादयति। निरुक्ते वास्तोस्पतिर्वायुर्विशेषरूपेण वर्णितः।

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्
सखा सुशेव एधि नः ॥[२]

वास्तुः गृहं तस्य पाता पालयिता वा वास्तोष्पतिः, हे वास्तोष्पते, त्वं समस्तरूपेषु प्रविशन् अस्माकममीवहा रोगस्य हन्ता भव तथा सुशेवः सुखप्रदाता भव। तत्रैव ऋग्वेदीयमन्त्रेण ऋषिः वायुदेवतामाह्वयति—

वायवायाहि दर्शते मे सोमा अरंकृता, तेषां पाहि श्रुधी हवम् ॥[३]

वायुरपि वर्षायाः कारणमस्ति तत्रैव दुर्गभाष्ये-

वान्ति पर्णशुषो वातास्ततः पर्णमुचोऽपरे

ततः पर्णरुहो वान्ति ततो देवः प्रवर्षति ॥

मितराविनो मितरो चिनो महद्द्रवन्तीति वा मरुतो निरुक्ते वर्णितास्तेषामेकोनपञ्चाशत् प्रभेदा अपि तत्र प्राप्यन्ते। वायुर्देवतारूपेण परमेश्वरांशभूतो निरुक्ते वर्णितः—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥[४]

निरुक्ते वायोर्विवेचनेन आयुरेव वायुरित्यनेन प्राणवायुर्भवति आयुर्वर्धकः। तत्रैव वर्णितमस्ति—

---

१. नि.१०/२, ऋ.७/५५/१

२. नि.१०१

३. तत्रैव १०/१

४. तत्रैव ७/४, ऋ.१/१६४/४६

वात आ वातु भेषजं शम्भु मयोमु नो हृदे
प्रण आयूंषि तारिषत् ॥[१]

अत्र कामयते— वायु: न: भैषज्यमावातु, अस्माकं हृदयाय कल्याण-कारको भवतु न: आयूंषि प्रवर्धयतु। वृक्षेभ्यो वनस्पतिभ्यो भेषजमात: प्रभूतं प्राप्यते अतएव वृक्षा वनस्पतयश्चात्र विशेषेण वर्णिता: संरक्षणाय प्रेरिता: कल्याणाय प्रयुक्ताश्च।

अग्नितत्त्वावरणम्—

अंगति ऊर्ध्वं गच्छतीत्यग्निशब्दोऽगि गतौ धातोर्नि प्रत्ययेन निष्पन्नो भवति।[२] अग्निरयं पञ्चतत्त्वेष्वे-कस्तेजस: प्रतीक:। उष्णस्पर्शवत्तेज:।[३] यतो यतो भवति उष्माया: प्रादुर्भावस्तत्रतत्राग्नेरस्तित्वं संभाव्यते। निरुक्ते- अग्नि: अग्रणीर्भवति, अग्रं यज्ञेषु प्रणीयते, अङ्गं नयति सन्नयमान: प्रभृतीनि निर्वचनानि कर्मरूपप्रतीकानि प्राप्यन्ते। सूर्यस्तेजस: प्रधानकारणमस्ति। तत्राग्नितत्त्वं प्रभूतं भवति। पञ्चतत्त्वैर्निर्मितेषु शरीरेषु नितरामग्नितत्त्व-मपि महत्त्वपूर्णम्। अग्निशून्यत्वं प्राणशून्यत्वस्य निर्जीवत्वस्य च लक्षणं भवति।

सृष्टेर्नियमनार्थमग्नितत्त्वस्य सन्तुलनमावश्यकमस्ति। सूर्यरश्मे: प्रभावादागतमग्नितत्त्वं जीवोत्पादने अन्नोत्पादने रक्षणे समर्थतरम्। पृथिव्यां प्रवर्धितस्य प्रदूषणस्य प्रभावोऽग्नितत्त्वेऽपि दृश्यते। प्रदूषितेऽग्नितत्त्वे उष्णतायामाधिक्यं न्यूनत्वञ्च वर्धेते। उष्णताया आधिक्येन हिमस्खलनं हिमस्य जलरूपेण प्रवर्तनं प्रभूतं भवति येन क्रमशो जलप्लावनस्य जलप्रलयस्य च स्थितिरपि भवितुमर्हति। उष्णताया आधिक्येन ध्रुवीयहिमस्खलनं तेन समुद्रे जलाभिवृद्धि:, जलवृद्धावेन जलप्रलयो भविष्यति। पुन: उष्णताया न्यूनत्वमपि शैत्यस्य कारणमस्ति। अग्ने: सन्तुलनं विना नानारोगा: प्रवर्धन्ते।

निरुक्ते अग्नेरुत्पत्तिविषये ऋग्वेदीयो मन्त्रो व्याख्यात: अग्निरद्भ्यो वैद्युतात्मना जायते, अश्मन: परि परस्पराभिघाताज्जायते, वनेभ्य: ओषधीभ्यो जायते।[४] अग्नेर्महत्त्वपि तत्र नितरां वर्णितम्... 'अग्निं यमं मातरिश्वानमाहु:'[५] तथा अग्निमीले पुरोहित[६] मित्यादिमन्त्रैरत्र सुस्पष्टम्। सूर्यादयोऽप्युष्माण: प्रवर्तका अग्नितत्त्वान्तर्भूता:। सूर्य: स्थावरजंगमात्मकस्य कार्यवर्गस्य कारणमत:— 'सूर्य आत्मा जगतस्तस्थुषश्च,' सूर्यो मित्रस्य वरुणस्याग्नेश्चक्षु: प्रकाशको वर्तते। सूर्यादय: पर्यावरणरक्षणे सर्वथा समर्था: सन्ति। सूर्यरश्मयो रोगाणुं दूषितपदार्थाञ्च विनाशयन्ति जीवेभ्य: शक्तिं प्रयच्छन्ति अन्नादिपदार्थानुत्पादयन्ति पर्यावरणस्य रक्षाञ्च कुर्वन्ति।

---

१. नि.१०/३,ऋ.१०/१४६/१
२. हला.१०९ पृष्ठे
३. तर्क सं.७ पृष्ठे
४. नि.६/१,ऋ.२/१/१
५. नि.७/४,ऋ.१/१६४/४६
६. ऋ.१/१/१

वेदा यज्ञार्थसंभवा इति, यज्ञेऽग्नेर्महत्त्वं प्रभूतम्। यज्ञाग्निमाध्यमेन पर्यावरणसंरक्षणं प्रदूषितस्य पर्यावरणस्य शुद्धिकरणञ्च जायते। यज्ञीयहवनकुण्डे प्रज्ज्वलिताग्नौ आहूतिर्दीयते। अग्निर्देवानां सविधे तेषामंशं हव्यादिकं प्रापयतीत्याध्यात्मिकं सूक्ष्मीकरणम्। स्थूलदृष्ट्या अग्नौ प्रक्षिप्तैर्हवनद्रव्यैर्निःसृतेन धूमेन रोगाणवो नश्यन्ते प्राणवायुश्च शुद्धो भवति। यज्ञीयधूमेन पर्जन्यस्य वर्षणमपि भवति। अग्नितत्त्वस्य सूर्यरश्मेश्च प्रभावाज्जलं मेघरूपेण परिवर्तितदयज्ञधूमेन प्रवर्धितो मेघो वर्षति।[१] अनेन प्रकारेण प्रदूषणस्य शुद्धिकरणमपि जायते।

जलतत्त्वावरणम्-

जलति जीवयति लोकानाच्छादयति भूम्यादीनि वा जल् + पचाद्यच्[२] इत्यनेन निष्पन्नो जलशब्दो निरुक्ते विवेचितः जलस्य पर्यायवाचिनः शब्दा आपस्तु शीतस्पर्शवत्यः प्रसिद्धाः।[३] अग्नेर्जलस्योत्पत्तिर्भवति। जलशून्यत्वे सति शरीरस्य स्थितिरनिश्चिता जायते। अतः पञ्चतत्त्वेष्वेकं जलतत्त्वं शरीरेष्वपि सर्वदा वर्तमानं भवति। जलमपि प्राणभूतम्।[४] अशुद्धजलेन रोगाणां प्रवर्धनं शक्तिहीनत्वमकालमृत्युत्वञ्चावाप्नुवन्ति मनुष्या जीवा वा।

सृष्टेर्नियमनार्थं जलतत्त्वेऽपि सन्तुलनमावश्यकमस्ति। सम्प्रति कारणवैविध्यात् जलतत्त्वेऽपि प्रदूषणं प्राप्यते। यत्र तत्र मलादिप्रक्षेपणाद् वृहदुद्योगेभ्यो निःसृतान्मलसमन्वितजलाद् विकृतपदार्थाच्च पृथिव्याः स्थितं जलमपि प्रदूषितं भवति। सम्प्रति जलप्रदूषणस्य समस्याऽपि जृम्भायिता विद्यते। नगरेषु स्वच्छजलस्य वितरणं सर्वत्र न भवति।

निरुक्ते अप् शब्दः आप्लृ व्याप्तौ धातो र्निष्पन्नो विवेचितः, सर्वत्र व्याप्तत्वादापः[५] सर्वस्मिन् शरीरेऽनिवार्यत्वेन तिष्ठन्ति। ऋग्वेदीयमन्त्रस्य व्याख्यायां यास्कः मन्नवतीं चास्मा ऊर्जकमधत्तम्।[६] आपः पवित्रमुच्यते यतो जलेन मनुष्याः पूता भवन्ति। 'शतपवित्रः स्वधया मदन्ती'[७] बहुजनवत्यः आपः स्वधया जीवान् तृप्तिं कुर्वन्त्योऽन्नमभिभवन्ति आपो हिष्ठा मयोभुवस्तान ऊर्जे दधातन महेरणाय चक्षसे॥[८]

ऋषिः कथयति हे आपः, मयोभुवः सुखस्य भावयित्र्यः यूयमस्माकमूर्जेऽन्नाय महते रमणीयाय चक्षसे धारयत।

---

१. नि.७/७
२. हला.३/३ पृष्ठे
३. तर्क सं.६ पृष्ठे
४. छान्दोग्योपनिषदि ६३१ पृष्ठे
५. नि.१४/१
६. तत्रैव ६/६,ऋ.७/४७/३
७. नि.५/२,ऋ.७/४७/३
८. नि.९/३,ऋ.१०/९१/१

पृथिवीतत्त्वावरणम्—

प्रथते विस्तारयतीति प्रथ् विस्तारे धातोः क्विन् प्रत्ययेन सम्प्रसारणञ्चेति ङीषि पृथिवीशब्दो निष्पद्यते।[१] प्रथनात् पृथिवीति निरुक्ते यास्काचार्यः।[२] गन्धवती पृथिवी गन्धग्राहकं घ्राणमिन्द्रियं नासाग्रवर्ति। अनेन ज्ञानेन्द्रियेन पृथिव्या सह प्रत्यक्षसम्बन्धो विद्यते। सर्वबीजप्रकृतिः पृथिवी अन्नादिदानैः पोषयति स्थावरजंगमादिकान्। सम्प्रति जनसंख्यायां वृद्धौ पृथिव्या दोहनमत्यधिकं भवति। पृथिव्या अनियतदोहनं यत्र तत्र मलमूत्रादिकस्य प्रक्षेपणं विविधोद्योगेभ्यो निःसृतानां विकृतपदार्थानां पातनं तस्याः प्रदूषणस्य कारणानि सन्ति।

पृथिवीतत्त्वावरणस्य प्रदूषणं पर्यावरणस्य महती समस्या वर्तते। निरुक्तकाले पृथिवी अन्नोत्पादिका कृषिकर्मयोग्या आसीत्। पुनः पृथिवीप्रसूतान् वनस्पतीनपि धारयति स्म येन प्रदूषणस्य समस्या नासीत्। ऋग्वेदीय मन्त्रस्य व्याख्यायां यास्को विवेचयति— हे पृथिवि, त्वमस्माकं कृते स्योना सुखरूपा भव, अनृक्षरा कण्टकरहिता निवासार्हा च भव तथा अस्मभ्यं सर्वतोभावेन विस्तीर्ण सुखं प्रयच्छ।[३] तत्रैव प्राप्यते यन्महतीयं पृथिवी मे बन्धुः विद्यते या अन्नेन सर्वान् वध्नाति, नूनमियं मे माता विद्यते। अत्र पृथिव्यां सर्वेषां नाभिः विद्यते यथा नाभ्या सन्नद्धा गर्भा जायन्ते तथैवान्नादिभिर्मानवाः जीवनं धारयन्ति। अतः पृथिवी सर्वेषां माता विद्यते। माता भूमिः पुत्रोऽहं पृथिव्या इतिमातृत्वकल्पनमत्रापि दृश्यते।[४] पृथिवी मातेवान्नादिदानैर्जीवान् जीवयति।

पञ्चतत्त्वेषु परिगणिताया भूमेः सम्बन्धः सर्वैस्तत्त्वैः सह विद्यते परिणामतोऽग्निजलादिदूषणेन पृथिवी अपि दूषिता भवति। पादपानां वनानामभावादपि भूमेः क्षरणं प्रदूषणञ्च दृश्येते।

प्रकृतिभूतानां पृथिव्यादीनां देवत्वकल्पनम्—

निरुक्ते पृथिव्यादयो याः प्रकृतयः पर्यावरणे परिगणिता ता देवत्वेन प्रतिष्ठिताः। वैदिककालादेव प्रकृतिदेवानां महत्त्वमृषयो जानन्ति स्म। अतः सूर्यादयः सर्वे देवा देवत्वेन पूजिताः पृथिवीस्थानीया अग्न्यादयोऽन्तरिक्षस्थानीया इन्द्रवाय्वादयो द्युस्थानीयाः सूर्यादयश्च सर्वे प्रकृतिदेवा एव विद्यन्ते।[५] निरुक्ते प्राप्यते— 'भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः'[६] पर्जन्या भूमिं जिन्वन्ति अग्नयो दिवमिति स्पष्टम्।

अदितिर्द्यौरदितिरन्तरिक्षमित्यादिमन्त्रेऽपि प्रकृतयो देवत्वेन सम्बद्धा प्रतीयन्ते।[७]

---

१. हला.४४४ पृष्ठे

२. नि.१/१

३. नि.९/३, ऋ.१/२२/१५

४. नि.४/३

५. ऋ.१/१६४/३३

६. नि.७/२

७. नि.७/७, ऋ.१/१६४/५१

निरुक्ते प्रतिपादितं मानसिकं पर्यावरणम्—

मनः मनोतेः मन् अवबोधने धातोरसुन् प्रत्ययेन मनस् शब्दो निष्पद्यते ।[१] मनसः सम्बद्धं पर्यावरणं मानसिकं पर्यावरणम् । येन पर्यावरणेन मनसो गतिः प्रभाविता भवति तस्य पर्यावरणस्य प्रभावो तत्र निश्चितमेव जायते । विविधकारणात् मानसिकं पर्यावरणमपि प्रदूषितं भवति । चिन्तनानुकूलता सर्वथा तदा विपरीता भवति । निरुक्तेऽपि प्रदूषितस्य मानसिकपर्यावरणस्य वर्णनं प्राप्यते । कामाभिभूता यमी निजभ्रातरं यमं प्रति प्रणयवचनमुपस्थापयति परं यमस्य मानसिकं पर्यावरणं प्रदुष्टं नासीत् स कथयति—

आ घा ता गच्छानुत्तरा युगानि यत्र जमयः कृण्वन्नजामि ।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ।।[२]

अत्र यास्कः कथयति— आगमिष्यन्ति तान्युत्तराणि युगानि यत्र जामयः करिष्यन्ति अजामि कर्माणि । भगिन्यो भ्रातृणां योग्यानि मैथुनसम्बन्धीनि कर्माणि करिष्यन्ति कलियुगान्ते न चायं कलियुगो वर्तते इति तत्रैव दुर्गाचार्यः । हे सुभगे, तदन्यं पतिमिच्छस्व नाऽहं तव पतिर्भोक्ताभवितुं शक्नोमि तस्मै वृषभाय रेतोवर्षयित्रे पत्ये बाहुमुपधेहीति यमस्य वचनम् ।[३]

निरुक्ते आख्यानमेकं विद्यते-देवापि श्चार्ष्टिषेणः शन्तनुश्च कारव्यौ भ्रातरौ बभूवतुः । स शन्तनुः कनीयानभिषेचयाञ्चक्रुः । देवापिस्तपः प्रतिपेदे । ततः शान्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष । तमूचुर्ब्राह्मणाः— अधर्मस्त्वयाचरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितम्, तस्मात्ते देवो न वर्षति । स शन्तनुर्देवापिं शिशिक्ष राज्येन । 'तमुवाच देवाभिः पुरोहितस्ते रसानि याजयामि च त्वेति ।'[४]

अत्र प्राप्यते यत् शन्तनोर्दूषितं मानसिकं पर्यावरणं कथं सत्यज्ञानेन परिशुद्धमभूदिति । पुनश्च तस्य भ्राता देवाभिरपि तस्य पुरोहितत्वं स्वीकृत्य यज्ञं चकार । क्षात्रधर्मस्य ब्रह्मकर्मणश्चैकत्र संयोगो दृश्यते एकस्मिन् परिवारे । मानसिकं सामाजिकञ्च पर्यावरणमत्रोपस्थितमस्ति । वर्तमानकाले मानसिकं पर्यावरणं प्रदूषितं दृश्यते । तस्यापाकरणे निरुक्तस्योदाहरणानि समर्थानि भविष्यन्ति ।

निरुक्ते प्रतिपादितं सामाजिकं पर्यावरणम्—

मनुष्याः समाजे निवसन्ति । मानवानां समाजेन सहाविनाभावो सम्बन्धो विद्यते । यदा मानवानां मानसिकं पर्यावरणं प्रदुष्टं भवति तदा तैः संघटितेषु समाजेष्वपि सामाजिकं पर्यावरणं दूषितं भविष्यत्येव । निरुक्ते सुरसमाजस्य मानवसमाजस्यासुरसमाजस्य च वर्णनं प्राप्यते । देवसमाजे पर्यावरणप्रदूषणं नासीदिति तेषां

१. नि.४११
२. ऋ.१०/१०/१६
३. नि.दु.व.४१३
४. नि.२/३

कर्मसामर्थ्यात् ज्ञायते। मानवसमाजे दायाद्यधिकारप्रसङ्गे प्राप्यते सामाजिकं पर्यावरणप्रदूषणं यत्र अभ्रातृका कन्या पितुर्दायभागस्याधिकारिणी आसीत् न तु भ्रातृमती कन्या दुहिता वा।[१]

असुरशब्दनिर्वचनेनापि सामाजिकपर्यावरणं प्रदूषणं स्पष्टं भवति। असुरशब्दोऽत्र द्विधा विवेचितः, देवताविषयको राक्षसविषयकश्च। तत्र देवताविषये असुरत्वं प्रज्ञावत्वं वान्नवत्वं वासुरिति प्रज्ञा नाम अस्त्यनर्थान् अस्ताश्चास्यामर्थाः। पुनः राक्षसवाचकदशब्दः असुरता स्थानेषु वा अस्ताः स्थानेभ्यः इति वा, असोरसुरानसृजदिति च ब्राह्मणम्।[२] अनेन सामाजिकं पर्यावरणमपि स्पष्टं भवति।

पर्यावरणशुद्धये विचारः—

निरुक्ते वर्णितमस्ति यदापः पवित्रमुच्यते। शतपवित्राः स्वधयामदन्तो[३] यतः ता अपि पुनन्ति। शतपवित्रा बहूदका इत्यनेन सूर्यरश्मयः पवित्रमुच्यन्ते, अग्निः पवित्रमुच्यते, वायुः पवित्रमुच्यते सोमःपवित्रमुच्यते, सूर्यः पवित्रमुच्यते, इन्द्रः पवित्रमुच्यते। निरुक्तोद्धृते आपस्तम्बश्रौतसूत्रेपि — अग्निः पवित्रं स मा पुनातु वायुः सोमः सूर्य इन्द्रः पवित्रं ते मा पुनन्तु इति प्राप्यते।[४]

यज्ञाद्वृष्टिर्वर्षणेन पर्यावरणप्रदूषणमुक्तिर्भवति।[५] सामाजिकपर्यावरणशुद्धये जनसंख्यानियन्त्रणस्य सदाचरणस्य च शिक्षा निरुक्ते प्रायते- बहुप्रजा कृच्छ्रमापद्यत इति परिव्रजाकाः।[६] प्रदूषणमुक्तस्य गृहस्यापि वर्णनं तत्र प्राप्यते— तानि वास्तूनि गृहाणि गमध्यै गमनाय कामयामहे यत्र प्रकाशपूर्णा रश्मयः सञ्चरणशीलाः विद्यन्ते, यत्र च भूरिशृंगा गावो विद्यन्ते।[७] यज्ञादिमाध्यमेनापि पर्यावरणशुद्धिर्भवति।

उपसंहारः—

पर्यावरणसम्बद्धानि यानि तत्त्वानि प्रकृतिसम्बद्धानि विद्यन्ते तानि प्रायेणान्योन्याश्रितानि सन्ति। एकस्य तत्त्वस्य दूषणेनापरस्य दूषणं जायते। निरुक्ते प्राकृतिकपर्यावरणतत्त्वानि विस्तरेण वर्णितानि सामाजिकमानसिकादीनि पर्यावरणप्रदूषणानि संकेतितानि सन्ति। तत्राग्न्यादिभौतिकपदार्था मानवोपकारकाः प्रत्यक्षदेवत्वेन सम्मानिताः पूजिताश्च। ते प्रकृतिदेवा यज्ञादिमाध्यमेन साधनाबलेन च तेषामृषीणां वशवर्तिन आसन्। तदानीं तेषु तत्त्वेषु प्रदूषणस्य शंकाऽऽसीत् तस्य समस्या नासीत्। तत्र वर्णितमस्ति ऋषि या ओषधयो देवेभ्यः पुरा जातास्तासां वभ्रुवर्णानां त्रिदोषहारकाणां भरणपोषणे समर्थानां सप्तोत्तरशतं धामानि जातिविशेषेण प्रसृतानि नामानि अहं

१. निरुक्तम् — ३/१
२. तत्रैव—३/२
३. ऋ ७/४७/३
४. नि.२/२
५. नि.२/३,ऋ.१०/९८/५
६. नि.२/२
७. नि.२/२

जानामीति कथयति ।[१] निरुक्ते पृथिवी मातृरूपेण बन्धुरूपेण च प्रतिपादिता । शकुनि शुन्ध्युः शोधनक्रियायोगात् उदकचरो भवति । जलशुद्धौ शकुनेर्महत्वमत्र वर्णितमस्ति । जलमपि शुन्ध्युर्भवति यतो हि इदमपि सर्वेषां मलं प्रक्षालयति । सूर्योऽपि शुन्ध्युरुच्यते यतोऽयमपि रश्मिभिः सम्पूर्णं जगच्छोधयति ।[२] पृथिवी अस्माकं कृते नृक्षरा भवतु उत्तमनिवासयोग्या भवतु सुखञ्च प्रयच्छतु इति कामना तत्र प्राप्यते ।[३]

अनेन प्रकारेण स्पष्टं भवति यत् प्राकृतिकपर्यावरणस्य मानसिकपर्यावरणस्य सामाजिकपर्यावरणस्य च यानि अंगानि निरुक्ते प्रतिपादितानि सन्ति तानि जनकल्याणाय विश्वकल्याणाय च चिन्तनीयानि सन्ति । पर्यावरणस्य रक्षणं तु सर्वेषां कल्याणाय विद्यत एव तेषां रक्षणेन प्रदूषणं न भविष्यतीति दिक् ।

---

१. नि.९/३, ऋ.१०/९७/१

२. नि.४/२

३. तत्रैवे—७/३

संस्कृतवाङ्मये ऋतुविज्ञानं प्राकृतिकस्रोतांसि जलञ्च

डॉ० विवेकपाण्डेयः

विविधानामन्यविज्ञानानामिव ऋतुविज्ञानस्यापि प्राचीनभारते पूर्णो विकास आसीत्। दुःखस्य क्षोभस्य चायं विषयो यत् सम्प्रति भारतीयविज्ञानस्योपरि अपेक्षितं ध्यानं न दीयते। एवं प्रतीयते यत् पाश्चात्त्यविज्ञानं पूर्णतया विकासप्राप्तमस्ति, ततुलनया भारतीयप्राचीनवाङ्मये निहितस्य विज्ञानस्य अद्य कापि उपयोगिता नास्ति इति भ्रान्तिः अस्माकं मनस्सु सुदृढलब्धपदा अस्ति; किन्तु एषा भ्रान्ता धारणा नूनमेव अपगता भविष्यति यदि अस्माभिः प्रयत्नपूर्वकं प्राचीनभारतीयविज्ञानानां विषये अन्वेषणदृशा किञ्चित् कर्तुं केचन प्रकल्पाः प्रकल्प्येरन्।

पाश्चात्त्यविज्ञानविषये पूर्वाग्रहं परित्यज्य विचारणेन स्पष्टं परिज्ञायते यत् एतेषां सर्वोपि शोधविधिः बहुमूल्येषु यन्त्रेषु अन्यासु च शोधसामग्रीषु निहितो विद्यते। अत्र बाह्यसंसाधनापेक्षा अतितरां विद्यते। विज्ञानविदपेक्षया अधिकं महत्त्वं यन्त्राणां तत्प्रयोगविधेश्चास्ति। प्राचीनभारतीयविज्ञानेषु नैषा स्थितिः अत्र ज्ञानस्य प्रयोगस्य च मध्ये अविच्छेद्यः सहजश्च सम्बन्धो वर्तते। तत्र बहुमूल्यसाध्यानां यन्त्राणां कापि अपेक्षा नास्ति, प्रयोगशालापि नापेक्ष्यते प्राचीनभारतीयविज्ञानानि यन्त्राधारितानि नासन् अपि तु प्रकृतेः सहजसुलभान् पदार्थान् स्वकीयज्ञानोपकरणविषयीभूतान् विधाय भारतीयविज्ञानविदः स्वचिन्तितस्य साधनासमुद्भूतस्य निष्कर्षान् लोकसमक्षं प्रस्तोतुं सहजताया प्रयोगपराः बभूवुः। अतएव भारतीयानां वैज्ञानिकानां कृते प्रयोगशालारूपेण सेयम् अनन्तानन्तसामग्रीसम्भरणशीला वसुन्धराऽसंख्यनक्षत्रतारादिभिः समलङ्कृतमन्तरिक्षम् उभयोर्मध्ये पशुपक्षिरूपाः चराः, पर्वतादिरूपाः अचराः एव आसन्। इत्थं स्वाभाविकमन्त्रयन्त्रयोः मिथः सम्बन्ध एव प्राचीनभारतीयविज्ञानानां वैशिष्ट्यम्।

प्राचीनभारतीयविज्ञानेषु अन्यतमं विज्ञानम् ऋतुविज्ञानमेव ममास्य शोधनिबन्धे विशेषरूपेण विवेचनविषयोऽस्ति। प्रसङ्गतः तत्सम्बद्धजा मेघवृष्ट्यादिविषयाः अपि यथावसरं विवेचिताः सन्ति। वृष्टिमूला कृषिः सर्वा वृष्टिमूलश्च जीवनम्। तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरत।

सृष्टिप्रक्रियायां सर्वप्रथमं जलतत्त्वस्यैव उत्पत्तिरभूत्।[१] ततः जलतत्त्वात् आकाश आकाशाद् वायुः वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी।[२] सृष्टेरेष क्रमः विविधेषु शास्त्रेषु निर्दिष्टोऽस्ति। अतएव महाकविना

१. अप एव ससर्जादौ —मनुस्मृतिः १/८

२. तैत्तिरीयोपनिषद् २/१

कालिदासेन 'या सृटिः स्रष्टुराद्या'[१] इति उक्तम्। तात्पर्यतः विधातुः आद्या सृष्टिः जलतत्त्वरूपा, यतः सर्वं भूतजातमुदपद्यत। ऋग्वेदानुसारेण कदाचित् सृष्टिरियं तमसाच्छन्ना आसीत्— 'तम आसीत् तमसा गूढमग्रे अप्रकेतं सलिलं सर्वमा इदम्'[२] अर्थात् पूर्वं सर्वत्र जलमेवासीत् शतपथब्राह्मणं तैत्तिरीयब्राह्मणं चापि एतत् तथ्यं समर्थयतः। परमेश्वरस्य एकं नाम 'नारायण' इति अस्ति यत्र 'नार'शब्दस्यार्थः जलमस्ति 'अयनं' इत्यस्य अर्थः आस्पदं निलयो वाऽस्ति। यथोक्तं मनुस्मृतौ —

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
तास्तदस्यायनं पूर्वं तेन नारायणः स्मृतः॥[३]

जलमेव जीवनस्य आधारभूतं तत्त्वम् आसीत्। किं बहुना जलमेव जीवनमासीत्। यथोक्तं अमरकोशे—

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्।
पयः कीलालममृतं जीवनं भुवनं वनम्॥[४] ....

नराणां सर्वप्राणिनां वा आश्रयभूतं तत्त्वं जलमेवास्ति।

विश्वस्मिन् जगति मानवजातेरितिहासः जलोपलब्धताया इतिहासोऽस्ति। विश्वस्य प्रमुखाः सभ्यताः नदीनां तटेष्वेव विकासमलभन्त। यथा नीलनदीतटे मिश्रसभ्यता, हांगहोनदीतटे चीनसभ्यता, सिन्धुतटे सिन्धुसभ्यता च।

सर्वतः प्राचीने वैदिकशब्दकोशे निघण्टौ जलस्य शतं नामानि परिगणितानि सन्ति। यद्यपि साम्प्रतं जलशब्द एव बहुलतया प्रचारं प्राप्तोऽस्ति किन्तु वैदिकयुगे अस्य शब्दस्य तावान् प्रचारो नासीत्, यतो हि पैप्पलादसंहितायां केवलम् एकस्मिन् स्थाने एव अस्य प्रयोगः उपलभ्यते। जलशब्दस्य विविधानि नामानि अस्य विविधं वैशिष्ट्यम् प्रकटयन्ति। तथा हि अस्य प्रवाहशीलताम् अभिलक्ष्य अस्य एकं नाम 'सरिरं' 'सलिलं' इति वा विकसितमभवत्। शब्दोऽयं सरणार्थकाद् 'सृ' धातोः निष्पन्नोऽस्ति यो नदादीनां जलस्य संसूचकश्चास्ति। एकः अन्यः शब्दोस्ति 'नीर' इति। अयं 'नि' उपसर्गकगत्यर्थकाद् ईर् 'धातोः विकसितः अस्ति। 'वाचस्पत्य' नामकस्य कोशस्यानुसारेण 'निर्गतं रादग्नेः नीरम्' अथवा निर्गतो रोऽग्निर्यस्मात्तद् नीरम्' इति व्युत्पत्तिः अस्ति। केषाञ्चित् मतेन प्रापणार्थकात् णीञ् इति धातोः रप्रत्यये कृते नीरशब्दः व्युत्पद्यते— 'नयति इति नीरम्' प्राचीनकाले भारवतां पदार्थानामेकस्मात् स्थानात् अपरं स्थानं नयनार्थं गतिमतः जलस्य प्रयोगोऽभवत्। सांख्यमतानुसारेण[५] जलं रसतन्मात्रात् समुद्भूतं पञ्चमहाभूतेषु एकतमम्। न्यायशास्त्रे जलस्य उत्पत्तिः जलपरमाणुभ्यः स्वीकृताऽस्ति।

१. अभिज्ञानशाकुन्तलम्– १/१
२. ऋग्वेदः–१०/१२९/३
३. मनुस्मृतिः– १/१०
४. अमरकोशः– १/९/३
५. भूतादेस्तन्मात्रः स तामसः तैजसादुभयम्–सांख्यकारिका का० २५

जलस्योत्पत्तिसमये पूर्ववर्ती वायुः अस्य सहयोगिकारणं निमित्तकारणं वा अभिप्रेतुं शक्यते। जलतत्त्वस्य भौतिकविवेचनदृशा 'अग्नेरापः' इति उपनिषद्वचनं सर्वथा वैज्ञानिकमस्ति। छान्दोग्योपनिषदः शाङ्करभाष्ये— 'तेज एव तत्पूर्वमात्मानमुद्भूतं दर्शयित्वाऽथानन्तरमपः सृजतेऽतोप्सृष्टत्वाद् भूयोऽद्भ्यस्तेजः'[१] इति यदुक्तं तत् आधुनिकं वैज्ञानिकं विश्लेषणमेव अनुहरति। आधुनिकं विज्ञानमपि जलस्य उत्पत्तिं सम्बन्धं वा तैजसतत्त्वेन सह अङ्गीकुर्वन्ति यथा H_2O इति सूत्रम्। यथा घनीभूततत्त्वस्थितौ सुवर्णं द्रवरूपस्थितौ घृतं तैजसतत्त्वेषु परिगण्यते तथैव वायुतत्त्वस्थितौ ऑक्सीजन (O) इति नाम तेजसमेव। पृथिव्यां शरीरे वा अन्तः बहिर्वा यज्ज्वलनशीलं तत्त्वम् अस्ति तत् सर्वस्य कारणभूतं 'ऑक्सीजनं' नामकं तत्त्वं तैजसमेव। यदा हाइड्रोजन (H)नामकस्य वायुरूपं तत्त्वं माध्यमं कृत्वा ऑक्सीजननामकं तत्त्वं ज्वलति तदा तत्त्वस्यास्य जलस्य उत्पत्तिः भवति। 'निर्गतं राद्वह्लेरिति' नीरशब्दस्य व्युत्पत्तिः आधुनिकवैज्ञानिकविश्लेषणसम्मताऽस्ति। ऑक्सीजनरूपस्य तैजसतत्त्वस्य सूर्यांशभूतत्वात् क्वचित् जलस्य उत्पत्तिः सूर्यात् स्वीकृता अस्ति तदपि समञ्जसमेव—

'सूर्याद् हि जायते तोयम्' इत्यादि।

आधुनिकविज्ञानस्य प्रयोगशालासु ऑक्सीजनहाइड्रोजनयोः संश्लेषणविधिना जलस्य उत्पत्तिं प्रदर्शयितुं एकस्मिन् प्रयोगपात्रे उभयं निधीयते। विद्युत्स्फुलिंगैः उद्दीप्तं ऑक्सीजननामतत्त्वं विस्फोटेन सह तेजः उद्गिरत् जलमुत्पादयति यथा काष्ठादिषु निहतं तेजः वह्निसम्पर्केण उद्दीप्तं भवति। यदा ऑक्सीजननामकं तत्त्वं विस्फोटेन सह हाईड्रोजनतत्त्वं ज्वालयति तदा ऑक्सीजनतत्त्वस्य एकः परमाणुः (O) हाइड्रोजनतत्त्वस्य परमाणुद्वयं (H_2) प्रज्वाल्य जलस्य एकम् अणुं उत्पादयति (H_2O)। अनेन एतत् सिद्ध्यति यत् सविशेषाग्निपुञ्जस्य उपस्थितेः पश्चात् एव जलस्य उत्पत्तिः सम्भवा। एतद्विपरीता स्थितिरपि प्राच्यप्रतीच्योभयवैज्ञानिकैः स्वीकृताऽस्ति।

उभयविधा जलोपस्थितिः प्राचीनैर्भारतीयैर्वैज्ञानिकैः कदाचित् सुव्यवस्थिततररूपेण विवेचितास्ति। तैत्तिरीयोपनिषदनुसारेण 'अग्नेरापः' 'अद्भ्यः पृथ्वी' पृथिवीभ्योऽन्नम्[२] अर्थात् अग्नेः जलम् उत्पन्नं जलात् पृथिवी उत्पन्ना पृथिव्या अन्नस्योत्पत्तिरभवत्। जलादग्नेः समुत्पत्तिविषये प्रशस्तपादभाष्यं व्याहरति तेजःप्रकरणे 'अबिन्धनमिति'[३] अर्थात् जलमेव इन्धनं यस्य इति। महाकविः कालिदासोऽपि रघुवंशमहाकाव्ये व्याहरति समुद्रो जलमात्मानम् इन्धनं कृत्वा आत्मनि अग्निं धारयति — 'अबिन्धनं बलिमसौ बिभर्ति।'[४] वैशेषिकसूत्रे — 'अपां संयोगाद्विभागाच्च स्तनयित्नोः'[५] जलस्य शब्दनशीलस्य संयोगात् विभागाच्च विद्युद्रूपं दिव्यं तेजः उत्पद्यमानं दृश्यते। तत्र 'विस्फूर्जथुर्लिङ्गम्' अर्थात् अनया प्रक्रियया भयंकरं गर्जनं भवति।

---

१. छान्दोग्योपनिषद् — ७/११/१

२. तैत्तिरीयोपनिषद् — २/१

३. प्रशस्तपादभाष्यम् — ७/११/१

४. रघुवंशम् — १३/४

५. वैशैषिकसूत्रम् — ५.२.११

जलावस्थासन्दर्भे भारतीयपाश्चात्यमतयो: क्वचित् समानता विद्यते अन्यत्र क्वचिदसमानताऽपि। वैशेषिकमतानुसारेण द्रवगुणकारणादेव जले स्यन्दनं प्रवाहो वा भवति।[१] परवर्तिषु न्यायग्रन्थेषु अपि जलस्य प्रथमक्षणे प्रवाहक्रियाया: असमवायिकारणरूपेणात्र द्रवगुण: स्वीक्रियते।[२] भारतीयविदुषाम् अनुसारेण पृथिवी जलवायुषु क्रमश: कठोरमृदुस्पर्श:, स्वाभाविकद्रवत्वम्, तिर्यग्गतिश्च एते विशिष्टधर्मा: वस्तुनिष्ठतया निरपेक्षरूपेण च अभिमता: सन्ति। तेषु तेषु द्रव्येषु एव क्रमश: ते ते धर्मा: भवन्ति नान्यत्र। इदमपि मन्तव्यं यत् तेषु तेषु द्रव्येषु ते ते धर्मा: नित्यरूपेण तिष्ठन्ति एव तद्वियुक्ता: न भवन्ति।

जलस्य स्वादविषये वर्णविषये च भारतीयपाश्चात्यमतयो: महान् भेदोऽस्ति आधुनिकविज्ञाने विशुद्धं जलं रसहीनं स्वादुरहितं वर्णरहितं च स्वीकृतमस्ति किन्तु प्राचीनभारतीयविद्वांसो जलं स्वादुयुक्तं वर्णयुक्तं वा मन्यन्ते। 'अपां हि तृप्ताय न वारिधारा स्वादु: सुगन्धि: स्वदते तुषारा:'[३] न्यायशास्त्रानुसारेण जलं शुक्लवर्णं मधुरशीतलस्पर्शक्य वर्णितम् अस्ति — 'वर्ण: शुक्लो रसस्पर्शौ जले मधुरशीतलौ।' इति एतन्मतानुसारेण शीतस्पर्शनामको गुण: जले नित्यसम्बन्धेन तिष्ठति। यथा अग्नि: उष्णगुणं हातुं न शक्नोति तथैव जलं शीतगुणं न त्यजति — 'अप्सु शीतता'[४] इति।

कालिदासेन रघुवंशे — 'उष्णत्वमग्न्यातपसम्प्रयोगाच्छैत्यं हि यत् सा प्रकृतिर्जलस्य।'[५] इति च अग्निसंयोगात् जलम् उष्णमपि भवति किन्तु उष्णता जलस्य स्वाभाविको गुणो नास्ति यतो हि अग्निसंयोगाभावे जलं पूर्ववत् शीतलं जायते।

इत्थं जलस्य संस्कृतवाङ्मये समुपलब्धस्य इतिहासस्य स्वरूपस्य च विवेचनेन इदं स्पष्टं भवति यत् प्रायश: प्राचीनविज्ञानाधुनिकविज्ञानयो: साम्यमेवास्ति।

जलतत्त्वस्य विश्लेषणानन्तरं तत्सम्बद्धमेघानां स्वरूपस्य ततो जाताया: वृष्टेश्च वैज्ञानिकं विवेचनं, प्रसङ्गप्राप्तमस्ति। कालिदासकृते मेघदूते मेघोत्पत्तिविषये संक्षिप्त: संकेत: मेघविषयकस्य गभीरज्ञानस्य परिचायकोस्ति —

'धूमज्योति:सलिलमरुतां सन्निपात: क्व मेघ: इति।'[६]

धूमज्योति:सलिलमरुतां संघातेन मेघस्य उत्पत्ति: भवति। अत्र 'धूम' शब्देन वायुमण्डले विद्यमानस्य रज:कणस्य ग्रहणं क्रियते यत् जलवाष्पसम्पर्कात् धूमरूपेण प्रतीयते। अग्ने: धूमे दग्धकाष्ठस्य सूक्ष्मकणा: औष्ण्यहेतो: उपरि गत्वा वायुमण्डले दृष्टिगोचरा: भवन्ति। वायुद्वारा उपरि उत्थापितेन जलबाष्पेन सम्पृक्त:

१. द्रवत्वात् स्यन्दनम् — वैशैषिकसूत्रम् ५.२.४
२. द्रवत्वमाद्यस्यन्दनासमवायिकारणम् — तर्कभाषा, प्रमेयनिरूपणम् पृ० २०५
३. नैषधीयचीरतम् — ३/९/३
४. कारिकावली — श्लो० ३९
५. रघुवंश: — ५.५४
६. मेघदूतम् — पूर्वमेघ: — श्लोक: ५

रजःकणः धूमरूपेण दृष्टिगोचरो भवति। उष्णवायोः सम्पर्काद् जलबाष्पः जलरूपे न परिणमते किन्तु धूमायितं वायुमण्डलं तादृशं रूपं धारयति। ज्योतिस्तु सूर्यकिरणानां संतापः तेजो वा अस्ति। सलिलं जलबाष्पस्य शीतसम्पर्कात् समुत्पन्नं जलमेवास्ति। मरुत्तु मेघानां वाहकः वायुरस्ति। यथा आधुनिकाः वैज्ञानिकाः मेघानां स्वरूपं तेषां नीचोच्चस्थितिदृष्ट्या तेषां विविधान् प्रकारांश्च वर्णयन्ति तथैव प्राचीनभारतीयवैज्ञानिकैरपि मेघानां वत्सर-क्रमं स्वरूपं चानुसृत्य विविधाः प्रकाराः वर्णिताः सन्ति। आधुनिकविज्ञानपद्धतौ सर्वप्रथमं ऊनविंशशताब्द्याः प्रारम्भे ल्यूकहावर्डमहोदयः मेघानां चतुरः प्रकारान् (Cirrus, Cumulus, Stratus and Nimbus इत्याख्यान्) वर्णितवान्। परवर्तिनो वैज्ञानिकाः एषां चतुर्णां प्रकाराणां उपभेदान् निर्दिश्य दशधा विवेचितवन्तः।

प्राचीनभारतीयविद्वांसः वत्सरविशेषे सृष्टिसूचकान् क्वचित् चतुरः प्रकारान् क्वचिच्च नव प्रकारान् वर्णितवन्तः। अत्र वत्सरविशेषे वत्सराङ्कगणनाद्वारा ज्ञातो मेघविशेषः तद्वत्सरस्य वृष्टेः परिमाणं प्रकारं च सूचयति। एषां मेघानां नामानि सन्ति—आवर्तः, संवर्तः, पुष्करः, द्रोणः, कालः, नीलः, वरुणः, वायुः, तमश्च। कृषिपाराशरे चतुर्विधानां मेघानां वर्णनम् एवम् अस्ति—

आवर्तश्चैव संवर्तः पुष्करो द्रोण एव च।
चत्वारो जलदाः प्रोक्ता आवर्तादियथाक्रमम्॥[1]

अन्यमतानुसारेण मेघस्य नव प्रकाराः सन्ति —

ततश्च वर्तसंवर्तपुष्करद्रोणकालकाः।
नीलश्च वरुणो वायुस्तमो मेघाः स्मृता नव॥[2]

आवर्तप्रभृतीनां मेघानां वर्षणक्षमताविषये पराशरेण वर्णितमस्ति —

एकदेशेन चावर्ते संवर्ते सर्वतो जलम्।
पुष्करे दुष्करं वारि द्रोणे बहुजला मही॥[3]

'वृषु सेचने' इति धातोः 'स्त्रियां क्तिन्' इति सूत्रेण भावे क्तिनि प्रत्यये सेचनार्थे वृष्टिशब्दः निष्पद्यते। वृष्टिस्तु तुषारकरककुज्झटिकाभेदेन बहुविधा भवति। किन्तु सामान्यतः वृष्टिशब्दः जलवृष्टेरेव बोधको भवति। सूर्यकिरणानां तापैः तप्तं जलं जलबाष्परूपे परिवर्तितं भवति। तदेव जलबाष्पं वायुना उच्चैः आकाशे नीत्वा शैत्यसम्पर्कात् पुनः जलकणरूपे परिवर्त्यते। यदा शैत्यात् वायौ संकुचनमायाति तदा परस्परं निकटमागत्य जलकणाः सम्भूय भारवन्तो भवन्ति तदा वायोः तद्वहने असामर्थ्यात् जलकणाः पृथिव्याः उपरि पतन्ति। एषा एवं जलवृष्टिप्रक्रिया। जलस्य बाष्परूपेण परिणमनार्थं वर्षणपर्यन्तं कश्चित् कालांशः अपेक्षितो भवति, यः वृष्टिगर्भ-

१. कृषिपाराशरम् पृ० ६, श्लोकः २४
२. संवत्सरफलम् — पाण्डुलिपि-सं. ३४३९८ पृ० १०
३. कृषिपाराशरम्—श्लोक २५

कालो व्यपदिश्यते । कृत्स्नमिदं वृष्टिचक्रं केनचित् दिव्यनियन्त्रा नियन्त्रितं भवति । ब्रह्मवैवर्तपुराणानुसारेण एष नियन्ता ईशेच्छा । वृष्टिप्रक्रिया सैषा ब्रह्मवैवर्तपुराणे वर्णितास्ति —

सूर्यग्रस्तश्च नीरश्च काले तस्मात् समुद्भवः ।
सूर्यो मेघादयः सर्वे विधात्रा ते निरूपिताः ॥
हस्ती समुद्रादादाय करेण जलमीप्सितम् ।
दद्याद् घनाय तद् दद्याद् वातेन प्रेरितो घनः ॥
स्थाने स्थाने पृथिव्यां च काले काले यथोचितम् ।
ईशेच्छयाऽऽविर्भूतं च न भवेत् प्रतिबन्धकम् ॥[१] **इति च ।**

अत्र प्रथमश्लोकस्य पूर्वार्द्धे प्रयुक्तः 'काल' शब्दः वृष्टिगर्भावधिबोधकः अस्ति । द्वितीयश्लोके सूर्यकरैः जलदानं करिणां शुण्डरूपकरेण कृतं जलदानमिव इति वदता पुराणकारेण उपमालंकारः समाश्रितः । छान्दोग्योपनिषदः शाङ्करीये भाष्ये यत् जलस्य तेजोयोनित्वरूपेण वर्णनं प्रस्तुतप्रसङ्गे वर्षासन्दर्भेऽपि तस्य तेजोयोनित्वं संकेतितं भवति । अत्र तेजःशब्देन सूर्यतेजः सूर्योष्मा वा गृह्यते

अन्ते निष्कर्षरूपेण एवमेव व्याहर्तुं शक्यते यत् संस्कृतवाङ्मये जलविषयकं मेघविषयकं जलमेघयोरुत्पत्तिविषयकं वा यत्किमपि वर्णनं विद्यते तत् आधुनिकवैज्ञानिकीः एतद्विषयिणीः समुपलब्धीः अतितरामतिशेते । विषयेऽस्मिन् आधुनिकविज्ञानसहयोगेन प्रयोगशालामाध्यमेन पूर्वाधिकम् अनुसंधानम् अपेक्ष्यते । इति शम् ।

१. ब्रह्मवैवर्तपुराणम्-श्रीकृष्णजन्मखण्डम् २१तमोऽध्यायः श्लोकः—१०५

मानवसभ्यतायै भारतीयसंस्कृतेर्योगदानम् इदानीन्तन-समस्याः, समाधानञ्च

डॉ. विष्णु पोट्टी

स्वतन्त्रताप्राप्त्यनन्तरं भारतीयसंस्कृतेः मूल्यसंरक्षणार्थं प्रचारार्थञ्च महान् प्रयत्नः प्रचलति । कस्यापि राष्ट्रस्य प्राणाः तस्य संस्कृतिर्भवति । राष्ट्रस्य स्वीया काऽपि संस्कृतिः मूल्यवती नास्ति चेत्संसारे तस्य राष्ट्रस्य स्वत्वमेवाप्रकटितं भवति । अतो जगति सर्वेऽपि स्वीयसंस्कृतेर्मूल्यस्याभिरक्षणाय यतमानास्सन्ति ।

संस्कृतिशब्दस्य वास्तविकार्थविश्लेषणेनैव कस्या अपि संस्कृतेः स्वरूपावगमः सुलभः । प्रथमं विचार्यते संस्कृतिशब्दस्य तथ्योऽर्थः क इति । तथा च का नाम भारतीयसंस्कृतिरिति । अनन्तरञ्च भारतीयसंस्कृतेः वैशिष्ट्यं, आधुनिकभौतिकविज्ञानेन तस्याः अपकारो वा ? कथञ्च भौतिकविज्ञानेन तस्याः समन्वयः ? इत्यादिविषयाणां यथामति दिङ्मात्रं विचारः प्रस्तूयते ।

अत्र संस्कृतस्य संस्कृतेश्च भारतसम्बन्धेन विवक्षाया संस्कृतं भारतीयं भवतीति संस्कृतिश्च भारतीया भवतीत्यायातम् । तत्र पुनः भारतीयमेवोभयं भवतीति वा भारतीया भवत्येव इति वा प्रश्नद्वयमायाति । आद्ये पुनस्संस्कृतसंस्कृत्योः स्वत्वपरिच्छिन्नत्वाभ्युपगमः किमर्थमिति प्रश्नः आयाति । द्वितीये तु साङ्कर्यमायाति । तर्हि उभयमपि सार्वजनीनं विश्वसम्बन्धि इत्यायाति । अन्ते च संरक्षणमित्यत्र विचारः कार्यः । संगृहीतस्य वस्तुनः अपायपरिहारेण स्थिरतापादनं संरक्षणं भवति । आपायोन्मुखस्य दोषपरिहारेणापायात्संरक्षणमपि । अत्र विचार-विषयः पूर्वोक्तेषु कः इति चिन्तनीयोऽस्ति ।

अत्र विचार्यमाणे अस्माभिरिदं ज्ञातुं शक्यते यदस्माकं या प्राचीनवैदिकपरम्परा सा अविच्छेदेन अद्याप्युन्मिषतीति । किन्तु कालपरिणामवशात्तत्रापि किञ्चिदिव विपरिलोपो दृश्यते । अतः चिन्त्यते अस्माभिः यदपायोन्मुखायाः संस्कृतेः दोषपरिहारः कर्तव्य इति । संरक्ष्यमाणस्य वस्तुनः मूल्यमपि संरक्षणे प्राधान्यमर्हति निर्मूल्यस्यासंरक्ष्यमाणत्वात् । तत्र विचार्यमाणे प्राचीना काचन महत्त्वपूर्णा सर्वसमादरणीया सभ्यता यस्याः मूलभूता संस्कृतिर्विशिष्टा । इदानीं यद्रूपेण सा अस्ति, तथैव सा अस्माभिः दायादक्रमागता संपत्तिरिव उत्तराधि-कारिणे दातव्या । तर्हि तथैव सा तिष्ठति वा इति प्रश्नः । तथा अनुपलभ्यमानत्वात् प्रत्यक्षेणैव तत्र विपरिलोपो दृश्यते । तर्हि विलुप्यमाना या उन्नता संस्कृतिः तस्याः विलोपात् त्राणनमपेक्षितमिति सिद्धम् । अतः तादृशमहनी-यसंस्कृतेराश्रयो भवतीति सुसंपन्ना संस्कृतस्यापि संरक्षणार्हता ।

भारतीयसंस्कृतेर्लक्षणं भवति धर्मः । आपाततः यस्मात्स्वस्य परस्य अभ्युदयः भवति परस्य च न हानिः स च धर्मः । यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः इति दार्शनिकाः । आत्माभ्युदयिकं कर्म क्वचिदपि परोत्सादनकं न भवेदिति मूलभूतमस्माकं धर्मतत्त्वम् । वेदस्स्मृतिसदाचारः स्वस्य च प्रियमात्मनः इति मनुवचनम् । अर्थकामाभ्यां धर्मोन्मुखाभ्यां भवितव्यम् । कालिदासः कथयति "अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः" इति । पवित्रमिदं राज्यमाश्रमतुल्यम् । तत्र तपः धर्मव्यवस्थापनम् । तत्र त्रिगणबाधां विना सर्वे वयमधिकारिणः महर्षितुल्याः । भारविवचनमपि तत्र श्रद्धेयम् । "न बाधतेऽस्य त्रिगणः परस्परम्" इति । वार्तामयेऽस्मिन् समुदाये केवलं भौतिकफलमात्रमुपभुज्य परोत्सादनेन विना सुखेन जीवनं कथं कर्तुं शक्यत इति प्रश्नः । पुनश्च अस्माकं करतलामलकवल्लब्धसुखानामुपभोगाय भाविसमुदायस्य परम्परायाश्च नाशः कारणीयो वा इत्यपि । नास्माभिर्विरुद्ध्यते सुखं जीवनम् । किन्तु उच्यते "मा गृधः कस्यस्विद्धन"मित्येव ।

लौकिकालौकिकधार्मिकार्थिकराजनैतिकादिजीवनस्य समस्तक्षेत्रेषु आभ्युदयिकः देहेन्द्रियादिचेष्टाजनकः समीचीनः आत्मभूषणभूतः प्रयत्न एव संस्कृतिशब्दोपबृंहितार्थाः । सङ्क्षेपे तु आत्मभूषणभूता समीचीना कृतिः संस्कृतिरिति । तादृशसंस्कृत्या मनुष्यः सर्वक्षेत्रेष्वभ्युन्नतिं प्राप्नोति ।

सर्वाभ्युदयाय यः आचारविचारः यन्निदानज्ञानं तदपि संस्कृतिः । वैयक्तिकसामाजिकार्थिककलावैज्ञानिकराजनैतिकधार्मिकक्षेत्रेषु तथा अभ्यवहारवेषभूषा-उपासनादिषु च आचारविशेषोऽनुवर्तते स एव भारतीयसंस्कृतेः लक्षणम् । अत्र यो विशेषः सोऽयं भवति यः पूर्वोक्ताचारः वेदशास्त्राद्यनुशासनाविरुद्धः । सा च भारतीया संस्कृतिः वैदिकावैदिककर्मणां परम्परागतानां पितृपितामहाद्यनुष्ठितानां शासनानुशासनाविरुद्धानां पौनःपुन्यानुष्ठानेन प्रत्येकस्मिन् भारतीये यः संस्कारः आगच्छति तस्य संस्कारस्य उत्पादयित्री भवति ।

संस्कृतिः संस्कारश्च

सम्यक् करोतीति संस्कारः । संशोधिते अच्छे आलोके प्रतिबिम्बं सुव्यक्तं भाति । सुवर्णकारेण शाणाघर्षणेन रसायनादिभिः प्रक्षालनेन वा सुवर्णमाला चाचक्यते । अयं संस्कारः मलापनयनसंस्कारः । तद्वत् "व्रीहीन् प्रोक्षति" इत्यादिस्थलेषु यागोपयुक्तसंस्कृतव्रीहीनां मन्त्रपूतजलप्रोक्षणेन न मलापनयनं भवति । अपि तु तत्र अतिशयाधानं भवति । चन्दनादिलेपनैः शरीरस्य शोभा अभिवर्द्धते । तत्र शरीरे कोप्यतिशय आयाति । अयञ्च संस्कारः अतिशयाधानसंस्कारः । उक्तञ्च भगवत्पादैः "संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयेन वा" इति ।

न्यायनयेन च संस्कारेषु त्रिविधेषु भावनाख्यसंस्कारः अनुभवजन्यः स्मृतिजनकश्चात्मनिष्ठो गुणविशेषो भवति । चित्रशिल्पादिकलासु अभ्यासेन आत्मनि योऽतिशयो जायते तदा आत्मनि संस्कारः दृढतरो भवति ।

"तत्तज्जात्युचितौ शिल्पे भूयोऽभ्यासेन वासना ।
कौशलातिशयाख्या या भावनेत्युच्यते हि सा ॥

अन्यच्च "स्वाश्रयस्य प्रागुद्भूतावस्थासमानावस्थान्तरोत्पादकोऽतीन्द्रियो धर्मः संस्कारः"इति । योगिनामभिप्रायेण न केवलं मानससङ्कल्पविचारादेरपि तु इन्द्रियमनोबुद्ध्यहङ्कारादीनामपि व्यापारेण संस्कारः समुत्प-

द्यते । तस्मात्समीचीनासमीचीनकर्मभि: कोऽपि संस्कार: उत्पद्यत एव । उत्कृष्टकर्मभि: उत्कृष्टसंस्कृत्या उत्कृष्टसंस्कार: तथा उपकृष्टकर्मभिरपकृष्टसंस्कृत्या उपकृष्टसंस्कारश्च उत्पद्यते । उत्कृष्टसंस्कारेणान्त:करणशुद्धि: सम्पद्यते । एवं स्थिते सूक्ष्मेक्षणेन उत्कृष्टसंस्कारार्थमतिशयाधानार्थं या समीचीना कृति: संसाराधस्तान्मानवानुज्जीवयितुं ब्रह्मण: सायुज्यं सलोकताञ्च प्रापयितुमात्मभूषणभूता कृति: सा संस्कृतिरि सुदृढं वक्तुं शक्यते । "यस्यैते अष्टचत्वारिंशत्संस्कारा: भवन्ति स: ब्रह्मण: सायुज्यं सालोकताञ्च प्राप्नोति" ।

संस्कृति: सभ्यता च ।

सभायां साधु: सभ्य: । तस्य भाव: सभ्यता । आचारविचारचेष्टावेषभूषादिषु सभायां साधु यद्भवति तत्सभ्यं भवति । साधुत्वञ्च सर्वादरणीयत्वं सर्वानुकरणयोग्यत्वं भवति । सर्वादरणीयन्तु सुसंस्कृतं भवति । सुसंस्कारोऽभ्यासाद्भवति । स च सुसंस्कृतया जायत इति उन्नतसभ्यताया: मूलं सस्कृतिर्भवति । सभ्यतानुमेया संस्कृति: । सभ्यता देशकालादिभिर्भिद्यते । परन्तु संस्कृतौ स्तरभेद एव केवलम् । अत एव "यूफ्रटीस् टेग्रीस् सिन्धु" आदि नदीतटेषु समुदिता: "मेसोपौट्टोमिया हारप्पादि सभ्यता: स्वोत्पत्तिविकासकाले समुन्नता आसन्नपि स्वरूपेण भिन्ना: । ता: सभ्यता: नष्टा: । परन्तु संस्कृतिरनुवर्तते । युगयुगान्तरादप्यनुवर्तते सुस्थिरेयं सनातनसंस्कृति: । संस्कृतिरनुभवाज्जायते । यथार्थानुभवो नित्य इति युक्तमेव । सभ्यता तु मेधाख्यविज्ञानाज्जायते । मेधा तु परिवर्तनशीला भवति । तस्मात्सभ्यता अपि परिवर्तनशीला ।

धर्म: संस्कृतिश्च

शास्त्रविहितकर्मणामनुष्ठानं निषिद्धकर्मणां तिरस्कारश्च धर्मो भवति । मनोरभिप्रायेण धर्मलक्षणन्तु "वेद: स्मृति: सदाचार: स्वस्य च प्रियमात्मन: । एतच्चतुर्विधं प्राहुस्साक्षाद्धर्मस्य लक्षणम्" इति । धारणाद्धर्म इत्याहु: । धर्मो हि नाम इन्द्रियविषयप्राप्तिजन्यां क्षणिकां सन्तुष्टिमनपेक्ष्य वस्तुत: आत्मकल्याणसाधनस्य आचरणं भवति । काणादञ्चेदं "यतोऽभ्युदयनि:श्रेयससिद्धि: स धर्म:" इति । श्रुतिस्मृत्यविरोधी देशीयोऽपि परम्परागत: सदाचार: धर्म: । 'यस्मिन्देशे य आचार: पारम्पर्यक्रमागत: । श्रुतिस्मृत्यविरोधेन सदाचार: स उच्यते' इति । गौतमीयादिषु धर्मशास्त्रग्रन्थेषु धर्मव्यवस्था कृता । तदनुसारेणानुष्ठानेन सर्वजनानां कल्याणं भवति । आचार्यै: शासितो धर्म: । ऐहिकामुष्मिकसुखसाधनं धर्मानुष्ठानं भवति । धर्मेण सुखमेधते । अतश्च "धर्म: सखा परमहो परलोकयाने" इति ।

भारतीयसंस्कृते: वैशिष्ट्यम्

अध्यात्मप्रतिष्ठिता भारतीयसंस्कृति: । प्रवृत्ति: अन्तर्मुखा बहिर्मुखा चेति द्विधा । परिधे: मध्यबिन्दुमुद्दिश्य वीक्षणमन्तर्मुखम् । तदानीं बिन्दुरपि दृष्टिगोचर: तथा आबिन्दु परिधे: सर्वमपि । परन्तु बिन्दूपस्थितस्य बिन्दु: दृष्टिगोचरो न भवितुं शक्यते । अन्तर्मुखप्रवृत्त्या व्यक्तिगता आत्मसंशुद्धिर्जायते । व्यक्तिसुशुद्ध्या च समष्टिसंशुद्धिरर्थात्समाजकल्याणं भवति ।

बहिर्मुखप्रवृत्त्या च व्यष्टिसंशुद्धिस्तादृशरीत्या मुख्या न भवति । परन्तु समाजसंशुद्धिः उद्देश्या तत्र । व्यक्तिष्वेव समाजः प्रतिष्ठितः । व्यक्तिसंशुद्ध्या त्यागेनात्मनियन्त्रेण च व्यक्तिप्रतिष्ठितस्य समाजस्यापि अभ्युन्नतिरिति भारतीयविचारस्येतरतो वैशिष्ट्यम् ।

समस्तप्राणिषु समभावना भारतीयसभ्यतायाः मुख्यसिद्धान्तः । सर्वशरीरेषु एकस्यैवात्मनोऽधिनिवेशेन स्वमिव परमपि समानभावनया पश्यन्त्विति परमोपदेशः । समस्तप्राणिष्वात्मदर्शनेन विश्वप्रेम उत्पद्यते । अत एव श्रीरुद्रादिः वृक्षादीनपि रुद्रत्वेन परिकल्प्य स्तौति । वेदाः आमनन्ति । "अहिंसा परमो धर्मः" "ईशावास्यमिदं सर्वम्" मा हिंस्याः सर्वा भूतानि "सर्वे सुखिनः सन्तु सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु" इत्यादिकम् । तेषां मानविकधर्माणां कुत्र कथं वा अपचयः । अद्यत्वेऽपि प्रसक्ता एते अनुकरणीयाश्च ।

संसारस्य अनादित्वं मन्यन्ते भारतीयाः । कुत इति प्रश्नस्य शास्त्रकारैः स्वं स्वं पन्थानमनुसृत्योत्तरमपि दत्तमस्ति । मिथ्याज्ञानेन दोषादिभिः पुनर्भवः भवति । कर्म च प्रारब्धादिभिर्भिद्यते । प्रारब्धकर्मणो विनाशपर्यन्तं जन्म अस्ति । अतः प्रारब्धकर्मविनाशाय शास्त्रोक्तः धर्माचारोऽनुष्ठेय एव ।

अस्माकं सभ्यतायां ब्रह्मचर्यस्य मुख्यं स्थानमस्ति । धर्माविरुद्धमेव कामं वयमङ्गीकुर्मः । गीतायामुक्तं भगवता "धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ" इति । विहितसमये धर्माविरुद्धः कामः न निषिद्धः । कामवासनानामपि पूतत्वं संयमरूपत्वञ्चास्माभिः कल्पितमस्ति । गृहस्थाश्रमिणामन्यतरकर्म कामाचरणम् । धर्मार्थं त्वेकमप्यपत्यं पर्याप्तम् ।

संयुक्तकुटुम्बव्यवस्थया प्रत्येकं मनुष्यस्य निजधर्मार्थकामसाधने परस्परसहकारेण सदवसरः सञ्जायते । तदनुकूला रङ्गभूमिः संयुक्तकुटुम्बव्यवस्थया पारस्परिकसहभावना वर्द्धते । परस्परादरश्च । तदेव "मातृदेवो भव । पितृदेवो भव" पुत्रादिच्छेत्पराजयम् प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्" इत्यादिभिरुक्तं भवति ।

उक्तञ्च मनुना "**सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ।**
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥ इति

"स्ववर्णाश्रमधर्मेण तपसा हरितोषणात्" इत्याचार्यपादैः प्रकटितं विद्यते । वर्णाश्रमव्यवस्था भारतीयसभ्यतायाः मूलस्तम्भः । स्वधर्मे यो निरतो भवति तत्र कौशल्यमायाति । तेन जीविका आयाति । तेन समुदायश्च पुष्टो भवति । स्वधर्ममुत्सृज्यान्यत्र यो जागर्ति तेन धर्मच्युतिः भवति । प्रत्येकं जनस्य स्वस्वकर्म अस्ति । तत्र कुशलतासम्पादनेन पौनःपुन्यानुष्ठानेन च संस्कारोऽभिवर्द्धते ।

भारतीयाः शौचविषये अतीव श्रद्धावन्तः । "शरीरमाद्यं खलु धर्मसाधनम्" । उल्लसितोल्लाघे शरीर आत्मा तुष्टो जागर्ति । शरीरोल्लाघतायै शौचमत्यन्तापेक्षितम् । मलादेः बहिर्गमनानन्तरं स्नानाद्यनन्तरमेवाहारादिकं करणीयम् । किमुत शौचे एतावन्महत्त्वं दृश्यते यद्गृहस्थाश्रमे पत्नीसम्भोगानन्तरमपि स्नानं विहितमस्ति । परस्परस्पर्शनादिकं रोगादिकं प्रसारयति । भोजनादिष्वपि अन्यस्मिन् गृहे असमये रात्रिपर्युषितादिकं तमोगुणप्रधानम्- एषां वर्जनं श्रेयस्करम् । भोजनादीनां शुद्धौ मनुना उक्तम्भवति यत्—

अश्नीयादाचम्य प्राङ्मुखः शुचिः । (२-५१)

भुक्त्वा चोपस्पृशेत्सम्यगदिभः खानि च संस्पृशेत् (२-५३)

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्।
दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः। (२-५४)

नोच्छिष्टं कस्यचित् दद्यान्नाद्याच्च न तथान्तरा।
न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्वचिद्व्रजेत्॥ (२-५६)

भौतिकविज्ञानं मानविकता च

मनुष्यजीवनं सर्वक्षेत्रेषु सुखपूर्णं सम्पादयितुमाधुनिकं भौतिकविज्ञानं प्रयतते। भौतिकविज्ञानस्याभिर्भावः विकासश्चेतिहासविज्ञैः सुस्पष्टीकृतौ। सामान्यजनानां तत्र औदासीन्येऽपि तेषां विज्ञानानां प्रत्यक्षफलभोक्तारः त एव। भौतिकविज्ञानेन जीवने सर्वत्र सौलभ्यमागतमस्ति। मस्तिष्कयन्त्रेण किं किमद्भुतमचिन्त्यं मनसापि साध्यत इत्यत्र बाभ्रम्यते मनः। सामुदायिकजीवने महत्परिवर्तनं सञ्जातमस्ति। उपग्रहविक्षेपणादिभिः वार्ताविनिमयादिक्षेत्रेषु विस्फोटमेव समासादितम्। व्योमयानरेल्यानादिभिः मनोवेगेनापि उद्दिष्टस्थानं प्राप्तुं समर्थः आधुनिको मनुष्यः। भैषज्यविकासक्षेत्रे च हृदयमपि परिवर्त्य कृत्रिमेन हृदयेनेदानीं प्राणसन्धारणं सुसाध्यम्। एतत्सर्वं भौतिकविज्ञानस्य प्रयोजनं जातमिति विचार्यो विषयः। केषाञ्चन जनानामभिप्रायोऽस्ति यद्भौतिकविज्ञानविकासेन यद्यदशक्यत्वेनासीत् तत्सर्वं साधितप्रायमेव। तथा च अध्यात्मविचारस्य मध्ये ईश्वरस्य वा आवश्यकतैव नास्ति। यो यो धर्म ईश्वरादिभिराविष्कृतः कल्पितश्च सः सः धर्मो भौतिकवादेऽपि मानविकतायामस्त्येव। अधिकतया धर्मानुयायिभिः किमाविष्कृतम्। अहिंसादयो धर्मा आधुनिकमानविकतावादेऽपि समाना एव। इत्यादिकम् एतत्तथ्यं नास्ति। उपलभ्यमानास्वपि महतीषु भैतिकसुखसामग्रीषु जाग्रत्स्वपि मानविकतावादेष्वशान्तता असन्तुविष्टर्वा सर्वत्र प्रसारिता एव।

भौतिकविज्ञानेन प्राचीनसंस्कारस्यापकारः तयोः समन्वयश्च

भौतिकविज्ञानस्य संस्कारस्य च दिङ्मात्रपरिचयो दत्तः। इदानीं भौतिकविज्ञानेन नूतनसंस्कारेण प्राचीनसंस्कारस्य अपकारविषये तयोः समन्वयविषये किञ्चिद्विवदिषुरस्मि। आङ्गलिकविद्याभ्यासप्रणाल्या स्वसंस्कारमत्यजतां तेषां बहुकालसम्पर्केण च वयमस्माकं हृदयेन भारतीयां संस्कृतिं तथा बहिः सभ्यतायाञ्चाङ्गिलकसंस्कारञ्च धृत्वा इतो भ्रष्टास्ततो भ्रष्टाः जाताः। यान्त्रिकेऽस्मिन् युगे समस्तयन्त्रादीनां वैज्ञानिकवस्तूनाञ्च लक्ष्यं मानवराशेः भौतिकोपभोगोऽस्ति। भौतिकोपभोगे उपभोक्तृष्णाधिक्ये वस्तूनां न्यूनतायामपि सामनवितरणं समुदाये न भवतीति सामूहिकं जीवनं प्रत्येकव्यक्तिषु सङ्कुचितं जायते। प्रत्येकव्यक्तीनामपि स्वार्थाधिक्येन समूहस्योपरि तस्य प्रतिबद्धता नष्टा भवति। स्वेनैव निर्णीतचक्रपरिधौ सङ्कुचितः सन् स्वार्थलाभाय केवलं यतमानः सः सर्वानुकरणार्थं बहिरेव पश्यति। पौनः पुन्येनाचरणेन दर्शनेन च तत्रैवाधुनिकभोगेषु विनष्टः सः समुदयाय समुदायस्य किमुपकरोति। एवमेतादृशानामङ्गानां जीर्णानां समावेशेन शरीरमपि अर्थाद् व्यक्तिसमूहः मानवसमुदायः सम्पूर्णजीर्णतां प्राप्य विनश्यति।

यः कश्चित्स्वीयात् स्वाभाविकात्संस्काराद्भिन्नसंस्कारस्य कर्ममार्गे विचरति तदानीं तादृशधर्ममार्गमनुसर्तुं तस्य प्रयत्नो विपरिवर्तते । तत्र शारीरिकमानसिकपरिश्रमे शक्तेः वृथा व्ययोऽपेक्षितः । तथा च शारीरिकमानसिकाधिकारिकपरिश्रमेण स्वीया शक्तिः क्षीणा भविष्यति । तथा चाध्यात्मिकं पतनं सम्भवति । तेनापि सुदृढा सामुदायिकाभ्युन्नतिरसुलभा । एवं स्वीयां परम्परां त्यक्त्वा अन्याश्रयणे तत्राकृष्टः सन् साङ्कर्याच्च अपरायाः परम्परायाः स्वांशीकरणप्रयासे विनष्टस्वत्वः सञ्जायते ।

एवं भौतिकविज्ञानेन स्वीयसंस्कारास्यापकर्षो वा परिणामो वा जायत इति वस्तुस्थितिः । एवं अधुनातनवैज्ञानिकाभिवृद्धेः संस्कारस्य भीषणे जाते कथं तयोस्समन्वयः इत्ययं विषयो मनस्विनां सुधीनां विचारपथमारोहति । आधुनिकभौतिकविज्ञानं स्वीयसंस्कारमूल्यशोषणेन विना स्वीयपरम्परया कथं समन्वेतीति विचारे प्रथमं तावदस्माकमाचार्यपादानेव उदाहृत्य प्रमाणयितुं शक्नुमः । ते युगपुरुषाः सन्ति । परन्तु न ते कस्यचन नूतनसिद्धान्तस्याविष्कर्तारः । न वा प्रचारकाः । किन्त्वस्माकं प्राचीनसंस्कृत्या या संस्कारपरम्परा वैदिकी अद्याप्यनिति तस्या यावज्जीवने असकृदनुष्ठानेन अपगतमलेन शुद्धान्तःकरणेन व्यक्तिशुद्ध्या ते समूहमलङ्चक्रुः । तान् परिगता अपि शुद्धान्तःकरणैः तैः संशुद्धीक्रियन्ते । स्वादुसुव्याहृतोक्तिभिः परिगतानां मलापनयनातिशयाधानसंस्कारं ते कुर्वन्ति । यथा चोक्तम्

"यद्वच्छ्रीखण्डवृक्षप्रसृतपरिमलेनाभितोऽन्येऽपि वृक्षाः
शश्वत्सौगन्ध्यभाजोऽप्यतनु तनुभृतां तापमुन्मीलयन्ति ।

आचार्याल्लब्धबोधा अपि विधिवशतः सन्निधौ संस्थितानां
त्रेधा तापं च पापं सकरुणहृदयाः स्वोक्तिभिः क्षालयन्ति ॥ इति ॥

व्यक्तिसंशुद्ध्यै ये मन्वादिस्मृतिविहिताचाराः गीतादिशास्त्रसिद्धान्तिताश्च ते न विरुन्धन्त्याधुनिकभौतिकविज्ञानम् । अहिंसासत्यास्तेयशौचादीनां जीवने प्रायोगिकतया परिशीलने नितरां काठिन्यन्तु नास्त्येव । सर्वप्राणिषु समभावना प्रेम धर्मार्थमेव धनसम्पादनम् कुटुम्बपोषणम् धर्मार्थमेव कामानुसन्धानं गृहस्थाश्रमानुष्ठानं व्रताचरणम् एवंविधाः सर्वेऽपि विषयाः अस्मत्संस्कारस्य मूलभूताः व्यक्तिसंशुद्ध्यै आत्यन्तिकतया अवश्यमुपादेयाः इदानीमप्यनुष्ठेयाः । शौचादीनान्तु यावदननुष्ठानं तावन्नूतनरोगादिपीडा प्राथमिकमेव धर्मसाधनं शरीरं प्रतिबध्नाति ।

तदस्माकं संस्कृतिः युगयुगान्तरानुवर्तिनी अद्याप्युन्मिषन्ती तया च संस्कृत्या समुद्भूतसंस्कारेण भूषितसद्व्यक्तिभिरलङ्कृतोऽयं सुपरिष्कृतसमूहः स्वसंस्कृतेर्मूल्यशोषणं विनैव आधुनिकभौतिकविज्ञानमपि तेन समन्वय्य तस्य संस्कारस्य संरक्षणेनानुष्ठानेन च यशः प्राप्नोत्यनुत्तममित्यत्र नास्ति सन्देहस्य गन्धोऽपि ।

अस्माभिश्चिन्तनीयोऽयं विषयः किं किमस्माभिस्सम्पाद्यास्माकमेव पुत्रपौत्रादीनुद्दिश्य सञ्चितं विद्यते इति । समस्तभौतिकाडम्बरेषु निमग्नाः पुनरपि तत्सम्पादने यम् कमपि कदाचारं कर्तुं निर्लज्जाः उन्मत्ताः इव परस्परस्पर्धालवः असूयाकलुषितान्तरङ्गाः सर्वमानविकतायाः निर्वाणस्थानभूताः विचरन्तीति किमयमस्माकं राज्यस्य विकासो वा । चिन्तयन्तु सुधियः । "तेन त्यक्तेन भुञ्जीथाः" इत्युच्चैस्तरमुद्घोषयति वेदः । तन्नास्माकं

कर्णे पतति । पतदपि न शृण्मः । शृण्वन्तोऽपि नानुसरामः । श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः । इदमप्यौपनिषदमुद्घोषणमेव ।

तर्ह्यस्यामवस्थायामस्माकं भविष्यत्सन्तत्यै कोशे निक्षेप्तुमुपभुक्तावशिष्टा आयभूता केवलमस्माकमेव ताडनैः खण्डिता जीर्णा संस्कृतिरेकैव भवति। या च मरणासन्ना। कर्तव्यं भवति सुपुत्राणामस्माकं तस्याः जीवातुप्रदानेन रसायनचिकित्सया पुनर्यौवनसंपादनेनोज्जीवनमुन्मेषणञ्च । तदपि तस्याः आश्रयभूतस्य मज्जाभूतस्य संस्कृतस्य उज्जीवनेन। कार्यसिद्ध्यर्थमुपाये प्रवृत्तिः सर्वसाधरणीति उपायभूतसंस्कृतसंरक्षणेन संस्कृतेः तद्वारा अस्माकं परम्पराणां संरक्षणं सन्ततीनाञ्च शुभायतेः परिकल्पनञ्च सुसाध्यमिति तत्र यतमानाः भवामः ।

इति शम्

विश्वस्य संस्कृतिसभ्यतासमृद्धये संस्कृतस्योपयोगित्वं गुरुत्वञ्च

आदित्यनाथभट्टाचार्यः

सर्वत्र सामाजिकी शक्तिरेव तत्तद्देशीयसभ्यतासंस्कृतेः परमम् आस्पदम् । यस्मिन् देशे समाजव्यवस्था राजनीतेर्व्यवस्था च बलिष्ठा स्यात्, तत्र सभ्यता संस्कृतिश्च नूनमेव समुन्नता भारतस्य सभ्यता संस्कृतिश्च संस्कृतसाहित्यानुशीलनं विना नैव अवगन्तुं शक्यम् । अतो भारतस्य भूषणं संस्कृतमेव । तदुक्तम्—

गौश्च गीर्वाणगीर्गङ्गा गीता भारतभूषणम् ।

पाश्चात्यकविनापि आवेदितम्—

यावद् भारतवर्षं स्याद् यावद्विन्ध्यहिमाचलौ ।
यावद् गङ्गा च गोदा च तावदेव हि संस्कृतम् ।।

संस्कृतं न केवलम् अस्मिन् भारते, अपितु समग्रे विश्वे धर्ममूलसंस्कृतिरत्नालोकेन सर्वानेव जनान् सञ्जीवयति, सकलानेव सामाजिकान् मानवतायाः आन्तर्जातिकतायाश्च आदर्शं ग्राहयति, अनुपमाध्यात्मज्ञानविकासेन परमशान्तये अनुप्रेरयति च । 'वसुधैव कुटुम्बकम्' 'स्वदेशो भुवनत्रयम्' 'सर्वमात्मैवाभूत्' इत्यादिवाक्यैः शास्त्रं व्यक्तिसत्तां विश्वसत्तायां समुन्नीय सर्वेषां हृद्देशेषु विश्वमैत्रीं विश्वशान्तिञ्च सञ्चारयति ।

इदन्त्ववधेयम्, पाश्चात्त्यसभ्यतातः भारतसभ्यतायाः अस्ति सुमहद् वैलक्षण्यम् । विरोधिशक्तिपुञ्जं तेन प्रकारेण पर्युदस्य भोगैश्वर्यसम्पादित-स्वस्वात्मशक्तेः समन्तात् प्रसारणम्, अहङ्कारोद्दीपितस्वस्वमाहात्म्यप्रतिष्ठापनम्, स्वशत्रुपराभवजनितमहानन्दोत्सवोद्यापनञ्च पाश्चात्त्यसभ्यतायाः असाधारणं वैशिष्ट्यम् । भारतसभ्यताया वैलक्षण्यं तु, स्थिरसंयतः निरहङ्कारश्च भूत्वा सामदानादिभिः च जित्वा सर्वजीवेषु मित्रनिर्विशेषेण विश्वव्यापि स्वात्मसत्तानुभवपुरःसरं विश्वबन्धुत्वसम्पादनम् इति । एतच्च भारतसभ्यतासंस्कृतेः स्वातन्त्र्यं संस्कृतशास्त्राश्रितम् अनवद्यमेव । अतः कथङ्कारं सामाजिकानां मङ्गलं भवति, कथञ्च न, तद् भूयोभूयः उपदिशन्ति अस्माकम् अमूल्यानि शास्त्रवाक्यानि । अत उच्यते वृद्धैः, समाजे हितं संस्कृते निहितम् इति ।

दृश्यते यत् सम्प्रति सर्वत्र समाजे मनुष्याणां मध्ये असहनीया हिंसाद्वेषविरोधप्रसूता विच्छिन्नता, दुर्नीतिः, उग्रस्वार्थभावना च, तत्र संस्कृताध्यात्मशास्त्राणाम् अनध्ययनमेव कारणम् । संस्कृतमेव हि उदारधर्मनीतिसर्वस्वम्

विचित्रेषु एकतासम्पादकं मङ्गलकरं प्रकृतसाम्यवादमेव उपस्थापयति । तथाहि, अनुशीलितेषु अनुक्षणं शास्त्रेषु, प्रतिफलितेषु च तेषु जीवने आन्दोलयति सदा सहृदयानां हृद्देशान् विश्वमैत्रीभावना । किन्त्वहो स्वाधीनतोत्तरपञ्चाशदधिकवर्षैः व्यतीतैरपि न वयं स्वाधीनाः अपितु पराधीना भोगसर्वस्वपाश्चात्त्यभावादर्शानां दासभूताः । वयं भारतीयाः इति उक्त्वा गर्वं गौरवञ्च अनुभवामः, परन्तु अस्माकम् आचरणम् अहह ! न भारतीयम्, किन्तु पाश्चात्त्यमिव इत्यपलपति को नाम जनः ?

प्राचि वेदप्रभाविते काले समाजनीतिः राजनीतिश्च धर्मसापेक्षा आसीत् । किन्तु अधुना सा प्रायः धर्मवर्जिता अर्थमात्रसारा । धर्ममूलौ एव अर्थकामौ पुरुषार्थजनकौ । धर्मं त्यक्त्वा व्यक्तिः समाजश्च न कथमपि सुष्ठु स्थातुमर्हति । धारणार्थकधृञ्धातोः मन् प्रत्यययोगेन व्युत्पन्नो धर्मशब्दः । अतो जगद्धारको धर्मः । 'धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः (महाभारत, शान्तिपर्व, १०९/११) अथवा अवस्थानार्थधृञ्धातोः धर्मशब्दः । ततो लोकस्थितेर्निदानं धर्मः । यद्वा अवध्वंसनार्थकधृञ्धातुजो धर्मशब्दः । एतेन दुःखोच्छेदहेतुर्धर्मः अभ्युदयनिःश्रेयसकारणमिति । येन मानससंस्कारविशेषेण जीवनस्य नैतिकमूल्यबोधः आध्यात्मिकमूल्यबोधश्च जागर्त्ति स एव धर्मः । सत्यमेव हि धर्मः ।[1] सत्यञ्च ब्रह्म ।[2] धर्मस्य प्रशासनेन सूर्यचन्द्रतारकादिग्रहनक्षत्र-देव-दानवमानवयक्षराक्षसकिन्नरप्रभृतयः सर्वे नियमिताः सन्तः स्वस्वकर्माणि कुर्वन्ति, तस्य प्रभावेण च उदारचिता भवन्तो जनाः परहितकरं सामाजिकं कर्म सम्पादयन्ति । तस्मात् धर्मे रक्षिते राष्ट्रं परिवारः व्यक्तिश्चेति सर्वं सुष्ठु रक्षितं भवति । तदुक्तम्, 'धर्मो रक्षति रक्षितः ।'

एकदा आदिमकालीनमानवाः एकाकिनः सन्तः वने विचरन्ति स्म । असहायत्वनाशाय ते सङ्घं कृतवन्तः, ततः परिवारं, अतो यौथपरिवारं, ततश्च समाजं राष्ट्रं महाराष्ट्रं च गठितवन्तः । तदेवं वैदिकयुगे मननशीला ऋषयः तदनुसारिणश्च सुसम्बद्धम् ऐक्यबद्धसमाजजीवनं रचितवन्तः । कालक्रमेण पाश्चात्त्यदेशीयरीतिप्रभावेण भारतीयानां स्वार्थबुद्धिः अतिशयं वर्धिता, ततः उत्कटव्यक्तिस्वार्थचिन्तया ऐक्यबद्धराष्ट्रियसमाजजीवनात् यौथपरिवारजीवनात् स्वस्वव्यक्तिपरिवारजीवनाच्च ते विच्छिन्नाः । अद्य मानवा असहाया भवन्तः पुनर्वने प्रविष्टुकामाः । इदानीं स्वार्थचिन्ता ईदृशी बलवत्. सम्पन्ना यत्, मानवाः प्राणेभ्योऽपि प्रियान् आत्मीयपरिजनान् हन्तुं प्रवर्त्तन्ते । दृश्यते च, राजनैतिकोद्देश्यसिद्धये व्यक्तिस्वार्थसिद्धये च सन्त्रासवादः साम्राज्यवादश्च राजत्वं करोति प्रायः सर्वत्र विश्वे, किं नु खलु केवलं भारते ! एवं व्यक्ति केन्द्रितः सन् मनुष्यः र पाजे पशुवत् आचरन् अधो गच्छति ।

भारतस्य ऐश्वर्यद्वयम् अस्ति, संस्कृतं संस्कृतिश्च । सम्प्रति भारतस्य सनातनसंस्कृतिः लुप्तप्राया । यतो हि, संस्कृतेर्वाहकं संस्कृतम् उपेक्ष्यते । धर्मसंस्कृतेरुत्सभूमिभारते यत्र पुरा सम्प्रीतिसुरुचिकरं सामाजिकं सांस्कृतिकम् अनुष्ठानम् अभवत्, अधुना अधिकरोति तत् स्थानम् उत्कटाधुनिकनृत्यगीतवाद्य-निकृष्टशिल्पकलाचित्राभिनयं यथेच्छाचारश्च, यद्धि न कस्यापि सभ्यसमाजस्य यथार्थमाचरणं भवितुमर्हति । अस्या अपसंस्कृतेः प्रभावेण

---

१. 'यो वै स धर्मः सत्यं वै तत्, तस्मात् सत्यं वदन्तमाहुर्धर्मं वदन्तीति' (वृ.उ.१/४/१४)

२. सत्यमेवेश्वरो लोके सत्यं धर्मे प्रतिष्ठितम् ।
सत्यमूलानि सर्वाणि नास्ति सत्यात्परं बलम् ॥

समाजतन्त्रिणां मनः व्यक्तिकेन्द्रितं जातम् । व्यक्तिजीवने विरोधः विच्छेदश्च निरन्तरम् आपद्यते । ऐक्यबद्धसमाजतन्त्रजीवने धर्ममूलसंस्कृतेः उन्मेषेण परमचेष्टया यो देशः शनैः शनैरेकदा समुन्नतेरुच्चशिखरं लब्धवान्, स खलु अद्य दुर्नीतिमिथ्याश्रयणमूलायाः अपसंस्कृतेः दौरात्म्येन बहुधा विच्छिन्नः सन् अवक्षयस्य अतलगह्वरे निर्वासितो भवति । अहो जातेरस्याः सुमहत्सङ्कटकालः । न केवलं भारतवर्षे, अपितु समग्रे विश्वे सम्प्रति संहतेरेकान्ततोऽभावः दृश्यते । सर्वत्र नाना विच्छिन्नता राजते, यथा व्यक्तेर्व्यक्तितो विच्छिन्नता, पारिवारिकविच्छिन्नता, दलीयविच्छिन्नता, भौगोलिकविच्छिन्नता, साम्प्रदायिकविच्छिन्नता, धर्मीयविच्छिन्नता, राजनैतिकविच्छिन्नता, सामाजिकविच्छिन्नता, राष्ट्रियविच्छिन्नता च । विच्छिन्नतायाः कारणं व्यक्तेः स्वगतचिन्ता, फलञ्च सामाजिकशक्तेः अवक्षयः ।

अत्रेदं वक्तव्यम्, सम्प्रति प्रायः सर्वेषां मनुष्याणां मानसपटे केवलं स्वपरभेदनीतेर्भावनैव नियतं विचरति, अत्र काचन संहतेराशा सुदूरपराहता । अतः अस्माकं प्रयोजनम् निरन्तरं समाजमङ्गलचिन्तनम् । तदर्थं संस्कृतस्य सर्वस्वभूतवेदवेदान्तोपनिषत्पुराणादेरध्ययनम् एकान्तत आवश्यकम् । शास्त्रमेव हि वारं वारमुपदिशति अस्माकं कृते सर्वभूतैषणां मङ्गलकरसामाजिककर्मसम्पादनञ्च :—

'मानसं सर्वभूतानां धर्ममाहुर्मनीषिणः ।
तस्मात् सर्वेषु भूतेषु मनसा शिवमाचरेत् ॥' महाभारत १९३/३१
'अद्रोहेणैव भूतानां धर्ममाहुर्मनीषिणः । महाभारत २१/११
'न हि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति' । गीता
'ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ।' १२/४
'लभन्ते ब्रह्मनिर्वाणमृषयो वीतकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥' ५/२५

अतः केवलां स्वार्थचिन्ताम् अकृत्वा परार्थचिन्ता करणीया इति तु विष्णुशर्मणा सुष्ठु मन्त्रितम्—

'अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः ॥'

तस्माद् यथाविधि भोगं वर्जयित्वा त्यागधर्म एव ग्रहणीयः, स एव हि प्रकृतो धर्मः । त्यागधर्मदीक्षितस्य परार्थभावना भवति । भोगसर्वस्वविषयबुद्धित्यागे शान्तिर्लभ्यते । तथा च शास्त्रकृदुपदेशः—

'त्यागाच्छान्तिरनन्तरम्' । गीता
'तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्वित् धनम्' ॥ ईश.उ.१.
'येनाहं नामृता स्याम् किमहं तेन कुर्याम् ।' बृ.उ

अत्र केचन एवं विवदन्ते, धर्मीया भावना खलु अस्माकं चित्तं सङ्कीर्णं करोति । साम्प्रदायिकताविच्छिन्नताजनको धर्मः समाजे सुतरां अनिष्टमेव साधयति । अतोऽनिष्टकरत्वात् धर्मसम्बन्धिग्रन्थाध्ययनम् अनुचितमेव । तत्र वक्तव्यम्, अस्माकं धर्मस्वरूपबोधः अध्यात्मबोधे प्रतिष्ठितः । सर्वात्मबोधं (समदर्शिताज्ञानं वा) विना प्रकृतधर्मबोधः न जागर्त्ति । अतो धर्माश्रयेण चित्तमुदारं भवति, न तु सङ्कीर्णम् । तदुक्तम्— 'धर्मे ते धीयतां बुद्धिर्मनस्तु महदस्तु च' (महाभारत) स एव प्रकृतो धर्मः यो हि हिंसाद्वेषविरोधान् अपनीय भिन्नानपि जनान् एकतासूत्रेण बध्नाति । उक्तञ्च—

'धर्मो यो बाधते धर्मं न स धर्मः कदाचन ।
अविरोधात्तु यो धर्मः स धर्मः सत्यविक्रमः ॥'

अयमभिसन्धिः, सुसंहतसमाजसभ्यतासङ्गठनाय नानाविच्छिन्नताशक्तिप्रशमनाय च विश्वबन्धुत्वभावना अपरिहार्या । तां च भावनां सम्यक् जागरयति अस्माकं पुनः पुनः संस्कृतसाहित्यानुशीलनम् । प्राचीनकालतो वैदिकभावनायां विश्वसौभ्रातृत्वस्य विकासः अनुश्रूयते । 'बन्धुर्मे माता पृथिवी महीयम्' (ऋक्सं १/१६४/३३) 'माता भूमिः पुत्रोऽहं पृथिव्याः' (अथर्वसं) 'तन्माता पृथिवी पिता द्यौः' (ऋक्सं १/८९/४) इत्यादिश्रुतिवाक्यानि पृथिवी खलु सर्वेषां प्राणिनां जननी, द्युलोकश्च पितेति बोधयित्वा पृथिवीरूपायाः मातुः द्युलोकभूतस्य च पितुर्जायमानानां विश्ववासिनां सौभ्रातृत्वमस्तु इति सूचयन्ति । भिन्नभिन्नराष्ट्रभावनामपि निन्दित्वा 'स्वदेशो भुवनत्रयम्' 'राष्ट्रे जागृयाम' इत्यादिवाक्यानि अखण्डं महाराष्ट्रमेकं प्रकल्प्य राष्ट्रियविच्छिन्नताम् अपनयन्ति । 'यत्र विश्वं भवत्येकनीडं न मानुषाद्धि श्रेष्ठतरं हि किञ्चित्' (वा.सं. ३२/८) इति श्रौतवचनं विश्वमानवतावादम् आन्तर्जातिकतावादं च उपस्थाप्य विश्वसमाजे स्वपरभेदभावम् अवश्यं दूरीकरोति । 'ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः स्मृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत । (ऋक्सं १०.९३.१२) इति मन्त्रश्च गुणकर्मानुसारतः चतुर्वर्णविन्यासमेव वर्णयति, न तु जातिभेदप्रथां ज्ञापयति । एकस्माद् ब्रह्मपुरुषाद् ब्राह्मणक्षत्रियवैश्यशूद्राः सम्भूताः पितुःसन्ताना इव भ्रातृभावमापन्नाः । उक्तश्रुतेरयमेव विवक्षितोऽर्थः । ब्राह्मणक्षत्रियादीनां सर्वेषां स्वस्वयोग्यतानुसारेण सर्वकर्मसम्भवात् समाजव्यवस्था सफलीभवति । तथा बहवः पुत्राः सम्भूय मिलित्वा विषमान्यपि नानाकार्याणि सम्पाद्य परिवारं व्यवस्थापयन्ति, तद्वत् बोध्यम् । शास्त्राध्ययनादिशुभकर्मसाधनार्थं ब्राह्मणसृष्टिः । न ब्राह्मणेन सर्वतो धर्मरक्षा भवतीति पृथिव्याः शास्तुः क्षत्रियस्य सृष्टिः । धनं विना च न राज्यलाभः, नापि वा धर्मानुष्ठानसम्भवः, अतः वैश्यसृष्टिः । शुश्रूषां विना केवलेन धनेन, राज्येन, धर्मेण वा न स्वास्थ्यरक्षा भवति । अतः शूद्रस्य सृष्टिः । अतः क्षत्रियादेर्दुर्धर्षत्वात् तन्नियन्तुः धर्मस्य सृष्टिः । राजधर्मभयात् प्रजाः स्वस्वधर्मपरायणाः सामाजिककर्माणि यथाधिकारं प्रकुर्वन्ति । तथाच श्रुतिः —स नैव व्यभवत्तच्छ्रेयोरुपमत्यसृजत् धर्मं तदेतत् क्षत्रस्य क्षत्रम् यद्धर्मस्तस्मात् धर्मात् परं नास्त्यतो अबलीयान् बलीयांसमासांसते धर्मेण यथा राजा ॥ (वृ.उ. १/४/१४) 'शृण्वन्तु विश्वे अमृतस्य पुत्राः' इत्युपनिषद्वाक्यमपि एकामृतमयपुरुषोद्भूतत्वेन विश्वजनीनमैक्यमापादयति । 'प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते' (वा.सं ६१/१९) इति मन्त्रप्रचोदनात् प्रजापतेरंशत्वेन समुद्भूताः एकपितृकत्वेन वयं सर्वे भ्रातृत्वसम्बन्धैराबद्धा भवेयम् । अतो वेदोक्तेषु चतुर्वर्णेषु मिथः समाना सम्प्रीतिरेवास्तु इत्यावेदयति श्रुतिः—

'प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु ।
प्रियं सर्वस्य पश्यत उत शूद्र इवार्यैः ॥'

यजुर्वेदसंहितापि नियोजयति अस्मान् विश्वबन्धुत्वभावनायाम् ।

'मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्ष्यन्ताम् । मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्ष्ये, मित्रस्य चक्षुषा समीक्षामहे' (वा.सं. ३६/१८), सर्वे प्रणिनः मां बन्धुदृष्ट्या पश्यन्तु, अहमपि सर्वान् बन्धुदृष्ट्या पश्येयम् इत्यादेशः वेदस्य ।

अथर्वसंहितापि तथैवास्मान् प्रचोदयति—

'यांश्च पश्यामि, यांश्च न । तेषु मा सुमतिं कृधिं' (१७/१/७)

दृश्यमानेषु अदृश्यमानेषु च सर्वेषु अस्माकं सौमनस्यमस्तु इति वेदस्यानुशासनम् ।

श्रीमद्भागवतमपि—

'यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥'

इति वाक्ये प्रयोजनातिरिक्तकामानां तस्करत्वं राजदण्डनीयत्वञ्च उक्त्वा विश्ववन्दितसाम्यवादमेव अवतारयति ।

अपि च—

'सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भागवत्यात्मन्येष भागवतोत्तमः ॥'

इति भागवतवाक्यं सर्वभूतेषु स्वाभिन्नत्वद्रष्टुः भागवतोत्तमभक्तत्वं निरूप्य व्यक्तिसत्तायाः विश्वमानवसत्तायां पर्यवसाने तात्पर्यम् अवधारयति ।

तदेतावता साम्प्रतिकधर्मनिरपेक्ष-समाजराजनीतिभित्तिकविश्वसंस्कृतिसभ्यतायाः समृद्धये संस्कृतस्य अनन्यसुलभः कीदृशः भूयान् उपयोगः अस्ति, तत्तु शक्यम् अनायासमेव विज्ञातुम् । सङ्कटकालेऽपि यदि अस्माभिस्तन्न मान्यते तर्हि अस्माकम् अधिकाधिका विपत्तिर्भविष्यति, दिष्ट्या कोऽपि चेत् समाजे तत् बहुमन्येत तदा समुहदभ्युदयं नूनं लभेत इति निश्चप्रचम् अलं वक्तुम् ।

समृद्धा धर्मसंपृक्ता धन्या भारतसंस्कृतिः ।
धन्या च वैदिकी वाणी दैवी संस्कृतिरक्षिका ॥

संस्कृतवाङ्मये वृक्षाणां महत्त्वं संरक्षणञ्च प्रति चेतना

डॉ. कमला भारद्वाज

मूलं ब्रह्मा त्वक् विष्णुः शाखा रुद्रो महेश्वरः ।
पत्रे पत्रे च देवानां, वृक्षराज नमोऽस्तु ते ।।

स्तुतिपरकेऽस्मिन् पद्ये वृक्षे आमूलतः छायापर्यन्तं देवतानां वासः प्रतिपादितः । पद्यमिदं संस्कृतवाङ्मये भारतीयपरम्परानुसारं मानवप्रकृत्योः शाश्वतसम्बन्धानामभिव्यक्तेः अद्‌भुतनिदर्शनं प्रतीयते । "प्रकृतिः मनुष्यस्य शिक्षिका" सुविदितमेतत् तथ्यं मानवैः व्यक्तिगतानुभवैः अनुभूयते । प्रकृतं परिलक्षितैः कलापैः भयविस्मयादि मानवीयभावनाः परिस्फुरिताः । दार्शनिकदृष्ट्यापि उभयोः तादात्म्यं चिरस्थायिचिरन्तनञ्चाभिमतम् । आधिदैविकाधिभौतिकाध्यात्मिकदृष्टिभिः प्रकृतिः मानवं पोषयन्ती जीवनपथे अग्रेसर्तुं सहायिका सर्वार्थसाधिका च दृश्यते । जीवनम् अतिसूक्ष्मादतिस्थूलपर्यन्तं व्याप्ते परिवेशे अस्तित्वमाप्नोति । यत्किञ्चिदपि अस्मान् परिवृणोति जीवनञ्च प्रभावयति तत्सर्वमेव पर्यावरणम् । अतः जगति विद्यमानाः वनस्पतयः, पशुपक्षिणः, पर्वताः, नद्यः, पञ्चमहाभूताश्च सर्वाः अप्यते बाह्यपरिस्थितयः पर्यावरणं विद्यते । सूत्ररूपेण प्रकृतिरेव पर्यावरणम् । वैश्विकप्रदूषणपरकेऽस्मिन् युगे पर्यावरणसंरक्षणं प्रति चिन्तिताः वर्तन्ते प्रायः निखिलविश्वस्य जनाः ।

संस्कृतवाङ्मये प्राकृतिकपर्यावरणं प्रति समादरस्य, संरक्षणस्य च महती परम्परा विद्यते । प्राकृतिकपर्यावरणेऽपि वृक्षाणां महत्त्वं संरक्षणञ्च प्रति चेतना धर्मदर्शनसाहित्यव्याकरणकलासु च चिरकालादेव परिलक्षिता । न केवलं वैदिकसाहित्येऽपितु लौकिकसंस्कृतवाङ्मयेऽपि अस्माकं पूर्वजैः, मनीषिभिश्च पुरातनकालादेव वृक्षाणां महत्त्वं प्रामुख्येन प्रतिपादितम् । अतएव वैदिकसाहित्ये वृक्षाः अस्माकं धर्मस्य, विभिन्नसंस्काराणां, सामाजिकसांस्कृतिकक्रियाकलापानाञ्च धार्मिकास्थायाः प्रतीकरूपे वर्णिताः । वैदिकसाहित्ये वृक्षाणाम् आधिदैविकं महत्त्वं सुष्ठु प्रतिपादितम् । ऋग्वेदे[१] सोम एव स्फूर्तिदातृ अमरजीवनप्रदातृरूपे च वर्णितः ।

वैदिककालादेव अश्वत्थ, उदुम्बर प्लक्ष, न्यग्रोध, आम्रवृक्षाणां पल्लवाः धार्मिकमांगलिकृत्येषु च शोभानाः अभिमताः । ब्रह्मपुराणेऽस्य पद्यमिदं प्रमाणम्—

अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः ।
पञ्चभङ्गा इति प्रोक्ताः सर्वकर्मसु शोभनाः ।।[२]

---

१. इन्द्रस्ते सोम सुतस्य पेयाः कृत्वं दक्षाय विश्वे च देवाः । ऋग्वेद — १०-९७-१८

२. हिमाद्रि चतुर्वर्गचिन्तामणिः व्रतखण्डः पृ. ४७ .

अश्वत्थवृक्षस्य साक्षाद् ब्रह्मणः वासः उच्यते।

हिमाद्रिणा दानकर्मणि पूर्णतः अशक्तस्य जनेस्यपि अश्वत्थस्य नित्यजलसिञ्चनेन दुर्भावनाः नश्यन्ति। प्रमाणमत्र पद्यमिदम्—

उदकुम्भप्रदानेऽपि ह्यशक्तो यः पुमान् भवेत्।
तेनाश्वत्थतरोर्मूलं सेच्यं नित्यं जितात्मना॥[१]

गीतायां भगवता कृष्णेन 'अश्वत्थः सर्ववृक्षाणाम्' इति वचोभिः अश्वत्थश्रेष्ठत्वं प्रतिपादितम्। सूत्रकारेण पाणिनिना (४-३-४८) अश्वत्थस्य फलकालोऽपि अश्वत्थ एव उक्तम्। आश्वत्थवटबिल्वशाल्मल्यादिमहत्त्वपूर्णवृक्षाणां भारतीयपरम्परानुसारं छेदनमपि कल्याणकारि न मन्यते। अग्निपुराणस्य[२] अनेन पद्येन प्रातिपादितम् उत्पलं दलं भक्षणीयं परं (३७-१९-२०३)। वट-अश्वत्थ-अर्क-सर्जादिवृक्षाणां पल्लवानां भक्षणं वर्ज्यम्।

तुलसीवृक्षे आमूलछायापर्यन्तं सर्वे देवताः निवसन्ति इत्यपि उक्तं गरुडपुराणस्य चतुर्थाध्यास्य सप्तमे पद्ये[३]—

तुलसीविटपस्थेयं गृहे यस्यावतिष्ठते।
तद्गृहें तीर्थरूपो हि न यान्ति यमकिंकराः॥

तुलसीवृक्षोऽपि अश्वत्थमिव आराध्यः वर्णितः अस्य सुगन्धेन सुवासितवायुः दिशः पुनाति।

धर्मशास्त्रेपु[४] तु वातशमीबिल्वादिविशिष्टवृक्षाणां विशिष्टदेवैः सह सम्बन्धो लिखितः। प्रमाणमत्र—

बिल्ववृक्षमहाभाग सदा त्वं शंकर प्रियः।
गृहीत्वा तव शाखां च देवीपूजा करोम्यहम्॥

शाखोच्छेदं भवं दुःखं न च कार्यं त्वया प्रभो।
गृहीत्वा तव शाखां च पूज्या दुर्गेति च स्मृतिः॥

एभिर्वचोभिः शाखाग्रहणात्-वृक्षस्य पीडा अनुभूता तत्कृते च क्षमायाचनाऽपि विहिता।

आधिदैविकमाहात्म्यातिरिक्तं वृक्षाणाम् आधिभौतिकं महत्त्वमपि संस्कृतवाङ्मये सुष्ठुः प्रतिपादितम्। सर्वप्रथमं तु एते पक्षिणां आश्रयाः सन्ति अतः पञ्चतन्त्रे[५] पक्षिभिः अनुनयः कृतः— भो ममाश्रयोऽयं पादपः सर्वथा

---

१. तदेव—दानखण्डः— अध्याय-१३
२. ३७-१९-२०३ — अग्नि पुराण,(७१-६-१७)
३. गरुड पुराण ४-७
४. निर्णयसिन्धुसप्तमपूजाविधि।
५. पञ्चतन्त्र-अः-१ श्लोक - २२६

रक्षणीयः । वृक्षाः पुण्यैः देवान् पूजयन्ति, फलैश्च पितृन् दोषयन्ति विश्रान्तेभ्यः पाथिकेभ्यश्च छायां कुर्वन्ति अतएव पूजनीयाः उक्तमपि हिमाद्रिना[१] महाभारतस्य पद्यम्—

पुष्पैः सुरगुणान् वृक्षाः फलैश्चापि तथा पितृन् ।
छायया चातिथींस्तान् पूजयन्ति महीरुहाः ॥

बीजफलान्नादिरूपेण तु वृक्षाः जीवनाधारभूताः सन्त्येव । पाणिनेः[२] सक्तव्याः धानाः इति सूत्रे यवानां धानाः धानानां सक्तव्याः इति पातञ्जलभाष्येण प्रमाणितं यत् अन्नप्रदातृरूपे वृक्षाणामुल्लेखः अतिप्राचीनः । भाष्यकारेण पिचव्यः कार्पासः[३] एवं सोऽपि विधिर्न मृदूनामिव कार्पासानां कृतः इति भाष्येण वस्त्रोत्पादकरूपे वृक्षाः उल्लिखिताः । आधिभौतिकमहत्त्वातिरिक्तं वैदिकसाहित्ये वृक्षाणां औषधिपरकमहत्त्वमपि परिलक्ष्यते । ऋग्वेद[४]स्य ओषधिसूक्ते अस्मिन् मन्त्रे आरोग्यप्रदात्रीणाम् ओषधीनां महत्त्वपूर्णम्—

(शत वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमियं ये अगदं कृता ॥)
ओषधिः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥

शुक्लयजुर्वेदे[५] मातरः, देवी इति स्तुतिपरकपद्यैः ओषधयः व्याख्याताः— (ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे) येन ओषधिरूपेणैव वृक्षाणां खननं विधीयते स दीर्घायु र्भवत्येव ओषधयोऽपि शतमूलका भवन्ति । शुक्लयजुर्वेदे[६] उक्तम्—

दीर्घायुस्ते औषधिखनिता यस्मै च त्वा खनाम्यहम् ।
अपो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥

अथर्ववेदे[७] आचार्यबृहस्पतिना प्रदत्तानां शतविधानाम् औषधीनां सोमो राजा स्वीकृतः । मन्त्रोऽत्र प्रमाणम्— या ओषधयः सोम राज्ञीर्बह्वीः शतविचक्षणाः । ब्राह्मणग्रन्थेषु विशेषतः कौशीतकिब्राह्मणे पीतदारु, गुग्गुलु, खदिरं, बिल्व, न्यगोधादयः प्राधान्येनोल्लिखिताः । परं सर्वौषधीनां मूलः पलाशः एवाभिमतः अस्यां पङ्क्त्याम्— सर्वेषां वा एष वनस्पतीनां योनिः यत् पलाशम् ।[८] वृक्षाणां वनस्पतीनाञ्च ओषधिरूपेण महत्त्वं अथर्ववेदे प्रतिपादितं तत्र कामचिकित्सा भूतविद्याशल्यचिकित्सादिषु उपयुक्ताः वनस्पतयः ओषधयश्च वर्णिताः ।

---

१. हिमाद्रि-दानखण्ड १३ अध्याय ।
२. अ.सू.- ५-१-१२
३. अ.मृ. — ५-१-१२ पर (सू.- सक्तव्याः धानाः)
४. ऋग्वेद — १०-९७-२
५. शुक्ल यजुर्वेदे- १२-७६
६. शुक्ल यजुर्वेद — ६-२२
७. अथर्ववेद (६-९-९६)
८. कौ.ब्रा. — ६-१-१४८

प्रस्तुतोद्धरणैः वृक्षाणाम् ओषधिपरकं महत्वं सिध्यति वैदिकसाहित्ये च वनस्पतिः औषधिश्च वृक्षाणां द्विविधत्वमपि प्रतिबिम्बितम् । सूत्रकारेण पाणिनिना औषधिवनस्पत्योश्च वनानां पृथक् पृथक् उल्लेखः विहितः । विभाषौषधिवनस्पतिभ्यः[१] वनस्पतयः वृक्षाश्च पर्यायाः एवाभिमताः । ऋग्वेदे[२] प्रमुखतः वृक्षगुल्मऔषधिलता इति विभाजनं प्रस्तुतम् । पुष्पित फलित अपुष्पित फलितइति द्विधं वर्गीकृतम् मनुना[३] च प्रमाणञ्च पद्यमिदम्—

अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः ।
पुष्पिणः फलिनश्च वृक्षास्तूभयतः स्मृताः ॥

एतदतिरिक्तं मनुना गुच्छागुल्म तृण लतादयः अपि उल्लिखिताः । पाणिनिसूत्रे (८-४-६) पठितायां

'फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगमाः ।
औषधयः फलपाकान्ता लता गुल्माश्य वीरुधः ॥

कारिकायां पुष्पारहितफलिताः वनस्पतयः, फलपुष्पयुक्ताः वृक्षाः, औषधि, लता, गुल्मवीरुधाश्च इति षड्विधं वर्गीकरणं प्रस्तुतम् । हिमाद्रिना महाभारते प्रस्तुतं षड्विधत्वेन उद्धृतम्— वृक्षगुल्मलतावल्लयस्त्वक्सा-रास्तृणजातयाः इत्यादिनाम् ।

वृक्षाणां वर्गीकरणं प्रत्येकवर्गे परिवर्धनस्य विशेषता सामान्यरूपेण विद्यते । अस्मिन् सन्दर्भे वृक्ष इति पदस्य व्युत्पत्तिपरकं अवलोकनम् आवश्यकं प्रतीयते । वृक्ष इति पदम् आरोपणार्थक बृंहधातोः निष्पन्नम् । बृहधातोः वृद्ध्यर्थकोत्पत्तिरपि परिलक्षिता विशेषतः वृक्षस्य परिवर्धनार्थे अथवा पुष्पाणां फलानाञ्च वृद्ध्यर्थे । औणादिकेन वृश्च् धातो कपि वृक्षशब्दनिष्पतिशमिमता, वृश्च्यते छिद्यतेऽसौ वृक्षः । परं पर्यावरणात्मकदृष्ट्या-समालोचनेन वृक्षशब्दस्य वृद्ध्यर्थः सम्यक् प्रतीयते । वैयाकरणैः वृक्षाणामभावे कस्यापि तत्त्वस्य परिवर्धनं नाङ्गीकृतम् । पतञ्जलिना तु वृक्षशब्दः अकारान्तः सकारश्च प्रत्ययः । अर्थोऽपि कश्चिद् गम्यते मूलस्कन्धपलाशवान् एकत्वञ्च ।[४] यद् वैयाकरणैरपि इति लक्षणं व्याख्यातम् । अनेन व्याख्यानेन सिध्यति पुष्पितफलित वृक्षाः एव अभीष्टाः । वृक्षच्छेदनं पर्यावरणात्मकदृष्ट्याऽपि सर्वथा अनुपयुक्तमेव पुरा ग्रामं परितः अरण्येनैव ग्रामो लब्धः इति आभासते स्म ।[५] अग्निपुराणेऽपि[६] वृक्षायुर्वेदाध्याये आवासं निकषा । वृक्षाणां महत्त्वं प्रतिपादितम् । एतेरेय-ब्राह्मणग्रन्थे प्रायणीयेष्टयाम् अग्निदेवतायाः स्तुतिपरकमन्त्रेषु वृक्षाः अग्निना सम्बद्धाः अतः दक्षिणस्यां दिशि तेषायारोपणम् श्रेयस्करमिति उल्लिखितम्—

---

१. अ.शू.—८-४-६
२. ऋग्वेद— १०-९७-१५
३. मनु—(१-४६-४८)
४. अ.सू.—(१-२-४५ वा.-९)
५. पाणिनि— १,१,४ भाज्ये—अस्ति साख्यके ससीमकेस्थऽलिके ग्रामो लब्ध इति ।
६. ग्रामो लब्ध इति । अग्निपुराण— अ.११९

यद् अग्नि यजति तस्मात् दक्षिणतोऽग्रे औषधयः ।
पच्यमाना आग्नेयो हय औषधयः ।।[१]

मत्स्यपुराणे[२] फलवन्तः वृक्षाः मन्दिरमण्डपस्य पूर्वस्यां दिशित आरोपणीयाः । पश्चिमतश्च जलशोषकाः वृक्षाः, उत्तरतश्च पुष्पोद्यानं, तालवृक्षाश्चारोपणीयाः । विशिष्ट वृक्षारोपणे विशिष्टदिङ् निर्धारणमपि पुराणेषु उपलभ्यते । अग्निपुराणे[३] तु प्लक्षं उत्तरतः शुभः दक्षिणे च कण्टकद्रुमाः गृहवासं निकषा तु उद्यानां मङ्गलकारी इत्युल्लिखितम् । सम्भवतः विधानेऽस्मिन् सर्वतः वायुप्रदूषणनिवारणमेव मूलकारणमासीत् । वृक्षारोपणात् प्राक् ब्राह्मणचन्द्रयो[४]पूजनमपि भारतीयपरम्परायां विधीयते । नक्षत्रादीनां विचारणेन उत्तमवृक्षारोपणं सिध्यति । बीज-वपनलवनकालेषु च इन्द्रमरुद्पर्जन्यभगादिदेवतानां मन्त्रोच्चारणेन स्तुतिरपि शुभफलदायिका मन्यते ।[५] सुख-समृद्धिप्राप्त्यर्थं, रोगनिवारणार्थं, वास्तुदोषनिवारणार्थमपि मन्त्राः उल्लिखिताः सङ्गतमिदं प्रतिभाति यतो हि ओष-धिभिरेव सर्वेषां रोगाणां निदानं सम्भवः । "या ओषधयः स्वस्त्ययनं सर्वव्याधिविनाशनम् ।[६] तथा च "शं नो वनस्पते गृहे हीनः स्याद्वास्तुदोषानुत्[७]" अग्निपुराणस्य एभिर्मन्त्रैः तथ्यमिदं स्पष्टं यत् स्वास्थ्यरक्षायै आवासे वास्तु-शास्त्रानुकूलव्यवस्थाकृतेऽपि वृक्षाणां महत्त्वं सर्वसिद्धं संरक्षणञ्च वृक्षाणां सर्वलोकहिताय वैदिकसाहित्ये सर्वत्रानुस्यूतम् ।

वृक्षाणां संरक्षणार्थं संस्कृतवाङ्मये वृक्षाः मनुष्यस्य पुत्रवद् वर्णिताः पुराणैः महाभारतेन च वृक्षसंरक्षणे महद्योगदानं कृतम् । वृक्षाः इहलोके परलोके च रक्षकाः सन्ति अतः हिमाद्रिना[८] उक्तम् वृक्षारोपयितुः वृक्षाः परलोकं पुत्रा भवन्ति । महाभारते[९] च वृक्षाः तेषां संवर्धनं, परिपालनं, संरक्षणं पुत्रवदेव कर्तव्यम् पुत्रवदेव परिकल्पिताः उक्तमपि । पुत्रवद् परिपाल्याश्य पुत्रास्ते धर्मतः स्मृताः । मत्स्यपुराणे[१०] तु एकः वृक्षः दशपुत्रसदृशो मन्यते—

---

१. ऐ.ब्रा.— २.१.३५
२. मत्स्य पुराण— २७०-२८-२९
३. अग्नि प्रक - अ. २८२.३ वृक्षायुर्वेदमाख्यास्ये प्लक्षोत्तरतः शुभः ।
प्राग्वटो याम्यतस्तवात्र आप्येऽश्वत्थक्रमेण तु ॥
दक्षिण्यं दिशमुत्पन्नाः समीपे कण्टकद्रुमाः ।
उद्यानं मृहवाजे स्यात्तिलान्वाप्यथ पुष्टितान् ॥
४. गृह्णीयाद्रोपयेद्वृक्षान्द्विजं चन्द्र प्रपूज्य च । अग्नि पुराण — अ. २८२-३
५. अग्नि पुराण — १०४-८५
६. अनुशासन पर्व,५-३१
७. अग्निपुराण — १०५-६२
८. अ. — १३, दानखण्डे ।
९. अनुशासनपर्व ५-३१
१०. हिमाद्रि अ.-१३ दानखण्डे

दशकूपसमावापी, दशवापीसमो द्रुमाः ।
दशद्रुमसमः पुत्रः, दशपुत्रसमो द्रुमः ॥[१]

यथा सूक्ष्मप्रत्यनेनाभिरक्षितः अंकुरः भविष्ये फलप्रदः भवति तथैव वृक्षाणां परिपालनं संवर्धनं नरकादपि त्रायते । सर्वविदितमिदं तथ्यं यत् कन्यादानं सर्वाधिकं पुण्यप्रदायकम् अभिमतं परं तस्मादपि अधिकं फलंप्रदं वृक्षारोपणम् । वृक्षारोपणेन वृक्षसंरक्षणेन च संरक्षकः यमलोके सूर्येण रक्ष्यते इममपि संकेतितम्— शिवपुराणे—[२]

आरामच्छायाकर्तारो मार्गे वा वृक्षरोपकाः ।
व्रजन्ति यमलोकं च आतपेऽपि गतक्लमाः ॥

पुष्पोद्यानारोपयिता च पुष्पकविमानेन स्वर्गं याति । यान्ति पुष्पकयानेन पुष्पारामकरानराः[३] अथर्ववेदे[४] वनस्पतीनां राजा सोम सर्वविधपापेभ्यः मोक्षदः स्यात् इति कामना कल्पिता । ऋग्वेदे दशममण्डले[५] महीधरेण विभिन्न औषधिभिः पापरोगाणां निवृत्तिः प्रार्थिता ।

भारतीयपरम्परानुसारं शास्त्रानुसारञ्च वृक्षाः मानवजीवनस्याधाराः सन्ति । व्यवहारेणापि सिध्यति तथ्यमिदम् । पर्यावरणप्रदूषणेऽस्मिन् जगति पर्यावरणसंरक्षणं सर्वेषामेव चिन्ताकरः विषयः वर्तते वृक्षाः पर्यावरणस्य महत्त्वपूर्ण संरक्षकाः वर्तन्ते । पर्यावरणस्य संतुलनार्थं नियमितरूपेणवृष्ट्यर्थं जलवायुनियमनार्थं भूमिक्षरणनिवारणार्थञ्च वृक्षाणं संरक्षणं संस्कृतवाङ्मये सुतरां प्रतिपादितम् ।

वृक्षाणां छेदनेन, नाशेन, पशूनां वधेन च नरकस्य प्राप्तिः भवति । इति पञ्चतन्त्रे प्रातिपादितम्—

वृक्षांश्छित्वा तरुन् हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गं नरकं केन गम्यते ॥[६]

वेदेषु वृक्षाणामछेदनं धार्मिकभावना एव प्रेरिता, चतुर्वर्गचिन्तामणौ कूपनिर्माणाय विहितं वृक्षच्छेदनं द्यौरन्तरिक्षकृते अशुभं न स्यात् इति कामना कृता । वृक्षमूलान्यपि संरक्षणीयानि इत्यपि वैदिकपरम्परा आसीत् । महाभारते वृक्षाः प्राकृतिकसमाहारस्य कोषरूपे संरक्षणीयाः इति प्रतिपादितम् । मनुजस्य वृक्षैः सह भावनात्मकसम्बन्धः वर्तते । अतः वृक्षाणां पीडनं, नाशनञ्च पापः एव स्वीकृतः । यद्यपि भौतिकेऽस्मिन् युगे वैज्ञानिकैः वृक्षेषु जीवनं, चेतनत्वं, संवेदनाश्च विद्यन्ते इति प्रमाणीक्रियते, महाभारते[७] तु वृक्षेषु श्रोत्र, घ्राण, दर्शन स्पर्शाणाञ्च प्रवृत्तम् स्पष्टमेवोल्लिखिताः । हर्षविषादयोश्च प्रभावोऽपि तेषु परिलक्ष्यते ।[८] वृक्षेषु चेतनत्वम् अनुसन्धानैरपि पुष्टीकृतम् ।

१. हिमाद्रिना— दानखण्डे अं. १३ ।
२. शि.पु. ५-११-६
३. शि.पु. ५-११-७
४. अहसं पापाद्रोगरूपान्मुञ्चयन्तु पृथक् कुर्वन्तु । महीधर भाष्य-वाजसनेयी संहिता-१२-८९
५. ऋग्वेद - १०-९७-१५
६. ऋग्वेद— १०-९७-१५
७. मोक्षधर्म पर्व महाभारत— १४८.१०
८. ऊष्मतो म्लायते पर्णं त्वक्फलं पुष्पमेव च । म्लायते शीर्यते चापि स्पर्शस्लेनाद्य विद्यते ॥

तेष्वपि संवेदनाः वर्तन्ते। प्रतिकूलपरिस्थितिषु तैः चिन्ता शोकभयपीडादयः अनुभूयन्ते अनुकूलपरिस्थितिषु च वृक्षाः अपि प्रसन्नाः हर्षिताः, आह्लादिताः भवन्ति। महाभारते[१] उक्तम्

सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात्।
जीवं पश्यामि वृक्षाणां अचैतन्यं न विद्यते॥

यथा अकारणं पीडनं न कर्तव्यम् तथा निष्प्रयोजनमेव वृक्षाणां छेदनमपि वारणीयम्। यतो वृथा वृक्षच्छेदी वज्रशस्त्रनामके[२] नरके पतति।

संरक्षणोपायाः— वृक्षैः जनेभ्यः पुष्पाणि, फलानि, पत्राणि, छाया च प्रदीयन्ते अतः वृक्षच्छेदनं कौटिल्यानुसारेण[३] अपराध मेवाभिमतम्। कौटिल्येन वृक्षाणां शाखा, स्कन्ध, मूलावछेदनार्थं पृथक् पृथक् दण्डव्यवस्था विहिता यथा। अंकुराणां छेदनार्थं षट्पणाः, शाखाछेदनार्थं द्वादशपणाः, स्कन्ध छेदनार्थं च चतुर्विंशतिपणाः दण्डस्वरूपेण निर्धारितः। वृक्षस्य पूर्णरूपेण छेदनं तु जघन्यः अपराधः। धार्मिकस्थलेषु शैक्षणिकसंस्थानेषु राजभवनेषु आरोपितानां वृक्षाणां छेदनार्थं द्विगुणिता दण्डव्यवस्था कौटिल्येन विहिता।[४] वसिष्ठधर्मसूत्रेषु[५] विष्णुधर्मसूत्रेष्वपि पुष्पितः फलिनश्च वृक्षस्य छेदनार्थं दण्डव्यवस्था उल्लिखिताऽस्ति। पल्लवितपुष्पितः वृक्षाणां छेदनार्थं राजाऽपि नानुमतः। मनुना तु[६] वृक्षछेदनार्थं ऋक्शतं जप्यम् इति व्यवस्थितम्।

फलादानं तु वृक्षाणां छेदने जप्यं ऋक्शतम्।
गुल्मवल्लीलतानां च पुष्पितानां च वीरुधम्॥

दण्डविधानेनानेन सिध्यति न केवलं ऋषयः कवयः, साहित्यकाराः अपितु प्रशासनम् अपि वृक्षसंरक्षणं प्रति सन्नद्धम् आसीत्। प्रदूषितपर्यावरणस्यास्मिन् युगेऽपि वृक्षसंरक्षणार्थं ईदृशी दण्डव्यवस्था विधेया। महाभारते उल्लिखितं यत् यदि गौः पयः अभीष्टः तर्हि गौः सेवनीया न तु नाशनीया। तथैव वृक्षेभ्यः यथावश्यकमेव ग्रहणीयं न तु वृक्षोच्छेदनमेव करणीयम्। वृक्षसंरक्षणार्थं जनैः मालाकारैः इवाचरणीयम्। यथा मालाकारः पुष्पं फलमेव वृक्षेभ्यः अवचिनोति तथैव अस्माभिरपि ग्रहीतव्यम्।

पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्[७] ब्रह्मवैवर्तपुराणे वृक्षसंरक्षणविषये प्रेरणा प्रदत्ता—

---

१. शान्तिपर्व— १८४
२. अम्बरी मे गोस्वर्णहतं द्रुमच्छिद वज्रशस्के। अग्निपुराणम् अ.८०-१६
३. अर्थशास्त्र — २-९ पृ.७८
४. पुण्यसान-तपोवन-श्मशान-श्रमेषु च समीवृक्षषु चैलेषु द्रुमेष्वलक्षितेषु च त एव दण्डः द्विगुणः कार्यः राजभवनेषु च (कौ. ३-१९-पृ.२४)
५. (कौ.३-१९-पृ.२४७)
६. Legal Protection of Planss in Ancient India Stenback p - ३३८
७. उद्योगपर्वमहाभारतम्

पुत्रैर्विना शुभफलं न भवेन्नराणाम् ।
दुष्पुत्रकैरपि तथोभयलोकनाशः ॥
एतद्विचार्य सुधिया परिपाल्यवृक्षान् ।
यत्नेन तेऽपि विधिना परिपालनीया ॥[१]

वृक्षाणां संरक्षणाय इदं पद्यं प्रकाशस्तभ्य इव मार्गप्रदर्शनः प्रतीयते ।

१. हिमाद्रि— दानखण्ड अध्याय-१३ चतुर्वर्गचिन्तामणिः

वैद्यविज्ञानस्य परमावधिः संस्कृतमेव

मजुम्दार, इन्दिरा

उपोद्घातः — विश्वेऽस्मिन् स्थितासु अनेकासु भाषासु संस्कृतभाषा अत्यन्तप्राचीना । एषा गीर्वाण-भाषेत्युच्यते । 'संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः' 'वाणीं' भजत गौर्वाणीम् इत्यादयः सूक्तयः अस्याः महत्वं द्योतयन्ति । संस्कृतभाषायाः एव 'अमरवाणी' इत्यपि नामान्तरम् । नास्ति यस्याः कस्याः अपि भाषायाः एतादृशं गौरवम् । किन्तु अधुना संस्कृतभाषा मृतभाषा इति सर्वत्र जोघुष्यते अमृतभाषां प्रति । मृतान् पुनरुज्जीवनदात्री संस्कृतभाषा देवैरपि प्रभाष्यते । एतादृशी भाषा दुर्देववशात् प्राचुर्यं न भजते । संस्कृतभाषा विज्ञानखनिः । तस्मात् अनेकानि विज्ञानरत्नानि उत्पाद्यन्ते प्रकाशन्ते च । तेष्वन्यतमं वैद्यविज्ञानम् ।

वैद्यशब्दनिष्पत्तिः — विद्-ज्ञाने: विद्-लाभे इति धातवोः वैद्यः, वैद्यं इति रूपे सिद्धे । वैद्यस्य विज्ञानं वैद्यविज्ञानम् । वैद्यशब्दस्य वैद्यं रोगाणां चिकित्सा रोगनिवारक इति अर्थः निघण्टुकारैः उक्तः । "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।" इति हि सिद्धा प्रसिद्धिः । मन्देन कृते यत्किञ्चित् कर्मणि प्रयोजनमस्ति चेत् महर्षिभिः देवैश्च सम्पादिते वैद्यविज्ञाने प्रयोजनं कियदिति वक्तुं न शक्यते ।

वैद्यस्य आवश्यकत्वम्— कालोऽयं कलिपूर्णः । तत्प्रभावश्च रोगरूपेण दृश्यते । प्राचीनकाले रुग्णाः अल्पा एव । न कुत्रापि अपमृत्युदोषाः । इदानीम् अधिकसंख्यकाः जनाः अकालमृत्युग्रस्ता एव । एतस्मात् प्रमादात् उद्धर्तुं आयुर्वेद एव समर्थः । तादृशो आयुर्वेदः अस्यां भाषायां जात इति अस्याः भाषायाः महत्वम् ।

वैद्यशास्त्रस्य वेदतुल्यत्वम्— संस्कृतवाङ्मये वैद्यविधानं विज्ञानं आयुर्वेदरूपेण कथ्यते । किन्तु इदानीं सर्वे जनाः आङ्ग्लविद्यामोहिताः वैद्यविज्ञानमूलभूतं आयुर्वेदं न स्मरन्ति । "अष्टाङ्गसङ्ग्रहः" नामके ग्रन्थे आयुर्वेदः अथर्ववेदस्य उपवेदत्वेन स्वीकृतः अस्ति । पक्षान्तरे "चरणव्यूह" नामके ग्रन्थे सः ऋग्वेदस्य उपवेदत्वेन वर्णितः अस्ति । सुश्रुतसंहितायाम् आयुर्वेदः अथर्ववेदस्य उपाङ्गत्वेन चर्चितः । परन्तु चरकसंहितायां आयुर्वेदः कस्यचित् स्वतन्त्रवेदस्य स्थानं भजति । महाभारतं आयुर्वेदस्य उपवेदत्वे विश्वसिति । किन्तु ब्रह्मवैवर्तपुराणं तस्य पञ्चम-वेदत्वं अङ्गीकरोति ।

आयुर्वेदस्य प्रादुर्भावः— प्रथमतया ब्रह्मा स्वायम्भुव मनव आयुर्वेदमुपदिदेश । सः अश्वनी देवताभ्यां प्रोवाच । तौ इन्द्राय ऊचतुः । स इन्द्रः देवान् सर्वानुद्धर्तुं धन्वन्तरये उपदिदेश । एवं ब्रह्मणः सकाशात् आविर्भूतः आयुर्वेदः इदानीम् अल्पसामग्रीवशात् आङ्ग्लौबधसादृश्यं भजते ।

वैद्यशास्त्रपरिचयः— मानवानां मरणाय मूलकारणं व्याधिः । तन्निवारकं शस्त्रं वैद्यशास्त्रम् । विज्ञानमेतत् बहुधा दृश्यते संस्कृते । वैद्यशास्त्रग्रन्थाः बहवो दृश्यन्ते । आयुर्वेद एव प्रथमवैद्यशास्त्रग्रन्थः ।

आयुर्वेदनिर्वचनम् — आयुरस्मिन् विद्यते इति आयुर्वेदः । अस्मात् आयुः वेत्तीति आयुर्वेदः ।

"आयुर्हिताहितं व्याधि निदानं शमनं तथा ।
विद्यते यत्र विद्वद्भिः आयुर्वेदःस उच्यते ।।"

"अनेन पुरुषो यस्मात् आयुर्विन्दति वेत्ति च ।
तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ।।"

इति आयुर्वेदाब्धिसारः लिखति । एतादृशस्थ वैद्यविज्ञानस्य पञ्चमवेदत्वं सिद्ध्यति ।

वैद्यविज्ञानं न केवलं लौकिकवाङ्मये वैदिक वाङ्मयेऽपि संदृश्यते । प्रथमो वैद्यः कः ? वेदकालादारभ्य अश्वनीदेवतौ देववैद्याविति कथ्यते । किन्तु धन्वन्तरिः देववैद्य इति निघण्टुकारैः कथ्यते । स धन्वन्तरिः क्षीरसागर-मथनसन्दर्भे अमृतभाण्डं स्वीकृत्य उद्भूतः । स एव मूलभूत इति वैद्यानां वनम् ।

वैद्यवैविध्यम् मन्त्रवैद्यम्— वैद्यं नैकविधम् । वैद्यविषये वैविध्यमस्ति । मन्त्र, तन्त्र, योग, सङ्गीत, मूलिकादि भेदेन बहुविधम् । वैदिकवाङ्मये मन्त्रवैद्यमेव दृश्यते । एकैकस्य रोगस्य एकैको मन्त्रः निर्दिष्टः । यथा सुखप्रसवाय, रक्तस्रावनिवारणाय, पलितकेशपरिणामाय, कुष्ठनिर्मूलनाय बहवो मन्त्राः दृश्यन्ते । तदनुष्ठानपद्ध-तिश्च तत्रैव विशेषेण द्रष्टव्यम् । धौम्यं उपमन्युः सर्वदा आहारविषये निर्बबन्ध । फेनाशनमपि निषिद्धम् । सायं समये गाः रक्षयन् सः क्षुधार्तः अर्कपत्राणि आक्षयत् । तस्मादन्धो भूत्वा चंक्रम्यमाणः कूपे पपात । सायंकाले शिष्यमन्वेषयन् गुरुरागत्य वृत्तान्तं श्रुत्वा अश्विनी देवतान् मन्त्रैः स्तोत्रं कुरु इति जगाद । तदा मन्त्रवचनेन तुष्टौ तौ तस्मै दृष्टिं अदाताम् । एषा कथा मन्त्रमहत्त्वप्रतिपादिका ।

योगवैद्यम्— योगासनादि शारीरिक, मानसिक व्याधिनिर्मूलनं क्रियते । प्राचीनाः सर्वे योगाभ्यासरताः । अत एव रोगदूराः । इदानीं तत्र विरलतया पुनः योगाभ्यासशिक्षणा सन्दृश्यन्ते ।

सङ्गीतवैद्यम् — 'म्यूजिक् थेरापि' Music therapy इति इदानीं यदुच्यते तत् संस्कृते प्राचीनकाले कथितमेव । रागाद्रोगोत्पत्तिः, रागाद्रोगशान्तिः इति प्रसिद्धिः । रागश्रवणेनैव व्याधयः निर्मूलिताः । इदानींरोगानां कारणं पाश्चात्यप्रभावितसङ्गीतमिति केचन वृद्धाः पण्डिताः मन्यते । योग्यसङ्गीतश्रवणेन मानसिकप्रशान्तिः, तद्द्वारा सव्यरक्तप्रसरणं, आरोग्याभिवृद्धिश्च । सङ्गीतस्य महतीशक्तिः ।

मूलिकावैद्यम्— वैद्यमेतत् अत्यन्तं प्राचीनम् । तस्य वैद्यस्य श्रीमद्रामायणं साक्ष्यम् । सुषेणः मूलिका-वैद्येनैव लक्ष्मणं वानरांश्च ररक्ष । तेन प्रयुक्ताः मूलिकाः सञ्जीवकरणी, सन्धानकरणी, सौवर्णकरणी, विशल्यकरणी इति चतस्रः । तासां आघ्राणेनैव सर्वे नीरोगा अभवन् ।

चिकित्सानिर्वचनम् — "या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते ।" यया क्रियया रोगः उपशम्यते तस्याः क्रियायाः चिकित्सा इति नाम । वैद्यः प्रथमतः रोगं निर्धार्य अनन्तरं औषधं निर्णीय ततः कर्मकुर्यात् । सावधानतया चिकित्सा कर्तव्या । मानवस्य आयुः वैद्यस्य औषधनिर्णये एव अस्ति ।

"या वीणागता तन्त्री सर्वान्रागान्प्रभाषते ।
तथा हस्तगतानाडी सर्वान्रोगान्प्रकाशयेत् ॥"

परीक्षाविधानेषु अन्यतमा नाडीपरीक्षा । अनया परीक्षया मानवस्य न केवलं रोगः अस्य जीवनकालः कियदिति ज्ञायते । वातपित्तश्लेष्माः व्याधयः मूलकारणानि । एतेषाम् उपचयापपचयेन व्याधिर्जायते । एषा परीक्षा गुरुमुखतः ज्ञातव्या । परीक्षाविधाने स्त्रीपुरुषयोः भेदोऽस्ति । पुरुषाणां दक्षिणहस्तः, स्त्रीणां वामहस्तः । धमनी (नाडी) स्पन्दनेन वैद्यः सर्वं ज्ञायते । नाडीपरीक्षया एव प्राचीनाः गर्भस्थः । शिशुः पुमान् वा स्त्री इत्यपि वेत्तुं समर्थाः । नाडीचलने बहवो गतयः । सर्प, जलौक, राजहंस, मयूर, कुक्कुटादि भेदाः । वैद्यः स्वाङ्गुलि त्रितयो धृत्वा धृत्वा वारत्रयं विमोचयेत् । सदा तस्य रोगस्वरूपावगतिः जायते । प्रायशः नाडीपरीक्षा प्रातःकाले एव क्रियते । भोजनानन्तरं स्नानानन्तरं नाडी सम्यक् न बुध्यते । अधुना 'स्कानिंग्' यन्त्र निर्धारिते अपि रोगस्य यथार्थस्वरूपः न ज्ञायते । सर्वं यन्त्राधीनमेव । एतदपेक्षया नाडीपरीक्षा एव सुलभतमा, निद्रव्या, निरपाया च । शरीरे अन्तःस्थितिं द्रष्टुं किरणसंयोगः (प्रसारः) अपेक्षते । तत्प्रसरणेन केषाञ्चन प्रमादः सम्भविष्यति ।

मूत्रपरीक्षा — एषा इदानीमपि आङ्ग्लवैद्यैरपि आचरिता दृश्यते । यः कोऽपि जनः ज्वरयुक्तो वा व्रणितो वा वैद्यस्य समीपं गच्छति चेत् वैद्येन प्रथमतः मूत्रपरीक्षा, रक्तपरीक्षादि यन्त्र दीयते । यन्त्रबलेन परीक्ष्य स सूचयति । तद्दृष्ट्वा वैद्यः वैद्यं करोति । यन्त्रलोपे फलिते व्यत्यासो दृश्यते । तत्परिणामः रोगी अनुभवति । आयुर्वेदे यः परीक्षां करोति स एव रोगं निर्धारयति स एव स्वेनैव विरचितैः औषधैः वैद्यं करोति । तदा प्रयोजनं सुसम्पन्नं भवति । इदानीमपि वृद्धैः 'कामला' रोगः (जांडीस्) मूत्रपरीक्षया गृहे एव निर्धार्यत इति अनुभवसिद्धो विषयः ।

जिह्वापरीक्षा — जिह्वायां दृश्यमानेन वर्णेन व्याधिः निर्धार्यते । एषा परीक्षा साधारणतया विषप्रयोगाः विषज्वराश्च निर्धार्यन्ते । इदानीमपि आङ्ग्लवैद्यैऽपि शस्त्रचिकित्सा समये एषा परीक्षा क्रियते ।

हस्तपरीखा — हस्तदर्शनेन अङ्गुलीनां संकोच व्याकोचेन व्याधिः निर्धार्यते अनुभवसिद्धैः आयुर्वेद वैद्यैः । हस्तगत रक्तप्रसारणेन व्याधिः तेषाम् अवगम्यते । एतादृशाः वैद्याः इदानीम् आन्ध्रप्रदेशे वर्तन्ते ।

नेत्रपरीक्षा — एषा सूक्ष्मेक्षिकया कर्तव्या । मानवस्य जीवनं तस्य आरोग्यादिकं च रक्तलोपादीनि अनया ज्ञायन्ते । "सर्वेन्द्रियाणां नयनं प्रधानम्" इति तेषां सिद्धान्तः । शरीरे बहवो नाडयः वर्तन्ते । अवसानसमये सर्वे स्तब्धाः भवन्ति । नेत्रपरिसरप्रान्तेषु स्थिताः यदि निस्तब्धाः भवेयुः तदा लेपनैर्वा पत्ररसैर्वा पुररुज्जीवयितुं शक्यते । नेत्रपरीक्षया कामलारोगनिर्धारणं अद्यापि क्रियते ।

स्वरपरीक्षा — कण्ठस्वरश्रवणेन व्याधेः निर्धारणम् । अत्यपूर्वम् । रुग्णस्य तत्त्वं किमिति प्रथमतो विचारणीयं वैद्येन । वातपित्तश्लेष्मात्मकत्वेन तत्त्वत्रयं वर्तते । एकैकस्य एकैकं तत्त्वम् । तन्निर्धार्य तस्मै औषधप्रदानम् अवश्यं करणीयम् । औषधयोऽपि गुणत्रयात्मकत्वेन वर्तन्ते । तद्विपरिणामम् अनुसृत्य चिकित्सा कर्तव्या ।

लोके शस्त्रचिकित्सासिद्धान्तः (Operation theory) सुश्रुतेनैव प्रोक्तः इति सर्वैराङ्ग्लवैद्यैः जोघुष्यते । शस्त्रचिकित्साविभागे एव शल्यचिकित्सा अपि अन्यतमत्वेन इदानीन्तनैः कथ्यते ।

शल्यचिकित्सा — शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्टास्थिबालनखपूयास्रावदुष्ट-व्रणान्तर्गर्भशल्योद्धरणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रणनिश्चयार्थं च 'शल' हिंसायां इति धातोः शल्यशब्दः निष्पद्यते । अस्मिन् शल्यचिकित्सायां रोगिणः शरीरे मनसि च कष्टं वर्धते इति हेतोः 'शल्यचिकित्सा' इति नाम सार्थकं भवति । शल्यकर्मणा भग्नास्थिसंयोगः, क्षतावयवचिकित्सा च भवतीति अथर्ववेदीयमन्त्राः प्रमाणयन्ति । अतः शल्यतन्त्रं नाम कण्ठस्य अधस्तात् स्थितेषु भागेषु उत्पन्नानां व्रणादीनां चिकित्सा । किन्तु पत्ररसलेपनेन भग्नास्थीन् संघटितान् कर्तुं आन्ध्रप्रदेशे स्थित 'पुत्तूर्' ग्रामे क्षत्रियाः प्रयतन्ते । प्रयत्नं सफलं भवत्येव । अलोपति आङ्ग्लवैद्ये भग्नास्थि संधानार्थं लोहदण्डः (Steel Rod) इदानीं उपयुज्यते । तत्तु प्राचीनमेव । विषयोऽयं ऋग्वेदे दृश्यते । वैदिकचिकित्सकाभ्यां अश्विभ्यां कृत्रिमलोहपादप्रदानपुरस्सरं विस्पलायाः साहाय्यम् आचरितं इति ऋग्वेदः प्रमाणयति । कृत्रिमलोहपादसंयोजनं शल्यकर्म विना न सम्भवति इति निश्चयेन वक्तुं शक्यते । एवमेव कायचिकित्सा, मानसिकचिकित्सा, कौमारभृत्यं, अगदतन्त्रं, रसायनतन्त्रं, वाजीकरणतन्त्रं इति अनेकाः चिकित्साः प्रोक्ताः आयुर्वेदे ।

उपसंहारः — प्राणपरिक्षणार्थं शरीरपोषणार्थमेव वैद्यमाविर्बभूव । तद्विधानं संस्कृतवाङ्मये आयुर्वेदे दृश्यते । सुप्रसिद्धकाव्येष्वपि पत्ररसेन प्रणितानां संरक्षणं, प्राणप्रमादात् पालनं दृश्यते । आयुर्वेदवैद्यं सर्वं आस्तिकता सम्पूर्णा आङ्ग्लवैद्ये विपरिणामेन प्राणप्रमादः सम्भविष्यति । न तथा आयुर्वेदे । साम्प्रतं प्राणचिकित्सा इति एका चिकित्सा अत्याश्चर्यकरी दृश्यते । मानवे स्थितेषु चक्रेषु सङ्कोचेन वा निस्तेजसा वा रन्ध्रैर्वा व्याधिर्जायते इति तेषां सिद्धान्तः एते वैद्याः रोगिणं न स्पृशन्ति । पुरतः स्थापयित्वा हस्तचालनेन तद्दोषं शक्तिप्रसारणेन अपनोदयन्ति । अनया क्रियया न कापि बाधा । बाल प्रभृति वृद्धपर्यन्तं सर्वेषां अनुभवयोग्यम् । पूर्वकाले 'साधूनां दर्शनपुण्यं स्पर्शनं पापनाशनम्' इति विश्वासः वर्तते । तदविश्वसनीयमिति केचन मन्यते । किन्तु एषा चिकित्सा विश्वासमुत्पादयति । आयुर्वृद्धि करत्वादेव संस्कृते प्रोक्तस्य वैद्यस्य आयुर्वेद इति तत्संस्कृते एव वर्तमानत्वात् वैद्यस्य परमावधिः इति वक्तुं शक्यते । सन्तु नाम अनेकानि वैद्यानि इदानीं 'एडस्' इति व्याधिः जनान् सर्वान् पिशाचिमिव भयान्दोलितान् करोति । तस्य आङ्ग्ले निवारणोपायः न दृश्यते । आयुर्वेदे निवारणमस्तीति वैद्य शिखामणयः सप्रमाणं वदन्ति । अतः आयुर्वेदस्य महत्वं द्योत्यते ।

"आरोग्यं भिषजाधीनं देवो धन्वन्तरिर्भिषक् ।
तच्छास्त्रं संस्कृताधीनं संस्कृतं परमावधि ॥
संस्कृतं जयतात्सदा ॥"

अतः वैद्यविज्ञानस्य परमावधि संस्कृतमिति शम् ।

रोगप्रतिकारे श्लोकवृत्तानां प्रयोगः

श्रीगोविन्दचन्द्रमिश्रः

"इदं शरीरं कैन्तेय क्षेत्रमित्यभिधीयते"

तदिदं शरीरं स्थूलं सूक्ष्मं चेति द्विविधं सत् एकमेव । अन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयादि-कोषाच्छन्नः आत्मा निर्विकारः । जीवात्मा तु अन्तःकरणोपहितोऽन्नमयं कोषमाश्रित्य कर्मठो भवतीति दृश्यमानं स्थूलं शरीरं क्षेत्रं भवति । एतत् तु प्रत्यक्षतया सूक्ष्मशरीरेण परिचाल्यते । एतत् तु अन्नाद् जातमन्नेव वर्द्धितमन्नेन विद्यमानं विनान्नं विनश्यतीति अन्नमयकोषनाम्ना परिचीयते ।

कथितेषु पञ्चसु कोषेषु प्राणमयः कोषः (प्राणादिपञ्च वायवः पञ्चकर्मेन्द्रियाणि) वेदान्तसारमतेन रजोगुण-मयः आयुर्विज्ञानमतेन वातदोषाधीनश्च भवति । ज्ञानेन्द्रियपञ्चकं मनश्चेति मनोमय-कोषः 'संशयात्मकं मन' इत्युक्तेः तमोमयः पित्तदोषाश्रयी । विज्ञानमयकोषस्तु ज्ञानेन्द्रियबुद्धिवलितः 'निश्चयात्मिका बुद्धि' रित्युक्तेः सत्त्वगुणमयः कफदोषाश्रयी । अत्र गुणदोषविचारे सर्वस्यापि गुणस्य वा दोषस्य वा मात्रातारतम्येन साङ्कर्य्यमेव स्वीकार्यं कस्यापि पूर्णतया शुद्धता न स्यात् इति शास्त्रनिश्चयः । अर्थात् शुद्धसत्त्वनाम्ना शुद्धकफनाम्ना परि-चितेऽपि व्यावहारिक-गुणदोषे वा अन्ययोर्गुणदोषयोः स्वल्पतयापि स्थितिरस्त्येव । तत्तन्नामग्रहणे बाहुल्यमेव कारणम् । अत एव इन्द्रियाणि यद् यद् गुणदोषयुक्तेषु विषयेषु चरन्ति, तत्तत् प्रभावेण सूक्ष्मशरीरं तथैव प्रभावितं भवति ।

सूक्ष्मेण स्थूलं परिचाल्यते इत्यस्य प्रमाणम् क्वचिद् विषये एकाग्रं मनः एकाग्रा बुद्धिश्च । व्यक्तिचित्ताय क्षुत्-तृडादिवेगं ज्ञातुमवसरो न दत्तः । एवं सति एतत् कोषद्वयमन्यत्र लग्नं सद् रोगं तज्जनितयन्त्रणामपि विस्मापयितुमलम् । तथा हि श्रीमद्भागवते भिक्षुगीतायाम्—

मनो वशेऽन्ये ह्यभवन् स्म देवा
मनस्तु नान्यस्य वशं समेति ।
भीष्मो हि देवः सहसः सहीयान्
युञ्ज्याद् वशं तं स हि देव-देवः ॥

श्रुतौ च—

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ।।

तर्कसंग्रहेऽपि— "सुखदुःखाद्युपलब्धिसाधनमिन्द्रियं मनः" इति मनोलक्षणं कृतम् । अतः काये मनसः अधिकारः सर्वैः स्वीकृतोऽनुमतश्च । मनसस्तु पराबुद्धिरिति श्रीमद्भगवद्गीतोक्त्या यत्र बुद्धिर्मनो नियामिका सा व्यक्तिः मनोनियामकबुद्धिविशिष्टव्यक्त्यपेक्षया साधुर्भवति । भागवतं तु मन एव सर्वेभ्यः बलवत्तममिति प्रोक्त-वाक्येन प्रमाणयति । तच्च मनः प्रारब्धकर्मफलवशेन जातमात्रस्य जनस्य ग्रहदशान्तर्वर्त्ति भवति । फलेन - तेषां तेषां सामयिकाधिकारवतां ग्रहाणां कारकत्वेऽधिकारे च स्थितेष्वङ्गेषु अन्तःकरणेषु च ते ते रोगाः प्रभवन्ति इति ज्योतिर्वैद्यकशास्त्रयोर्निश्चयः ।

एष्वेवाङ्गेषु अन्तःकरणेष्वेव श्लोकवृत्तप्रभावः कथंकारं साधीयान् स्यादिति विचारावसरे मनोबुद्धीन्द्रि-यमार्गेण भेषजं पेशीभरण-सूचीवेध मार्गेणेव प्रविश्यान्तरकेन्द्रं दोषदूरीकरणपूर्वकमिष्टं साधयितुमर्हति इति प्रकारः प्रदर्श्यते । तत्र वृत्तपरिचयः -

पद्यं चतुष्पदी तत्तु जातिवृत्तमिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ।। ४ ।।

सममर्द्धसमं वृत्तं विषमं चेति तत् त्रिधा ।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः ।। ५ ।।

आदिस्तृतीयवद् यस्य पादस्तूर्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ।।

(छन्दोमञ्जरी प्रथमस्तवकः)

सममिन्द्रवज्रादयः, अर्द्धसमं वियोगिनी प्रभृतयः, विषममुद्गतादयः ।

एषां स्वरूप-देवता-फलनिर्णयः—

मो भूमिस्त्रिगुरुः श्रियं दिशति यो बुद्धिं जलं चादिलो-
रोऽग्निर्मध्यलघुर्विनाशमनिलो देशाटनं सोऽन्त्यगः ।

तो व्योमान्तलघुर्धनापहरणं जोऽर्कोरुजं मध्यगो-
भश्चन्द्रो यश उज्ज्वलं मुखगुरुर्नो नाक आयुस्त्रिलः ।।

(वृत्तरत्नाकरप्रथमाध्यायः)

गुरुरेको गकारस्तु (S) लकारो लघुरेककः (I)

गणनाम	**म**	**य**	**र**	**स**	**त**	**ज**	**भ**	**न**
स्वरूपम्	SSS	ISS	SIS	IIS	SSI	ISI	SII	III
देवता	पृथिवी	जलम्	अग्निः	वायुः	गगनम्	सूर्यः	चन्द्रः	नाकः
फलम्	श्रीः	वृद्धिः	विनाशः	भ्रमणम्	धननाशः	रोगः	सुयशः	आयुः
मित्रामित्रादिसंज्ञा	मित्रम्	भृत्यः	शत्रुः	शत्रुः	उदासीनः	उदासीनः	भृत्यः	मित्रम्
ग्रहाः	बुधः	शुक्रः	मङ्गलः	शनिः	राहुः	सूर्य्यः	चन्द्रः	बृहस्पतिः

एकस्य गुरोर्लघोर्वा विचारः न क्रियते द्वयोः सतोः, यस्य गणस्य अंशः सम्भाव्यते फलं देवताग्रहाश्च तदनुकूलतया विवेचनीयाः ।

ग्रहमैत्री-गणमैत्री-कथनम्-

"मित्राणि सूर्यात् शशिभौमजीवा" इत्यादि श्रीनिवासदीपिकावचनेन कोष्ठकं निर्माय सरलतया प्रदर्श्यन्ते तेषां चित्राणि रूपाणि ।

	ग्रहाः	**गणाः**	**मित्राणि**	**समाः**	**अरयः**
१	रविः	ज	चन्द्र-कुज-जीवाः	बुधः	शुक्रमन्दौ
२	चन्द्रः	भ	रविबुधौ		कुज-शुक्र-जीव-मन्दाः
३	मङ्गलः	र	रवि-चन्द्र-जीवाः	शुक्रमन्दौ	बुधः
४	बुधः	म	रवि-शुक्रौ	कुज-जीव-मन्दाः	चन्द्रः
५	बृहस्पतिः	न	रवि-चन्द्र-कुजाः	मन्दः	बुध-शुक्रौ
६	शुक्रः	य	बुधमन्दौ	कुज-जीव	रवि-चन्द्रौ
७	शनिः	स	बुधशुक्रौ	जीवः	रवि-चन्द्र-कुजाः
८	राहुः	त			

एवं सति गणानां परस्परमित्रामित्रोदासीनताविचारः ग्रहदृष्ट्या यथा—

गणाः	मित्राणि	समाः	अरयः
ज	भ र न	म	य स
भ	ज म	र य न स	—
र	ज भ न	य स	म
म	ज य	र न स	भ

न	ज भ र	स	म य
य	म स	र न	ज भ
स	म य	न	ज भ र

त.... अस्य विचारः अपेक्षितः ।

अथ ग्रहाणां रोगाधिकार-कालवयो-विचारः

सत्त्वरजस्तमोगुणविचारावसरे दोषत्रयस्य दिग्दर्शनं तावत् कफवातपित्तरूपेण । एषु आयुर्विज्ञानमतेन विचार आरभ्यते ।

कालात्मा दिनकृत् मनस्तु हिमगुः सत्त्वं कुजोज्ञो वचः ।
जीवो ज्ञानसुखे शितश्च मदनो दुःखं दिनेशात्मजः ॥ (श्रीनिवासदीपिका - अ २/१)
शशिशुक्रकुजेन्दुज्ञ गुरवः शिशिरादिषु ।
भवन्ति कालवलिनो ग्रीष्मे सूर्यस्तथैव च ॥ (श्रीनिवासदीपिका - अ २/२१)

रोगविचारे दिङ्मात्रं यथा-

रवेः - पित्ते शिरसि चाधिकारः । कालः - ग्रीष्मर्तुः, समयः-मध्याह्नम् ।

शिरःपीडा प्रमेहश्च सततं सन्ततज्वरः ।
पित्तरोगोऽम्लशूलश्च हृद्रोगश्च विसूचिका ॥
शिरोव्रणादिकं चैव विषजो दाहकज्वरः ।
यमाररोगाद्धिक्का च रवौ व्याधिविनिर्णयः ॥

चन्द्रस्य - कण्ठ-वक्ष-उदर-मूत्राशयेष्वधिकारः । धातुः-कफः, कालः - वर्षर्तुः । समयः - त्रियामायाः प्रथमो यामः ।

गलगण्डो गण्डमाला ज्वरश्च कफदूषितः ।
कासच्छर्दिर्क्षयं शूलं श्लीपदश्च जलोदरी ॥
आमाशयातिसारश्च हृद्रोगश्वासकृच्छ्रता ।
एते हि चन्द्रजा रोगा मुनिभिः परिकीर्त्तिताः ॥

इत्यादि एवं सर्वेषां ग्रहाणां रोग-काल-धातु-वलाङ्ग विचारः तत् तत् शास्त्रदृष्ट्या विधेयः । व्यक्तिः प्रयोगक्षेत्रं भवतीति तस्या बलमवस्था परिवेष्टनी मानसिकी स्थितिः अनुशीलनीयाः भवन्ति । बाल्य-कैशोर-यौवन-वयस्य-प्रौढ-वार्द्धक्यानां दशाधिपतिविवेचनाप्यपेक्ष्यते ।

वातपित्तकफादिषु रव्यादि ग्रहाणामधिकारः सम्यक् शुद्धतया विचारयितुं न शक्यते । तथापि चन्द्रस्य कफे रवेः पित्ते मङ्गलस्य वातपित्तयोः शनैश्चरस्य वाते बुधस्य कफवातयोः शुक्रस्य वातकफयोः गुरोश्च कफपित्तयोः अधिकारः प्रशस्तः । एवमपि रसरक्तपित्तास्थि मज्जास्नायुषु यथा विभागमधिकारः ज्योतिरायुर्विचारे विहितः ।

इदानीं प्रयोगम् आधारीकृत्य वृत्तानां रस-विचार आरभ्यते । तत्र गुणानुगुणवृत्त व्यवस्था स्पृहणीया इति रसेषु माधुर्यौजः प्रसादाख्यानां गुणानां स्थितिक्रमः कीर्त्यते । तथा च साहित्यदर्पणे—

चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥

अतः अस्मिन् गुणे वंशस्थ, द्रुतविलम्बित, मालिनी, वसन्ततिलका—मन्दाक्रान्ताशिखरिणीनां प्रयोगः स्पृहणीयः ।

ओजश्चित्तस्य विस्तार रूपं दीप्तत्वमुच्यते ।
वीरवीभत्सरौद्रेषु क्रमेणाधिकतरस्य तु ॥

अस्मिंश्च गुणे-शार्द्दूलविक्रीडित, स्रग्धरा-
पृथ्वीप्रभृतीनां वृत्तानां प्रयोगः काङ्क्ष्यते ।
चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।
स प्रसादः समस्तेषु रसेषु रचनासु च ॥

इति प्रसादगुणे इन्द्रवज्रा गणस्य वंशस्थ द्रुतविलम्बितेन्द्रवंश्यादीनां माधुर्य्यगुणोक्तवृत्तानामपि प्रयोगो गुणानुकूलतां विधत्ते ।

बहुत्र एवमपि लोके दृश्यते - विनाप्यर्थावबोधं श्रोत्रप्रीतिः समुत्पद्यते । तयैव श्रोत्रप्रीत्या श्रोता अभिभूतः भवति । गीतगोविन्दस्य "ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे" इत्यादि गीतम् शृण्वन् एतद् भाषानभिज्ञोऽपि मोदते । अतः फलितं यत् - अर्थावबोधात् रसास्वादः समुत्पद्यते । अर्थबोधाभावे रसास्वादाभावः । किन्तु केवल गुण-प्रभावात् चित्तचमत्कारिता सम्पद्यते । एतदर्थं वृत्तानां गुणानां च प्रभावो बलीयान् भवति, सर्वविध-दोषदुष्टापि रमणीया रमणीव । ओजः तमोमयं माधुर्य्यं रजोगुणमयं प्रसादः सत्त्वगुणवान् भवति । ततोहि प्राङ् निर्देशानुसारमेषां प्रभावः तत्तत् कोषेषु प्रभवेत् । यद्यपि शरीरं व्याधिमन्दिरमिति अन्नमयकोषो हि रोगाणां स्थानं, किन्तुं रोगो हि प्राणमयकोषमार्गेण आगत्य मनोमयकोषमाक्रम्य अन्नमयं कोषमाश्रयते । स च मनोमयः कोषः विज्ञानमयेन सततं समन्वितः तिष्ठति । एतयोः कोषयोः अनुभूतिः कार्या भवति । सार्थकी अनुभूतिः श्लोकस्य निरर्थक्याः अधिकप्रभाववत्यपि निरर्थकी मोदमयी अनुभूतिरपि चित्तं प्रसादयति इत्यस्माकं वैयक्तिकः अनुभवः । अनेनैव सूक्ष्ममार्गेण श्लोकवृत्तानां (श्रोत्रम्-चित्तम्-मनः-प्राणः-शरीरम्) कायप्रवेशः भवति । कदाचिदपि दृश्यते अर्थज्ञस्य अर्थाज्ञस्यापि श्रवणमात्रमेव काये रोमाञ्च नयनयोरार्द्रता च समकालमेव समुत्पद्येते ।

कालविचारे - इन्द्रवंश्या, वंशस्थविलम्, वसन्ततिलकं च प्रशस्यन्ते ।

मध्याह्ने शार्दूलविक्रीडितम्, स्रग्धरा, सायं - मालिनी, मन्दाक्रान्ता निशायां च - इन्द्रोपेन्द्रवज्रोपजाति-शिखरिणी-द्रुतविलम्बितादीनि वृत्तानि मोददायीनि भवन्ति । अधिकानां वृत्तानां कालविचाराय अधिकानुसन्धानमपेक्षितं भवति ।

अथ व्यक्ति: प्रयोगक्षेत्रं वा आलोच्यते —

पूर्वरीत्या व्यक्ते: कोषत्रयस्य स्थितिं विमृश्य मित्या अनुमित्या च विभिन्नकोषाणां यथायोग्यं मानं निर्द्धारणीयम् । ततो रोगस्यापि कालवयोवृद्ध्यनुरूपो ग्रहविचार: करणीय: । तत: परं वृत्त-व्यवस्था विधातव्या । यथा—

रसै रुद्रै श्छिन्ना य म न स भ ला ग: शिखरिणी ।

इत्यत्र:	य	म	न	स	भ	ल	ग
स्वरूपम्	ISS	SSS	III	IIS	SII	I	S
ग्रहा:	शुक्र:	बुध:	गुरु:	शनि:	सोम:	शुक्रस्यार्द्धम्	
मित्रामित्रविचार:	शुक्रस्य	मित्रम्	सम:	मित्रम्	अमित्रम्	स्वयमंशविशेष:	

अत्र वृत्ते शुक्रस्य प्राबल्यं दृश्यते । शुक्रश्च कफधातो: वसन्तकालस्याधिपति: । दिवारजन्यो: प्रथमभाग-स्याधिपतिश्च । (जातकदर्पणे एकादश प्रकाश:)

एतद् वृत्तं सुखाभावे विनिद्रतायां प्रयुज्यते ।

"रसै रुद्रै" रिति लिखितादेशेऽपि गायकैर्व्यवहारसमये त्यक्त: सन्(६ + ७ + ४) रसाब्धिवेदविश्रान्ति: गृह्यते । निद्राहीनतायां शुक्रस्य कारकत्वात् कामिनीकोमलकण्ठद्वारा एतस्य वृत्तस्य प्रयोगेण सुखनिद्रा यथाका-लव्यापिनी च भवति । तथा क्रोधिन: क्रोधशान्त्यै च एतस्य वृत्तस्य सफलता दरीदृश्यते ॥

एवं "द्रुतविलम्बितमाह नभौ भरौ ।" इत्यत्र 'भ' गणस्य प्राधान्यात् चलचित्ततायां मनश्चापलाधवाय गुरुयुक्तस्य चन्द्रस्य कुजबलेन वलीयस: महान् प्रभाव: परिलक्ष्यते इति दिक् । सर्वत्र किन्तु प्रयोक्तु: प्रयोगक्षेत्रे मानसाधिकार: अपेक्षितो भवति ।

उपसंहार:—

रोग-प्रतिकारक्षेत्रे श्लोकवृत्तप्रयोगविधौ अनुशीलनीया: दिश: —

प्रथमत:— निदानमनुशीलनीयम् । येन येन हेतुना व्याधिराधिर्वा सम्भाव्यते स स हेतु: कारकाधिकारत्वेन कस्य कस्य ग्रहस्य कर्त्तृत्वे सम्भाव्यते ?

द्वितीयत:— आतुरस्य कोषत्रय बलविश्लेषणं करणीयम् । यदिनाम प्रयोगक्षेत्रे शरीरस्य प्राणमयकोषस्य चैव प्राधान्य मनोमयस्य मालिन्यं विज्ञानमयस्य जाड्यम्, तथा सति एष प्रयोगो न साधीयान् स्यात् । विज्ञानमय-कोषस्य बलवत्त्वेन झटिति साधीयान् भवति । मनोमयस्य प्राबल्ये प्रयोक्ता मनो रोगादपहृत्य स्वायत्तं कुर्यात् । आनुपातिकतया कोषाणां स्थितिमवेक्ष्य विचार: कर्तव्य: ।

तृतीयत: — पथ्यव्यवस्था -

आहारविहाराचारविचारेषु चिकित्सानुकूलता विधातव्या ।

चतुर्थतः—आतुरस्य मनो विश्वासश्च प्रयोक्तुरनुकूलतया यथा तिष्ठेतां तथा यतनीयम्।

पञ्चमतः—कोष विचारानुसारेण सति सम्भवे भेषजसाह्यमपि अपेक्षितं स्यात्। तथा हि चिकित्सा शास्त्रे—

ग्रहेषु प्रतिकूलेषु नानुकूलं हि भेषजम्।
ते भेषजानां वीर्याणि हरन्ति बलवन्त्यपि॥

अत्र भेषजानां बलं हर्तुं ग्रहाः प्रभवेयुर्न तु गीर्वाणवाणीपदपङ्कजगन्धलोभमिति वृत्तप्रयोगः भेषजानां वीर्यरक्षणं वर्द्धनं च कुर्यादिति आशुविमुक्तये एष प्रयोगः साधीयान् स्यात्।

षष्ठतः—अथ अनुकूलवृत्तनिर्णयः। ततः आतुरस्य अर्थावबोधक्षमत्वमवलोक्य भावप्रयोगः। धर्मवादानुकूलभावश्च श्लोके प्रदेयः। सर्वेषां वा कृते प्रकृतिवर्णना तत्तद्रसानुगुणतया प्रदेया स्यात्।

अनुभूत्या मया ज्ञायते— शृङ्गारवात्सल्ययोः गुरुशुक्रौ, करुणशान्तयोर्बुधमन्दौ, रौद्रवीरभयानकेषु सबलदुर्बलतया रविमङ्गलौ, अद्भुतबीभत्सहास्यैः सह समेषु रसेषु कुमुदबान्धवः, विलासिनो भवन्ति। तदेतत् सर्वं विचार्य भेषजात्मकः श्लोकः विरचनीयः। अथवा सति सम्भवे आतुरे सनातनधर्मिणि तत्तद्देवतानां स्तुतयः प्रयोक्तव्याः। किन्तु रोगिणः प्रियतमा देवता निर्वचनीया स्यात्।

अथ अनुभवः — (विनिद्रतायाम्) परीक्षासमयः १९६५

आतुरस्य स्थिति — वयः ४५

योग्यता — M.A.B.Ed.

व्यवसायः — शिक्षकता

रोगः — मनोवैकल्यम्।

उपसर्गः— विनिद्रता, असम्बद्धवाचालता

कटक S.C.B. आयुर्विज्ञानचिकित्सा महाविद्यालयात् प्रत्यावृत्तः।

द्वितीयरजन्यां शिखरिणीप्रयोगेन घटिकार्द्धावृत्त्या (जात्या ब्राह्मण इति "जगन्नाथस्वामी नयनपथगामी भवतु मे" पदमात्रस्य वारं वारमावृत्त्या) सुनिद्रा विनिद्रत्वाद्दशघटिका यावत् जाता।

एवमेव अपरेषु क्षेत्रेषु शिरोवेदनायां इन्द्रवज्रा प्रयोगः सफलो जातः। सति सम्भवे रोगी प्रयोक्तुः स्वरं यथारीति मनसाधिकं स्मरेच्चेत् फलाधिक्यं स्यात्।

चेष्टाप्रतिचेष्टाछलेन (Trail and error method) अनूकूलप्रयोगे पराहते प्रतिकूलव्यवस्थापि करणीया स्याद्, अर्थात् चन्द्रचिकित्सायां पराहताया रविशुक्रप्रयोगोऽपीष्टसाधकः सम्भवेत्। वार्द्धक्यनैराश्येषु शिखरिणीवंशस्थौ आशावर्द्धकौ भवतः। एतस्मिन् विषये विदुषामनुसन्धातृणां तीक्ष्णां दृशम् अधिकालोचनायै कामये॥ इति शम्।

संस्कृतं विश्वसभ्यतासंस्कृतिश्च

श्रीधरमिश्रः

निबन्धेऽस्मिन्नहं विशेषतः पक्षत्रयं विवेचयितुं प्रयतिष्ये । प्रथमः पक्षः सभ्यतासंस्कृतिपदवाच्यः कः ? द्वितीयो विश्वसभ्यतासंस्कृतिः कीदृशी ? तृतीयश्च तत्र संस्कृतस्य किं योगदानम् ?

प्रायशो जनाः सभ्यतां संस्कृतिं चापरपर्यायत्वेन व्यवहरन्तो दृश्यन्ते, परं तथा नास्ति तयोर्मध्येऽस्ति कश्चन सूक्ष्मो भेदः । सभ्यता यत्र जनानां बाह्यवृतिं ख्यापयति बाह्यव्यक्तित्वं वा दर्शयति संस्कृतिस्तत्रान्तर्वृत्ति-मन्तर्व्यक्तित्वं वा ख्यापयति । एतच्चोभयोः शब्दयोर्विवचनेनापि सुस्पष्टं जायते । तथा हि सभाशब्दात् साध्वर्थे 'सभाया य' इति पाणिनीयानुशासनेन यप्रत्यये कृते सभ्यशब्दो निष्पद्यते । ततो भावेऽर्थे 'तस्य भावस्त्वतलौ' इत्यनेन तल्प्रत्यये कृते सभ्यताशब्दः सम्पद्यते । सभानाम प्रयोजनविशेषाद्देश्यकोपस्थितजनसमुदायः । तत्र साधुः सभ्यः शिष्टः । तस्मिन् विद्यमानो धर्मविशेषः सभ्यता इत्थं प्रयोजनविशेषोद्देश्यकोपस्थितप्रकृतिजन्यबोधे-प्रकारी भूतोऽर्थो भाव इति । जनसमुदायसमुदितशिष्टनिष्ठधर्मविशेषः सभ्यता ।

संस्कृतिशब्दश्च समुपसर्गपूर्वककृधातोः करणेऽर्थेक्तिनि प्रत्यये कृते निष्पद्यते । अत्र 'सम्परिभ्यां करोतौ भूषणे, इत्यनेन भूषणेऽर्थे सुडागमो विधीयते । भूषणत्वञ्चात्र पुरुषार्थोपयोगिनिर्दुष्टसाधनत्वम् । एतच्च कृतिं विशिनष्टि । कृतिश्चात्र व्यापारमात्रम् । इत्थञ्च-सम्यक्तया पुरुषार्थप्राप्त्यनुकूलदोषशून्यसाधनस्वरूपव्यापारत्वं संस्कृतित्वमिति निर्गलितोऽर्थः । तेन उत्तमो व्यवहारः, उत्तममाचरणम्, उत्तमा क्रिया, उत्तमो विचारः किं बहुना यत्किमपि उत्तमतां विभर्ति, सत्सर्वं संस्कृतिरित्युच्यते । संस्कृतिरभिव्यङ्ग्या सभ्यता च तदभिव्यञ्जिका । उभयो-र्व्यङ्ग्यव्यञ्जकभावसम्बन्धः । सभ्यतासंस्कृतिपदे सभ्यतयासहिता संस्कृतिरिति मध्यमपदलोपिसमासो विवक्षितो वर्तते । अतो अनयोस्साहित्यं सततमपेक्षितं बोभवीतीति । तत्साहित्यादेव सभ्यतासंस्कृतिशब्दः प्रायस्समस्त एव प्रयुज्यते व्यस्तस्तु क्वाचित्क एव । तथा हि जीवद्भर्तृकानां सिन्दूराभरणं संस्कृतिः, तच्च कुत्र, कथं कियच्चेति क्रियते इति सभ्यता ।

संस्कृतिविषयेऽनेके विद्वांसः स्वीयान् विचारान् प्रास्तुवन्—

तत्रैकं मतम्—संसारे सर्वोत्तमं वृत्रं यच्च ज्ञानमुक्तं वा तदात्मधारणमेव संस्कृतिः कथ्यते ।

द्वितीयं मतम्—"शारीरिकमानसिकशक्तीनां प्रशिक्षणम्, दृढीकरणं किं वा विकासः अथवा तदुत्पन्ना अवस्था संस्कृतिः"कथ्यते ।

तृतीयं मतम्—"मनसः आचारस्य रुचीनां च परिकृतिः शुद्धिर्वा संस्कृतिः । सभ्यताया अन्तरभ्युदय एव संस्कृतिः कथ्यते ।"

रेडफील्डमहोदयानुसारम् संस्कृतिः कलावास्तुकलासु प्रातिमास्यं पारम्परिकज्ञानस्य तत्समवेतं स्वरूपं यत्परम्परया संगठितं सत् मानवसमुदायस्य वैशिष्ट्यमावहति ।

ह्वाइटमहोदयानुसारम्—"संस्कृतिर्नामं प्रतीकात्मिका चिरन्तनी सञ्चयात्मिका प्रवृत्तिः, प्रगतिशीला चैका प्रक्रिया ।"

कन्हैयालालमणिकालमुंशीमहोदयानुसारम्—"संस्कृतिर्जीवनस्य तादृशी अवस्था वर्तते यदधिमानवं शीलतां विवेकताञ्च जनयति मानवव्यवहारं निश्चिनोति, जीवनस्यादर्शान् सिद्धान्तान् च द्योतयति ।" पण्डित-जवाहर- लाल- नेहरूमहोदयानुसारम्—मानवान्तर्विकासः नैतिकोन्नतिः, पारस्परिकः सद्व्यवहारः अन्योन्यविज्ञातृशक्तिरेव संस्कृतिः कथ्यते । मानवस्य भौतिकार्थिकनैतिकसामाजिकराजनैतिककलात्मकजीवनस्य समस्तोपलब्धीनां समग्रतैव संस्कृतिर्निगद्यते ।

रामजी उपाध्यायास्तु—संस्कृतिलक्षणमेव राष्ट्रम् । संस्कृतिः राष्ट्रमिति नाम सार्थकं करोति । अत एव संस्कृतिसंरक्षणमेव कस्यचिद् राष्ट्रस्य परमं कर्त्तव्यम् । यदि चेत् राष्ट्रिया संस्कृतिः विनष्टा स्यात् तर्हि सर्वमेव विनष्टं भवति ।

विश्वस्यासङ्ख्यानां जनानां मनीषिणाम्, सम्प्रदायानामाचारविचारकलापकादीनात्मसात्कृत्यैव प्रसरति संस्कृतिः । देशकालवस्तूनां परिप्रेक्ष्ये जायमानानि तत्त्वानि स्वान्तःकृत्य नित्यं वर्धते संस्कृतिः । इत्थं येनोपायेन जीवनं समुन्नतं भवति, समाजे यस्य व्यवहारस्य प्रतिष्ठा भवति, यो हि व्यवहारः स्वौदात्म्यमहिम्ना समाजे समादृतो भवति, येन च व्यवहारेण समाजे कस्यचन पुरुषस्य क्षतिर्न भवति तथाविधो व्यवहारः संस्कृतेरङ्गतां याति ।

इत्थं निरवधिकालं मानवो ज्ञानेन, दर्शनेन, रसयित्र्या, धर्मभावेन अधिकतरानन्दस्य प्राप्तये यत्नं करिष्यति । प्रकरणमिदमधिकृत्य मानवो बुद्धेरध्यात्मवृत्तेः, सौन्दर्यभावनायाः, शीलभावस्य च नित्यमेव संवर्धनं कृतवान् करिष्यति च । इयमेव संवर्धनप्रक्रिया मानवसंस्कृतिरिति ख्याता । संस्कृतिर्मानवजीवनस्य कला, व्यक्तित्वस्य विकसनं वा भवति । आत्मनः प्रतिकूलानि परेषां न समाचरेत् इत्येतत् संस्कृतेर्मूलमन्त्रः ।"

यजुर्वेदो वक्ति—'सा प्रथमासंस्कृतिर्विश्ववारा (यजुः ७/१४) अस्यायमाशयो यद्यया विश्वस्य संरक्षणं भवति सैव संस्कृतिः । इत्थं या संस्कृतिः विश्वविनाशकारिणी सा संस्कृतिपदवाच्या न भवति ।

इदानीं विचारः क्रियते यत् कतमा संस्कृतिः सर्वप्राचीना श्रेष्ठा च ? या च समग्रस्य विश्वस्यानुकार्या भवेत् ।

मान्याः ।

ज्ञानस्य प्रचारः प्रसारो भवति भाषामाध्यमेन किं बहुना भाषा एव जागतिकसकलव्यवहारस्य माध्यमः । यदि भाषा न भवेत्तदा समग्रं जगदिदमज्ञानावृतमेव तिष्ठेत् । तदाह दण्डी स्वकीये काव्यादर्शे—

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते । (१/४)

शब्दैर्विना अखिलविश्वस्य जनानां सर्वे क्रियाव्यवहाराः शून्यतामुपगच्छेयुः । तैरेव ज्ञानविज्ञानयोः प्रकाशः भावानामभिव्यक्तिर्जायते । लोकव्यवहाराश्च सिध्यन्ति । तथा चोक्तं यास्काचार्येण अणीयस्त्वाच्च संज्ञाकरणं व्यवहारार्थं लोके । (नि. १/१२) विश्वस्मिन् न जाने कियन्त्यो भाषाः सन्ति । एकस्मिन् देशे एव अनेकविधा भाषाः प्रयुज्यन्ते का कथा विश्वस्मिन् विश्वे प्रयुज्यमानानां भाषाणां विषये ? शब्दप्रयोगविषयान् सन्दर्शयतोक्तं पतञ्जलिमुनिना—महान् खलु शब्दस्य प्रयोगविषयः । सप्तद्वीपा वसुमती, त्रयो लोकाश्चत्वारो वेदाः साङ्गा सरहस्या बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधा अथर्वणो वाकोवाक्यम्, इतिहासः पुराणं वैद्यकमित्येतावाच्छब्दस्य प्रयोगविषयः इति ।

तत्र कल्पादौ ब्रह्मणा सर्वध्वनीनामर्थाः ज्ञानं चर्षिभ्यः कृपया प्रदत्तम् । अखिलभाषामूलभूतानामजादि-स्वराणां कवर्गादिव्यञ्जनानामादिमो नादो विश्वगगनमण्डलं प्रतिध्वनयन् ऋग्वेदीयश्रुति एव प्रससार सर्वतः प्राक् । ऋग्वेदस्य प्रथमो मन्त्रः—

अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।

'अग्नि' इत्यत्र चकारः, इकारः, ईडे इत्यत्र ईकार एकारश्च, पुरोहितमित्यत्र उकार ओकारश्च ऋत्विजम् इत्यत्र ऋकारस्योपदेशः । तदिदं स्वरोपदेशो दिङ्मात्रम् । अतोऽत्रसिध्यति ऋग्वेद एव प्राचीनतमो ग्रन्थ साक्षात्कृ-तधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽकृतसाक्षाद्धर्मेभ्यो मन्त्रान्सम्प्रादुः । तदुक्तं दण्डिना—"संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिरिति । सैव वाक् कालक्रमात् ऋषिभ्योऽस्मासु आगता । पूर्वं वागियम् अव्याकृता प्रकृतिप्रत्ययरहिता आसीत् सा इन्द्रेण व्याकृता । तथोक्तं संहितायाम्—

वाग् वै पराच्यव्याकृता अवदत् । ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुरु इति तामिन्द्रो व्याकरोत् ।

यदि वयं देवतत्त्वं किमपि स्वीकुर्मस्तदा नूनं तैरेव पूर्वं संस्कृतं व्यवहृतम् । संस्कृतस्येमा परम्परा व्याहरता ऋक्तन्त्रकारेणोक्तम्—

"ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय भरद्वाजः ऋषिभ्य, ऋषयो ब्राह्मणेभ्यः इति विश्वस्येतिहासे संस्कृतातिरिक्तायाः कस्या भाषायाः एतादृश्याः प्राचीनतायाः प्रतिपादने सन्ति प्रमाणानि ? एतत्तु अस्याः प्राचीनतमत्वम् । संस्कृतस्य बृहच्छाब्दकोषे किमितोऽधिकं प्रमाणं भवितुमर्हति यत्—

'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं शब्दपारायणं प्रोवाच, नान्तं जगाम । बृहस्पतिश्च प्रवक्ताः इन्द्रश्चा-ध्येता । दिव्यं वर्षसहस्रमध्ययनकालः तथापि नान्तं जगाम किं पुनरद्यत्वे यः खलु चिरं जीवति वर्षशतं जीवति" इति ।

अतः सर्वाः अपि विद्या, समग्रमपि ज्ञानमष्टादशधा विभज्य लोकोपकाराय ऋषिभिरुपदिष्टः । तद्यथा—

अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ।
अर्थशास्त्रं चतुर्थं चाष्टादशैव ताः ॥

ज्ञानविज्ञानयोर्न किमपि क्षेत्रं यन्नैतेष्वपि अन्तर्भूतम् । एतेषु विद्यास्थानेषु यानि सार्वकालिकतत्त्वानि प्रतिपादितानि तानि भौतिकार्थप्रधाने नैकसमस्यायुतेऽप्यद्यतने विज्ञानयुगे नितरां प्रसक्तान्येव सूक्ष्मदृशा सुस्पष्टम् ।

प्रस्तुते निबन्धेऽस्मिन् एभ्यो विद्यास्थानेभ्यः कानिचित् तत्त्वानि प्रस्तूयन्ते यानि विश्वसभ्यतासंस्कृतेर-भिन्नान्यङ्गानि सन्ति । येषाम् अनुपालनमाचारणं प्राचीनकालापेक्षया अद्यातीवावश्यकम् ।

यजुर्वेदस्य सा प्रथमा संस्कृतिर्विश्ववारा इति वचनं वैदिकीं संस्कृतिमेव प्राचीनतमां ख्यापयति ।' एषा संस्कृतिः अखिलस्यापि विश्वस्य समष्टिभूता अस्ति । विश्वस्मिन्विश्वे परिदृश्यं सकलं जीवनदर्शनम्, कार्यक-लापः, आचारविचाराः नैतिक-सामाजिक-राजनैतिकं चरितम्, कर्त्तव्यनिर्धारणं च वेदेष्वेव प्राथम्येनोपलभ्यन्ते । यथोक्तं मनुना—

सर्वेषां तु नामानि कर्माणि च पृथक्-पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥ (मनु० १-२१)

विश्वसंस्कृतेरैतिह्यं गवेषितं चेत् तर्हि वेदा एव सर्वप्रमुखत्वेन दृष्टिपथमवतरन्ति । संसारेऽस्मिन् संस्कृतेः सभ्यतायाश्चादौ कथमिव प्रचारः प्रसारश्चाभूदित्येतदर्थं वेदानुशीलनमनिवार्यम् । तदुक्तं मनुना—

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥ (मनु० २-३)

विश्वस्मिन् यावान् पाठ्यविषयः, गेयः, अभिनयः रसः तत्सर्वं बीजरूपेण वेदेष्वेव सन्तिष्ठते । उक्तं भरतमुनिना—

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानथर्वणादपि ॥

जर्मनसाहित्यिकः कथयति—"अस्मदीयानां नीतिशास्त्रस्य नियमाः नाम भारतीयनियमानां प्रतिकृतय एव । मनुस्मृतिर्नाम उच्चस्तरीयालौकिकबुद्धिमत्ताया निदर्शक एव" ।

शोपेनहावरकथयति—"एतस्मिन् संसारे मे मनः उपनिषद्येव शान्तिमधिगच्छति । मरणसमय एव उपनिषद्द्वारैव शान्तिलाभः मैक्समूल्लरो लिखति—"तत्त्वज्ञानस्यार्थः सुखसम्पत्योः साधनमिति स्यात्तदाहं मन्ये यत् सिद्धावस्थाप्राप्तिसाधनं वेदान्तात् नान्यत् ।" । एवमेव बहुभिः पाश्चात्यैर्लिखितं कथितं चास्ति यदद्यतनीये

काले संस्कृतस्यास्ति महत्यावश्यकता । यतो वैज्ञानिकविकासाधारेण मानवो मानवं हन्ति । शुद्धा आचार-विचाराश्च यत्र लभन्ते तदेव ग्राह्यम् तथा संस्कृतवाङ्मये अस्ति । विश्वं भवेदेकनीडम् इति संस्कृतस्यैव प्रथममाकूतम् ।

माता भूमिः पुत्रोऽहं पृथिव्याः । पर्जन्यः पिता सडन पितर्तु ॥ समग्रस्य विश्वस्य माता पृथिवी अस्ति, पर्जन्य, पिता अस्ति, अहं तयोः पुत्रः । तत्र पुत्रशब्दः समस्तजगत उपलक्षणम् । यथा माता पयसा पुत्रान् पृणाति तथा पृथिवी यवतण्डुलगोधूमसदृशान्नेन मनुष्येभ्योः पयः प्रयच्छति । यथा माता सर्वासन्ततिं ससुखं दिदृक्षति । तथा ईश्वरोऽपि सर्वाणि विश्वानि निरापदानि चिकीर्षति । स वाञ्छति—

"विश्वानि देव सवितर्दुरितानि परासुव ।

यद्भद्रं तन्न आसुव" । इति ।

स्वार्थपरायणतायास्तु संस्कृते किमपि स्थानमेव नास्ति । स्वार्थं विनिन्दयन्नाह—

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

सहस्रेभ्यो वर्षेभ्यः प्राक् यदा पृथिव्यामन्यान्यभागेषु सभ्यतायाः प्रादुर्भावोऽपि नासीत्तदा भारतीया महर्षयो जगन्मूलकारणभूतस्य पदार्थस्य तत्त्वान्यन्वेषयाञ्चक्रुः । ऐतरेयोपनिषदि—

आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चनमिषत् स ईक्षत लोकानुसृजा" इति ।

तैत्तिरीयोपनिषदि—

"तस्माद्वा एतस्मादाकाशः सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात् पुरुषः" इति ।

मत्स्यपुराणे—

श्रयन्ति यस्मात् तन्मात्रा शरीरं तेन संस्कृतम् ।
शरीरयोगजीवोऽपि शरीरी कथ्यते बुधैः ॥

शिवसंहितायाम्—

सोऽकामयत पुरुषः सृजते च प्रजाः स्वयम् ।
तस्मात् प्रकाशते वायुर्वायोरग्निस्ततो जलम् ॥

प्रकाशते ततः पृथिवी कल्पनेयं स्थिता सति ।
आकाशाद्वायुराकाशपवनादग्निसंभवः ।
खवाताग्नेर्जलं व्योमवाताग्निवारितो मही ॥

लयक्रमोऽपि तत्रैव—

पृथिवी शीर्णा जले मग्ना जलमग्नं च तेजसि ।
लीनं वायौ तथा तेजो व्योम्नि वातोलयं ययौ ।। इति

एतद्वैज्ञानिकं वर्णनं नाद्यावधि कैश्चिदप्याधुनिकैर्वैज्ञानिकैः खण्डयितुं शक्यम् ।

तत्त्वमसि इति दुःशकमपि विषयन्ते ऋषयः कथाच्छलेन अवबोधयामासुः । तद्यथा छान्दोग्योपनिषदि आरुणिः स्वपुत्रं श्वेतकेतुं बोधयन्नाह—

यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातम् ।
स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ।।

सौम्येमाः सर्वा प्रजाः सदायतनाः सत्प्रतिष्ठिता ।।

स च एषोऽणिमैतदात्म्यमिदं सर्वं तत् सत्यं च आत्मा तत्त्वमसि श्वेतकेतो इति ।

वास्तविकं सुखं किमिति जिज्ञास्यमानां मैत्रेयीं स्वपत्नीं याज्ञवल्क्यः प्रपच्छ—

यन्नु म इयं भगो सर्वा पृथिवी वित्तेन पूर्णा स्यात्

कथं तेनामृता स्यामिति ।"

याज्ञवल्क्यो वास्तविकं सुखं प्राप्तुमुपायानित्थं बोधयामास—

न वा अरे पत्युः कामाय पतिः प्रियो भवति ।
आत्मनस्तु कामाय पतिः प्रियो भवति ।।

न वा अरे जायायै कामाय जाया प्रिया भवति ।
आत्मनस्तु कामाय जाया प्रिया भवति ।।

न वा अरे पुत्राणां कामाय पुत्राः प्रियाः भवन्ति ।
आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति ।।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो

मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं (विदितम् । ।....) बृहदारण्यकोपनिषद् ।

अद्य प्रतिगृहं समाजे राष्ट्रे किं बहुना समग्रेऽपि विश्वे एकोऽन्यमुत्पीड्य विवर्धिषुरवलोलुक्यते । एकोऽन्यं द्वेष्टि । द्वेष्यभावनाया उपशमनं द्वेष्येण वाञ्छति । येन सा भावना कदापि क्षीणा नष्टा वा न भवितुं शक्या । परं संस्कृताश्रितासंस्कृतिः द्वेष्यकारणमेव नष्टुं कामयते येन सा भावनैव नोदिता स्यात् । तद्यथोक्तम् अथर्ववेदे—

योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तं वा जन्मे दध्मः । इति

इमां द्वेष्यभावनामुत्सृज्य तथैव परस्परमस्माभिर्व्यवहर्त्तव्यं यथा गावः स्ववत्सान् स्निह्यन्ति । उक्तं चाथर्ववेदे—

सहृदयं सांमनस्यमद्वेष्यं कृणोमि वः।
अन्योऽन्यमभि हर्यत वत्सं जातमिवाघ्न्याः ॥

वयं सर्वं मित्ररूपेण पश्येम। सर्वे मामपि मित्ररूपेण पश्येयुरिति उदात्तभावना संस्कृतातिरिक्ते क्वान्यस्मिन् वाङ्मये प्राप्येत्?

मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ॥ इति

समतायाः सद्भावनायाः सामञ्जस्यौदार्यस्य उदात्तविचाराः कीदृशा कामयमानाः दृश्यन्ते—

संगच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।
देवाभागं यथापूर्वे सञ्जानाना उपासते ॥

समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति ॥ ऋग्वेदे—१०/१९१/२४

ब्रह्मचर्यस्य नैतिकस्य कर्मपालनस्य परोपकारस्य, त्यागस्य तपसः सर्वत्र महत्या सूक्ष्मेक्षिकया विमृश्य ऋषयोऽस्मानुदिदिशुः।

ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति।
आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते ॥ (अथर्ववेदे ११/५/१७)

अतः शिक्षया अन्ते अन्तेवासिभ्य इमान्युपदेशवाक्यानि आचार्या यच्छन्ति स्म—

सत्यं वद। धर्मं चर। स्वाध्यायान् मा प्रमदः। सत्यान्न प्रमदितव्यम्। कुलशान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। यान्यनवद्यानि कर्माणि तानि त्वया सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वया सेवितव्यानि नो इतराणि। एष आदेषः। एष उपदेशः। एतदनुशासनम्।

भवन्तो विचारयन्तु यदिमाः शिक्षा विश्वस्य कस्यां संस्कृतावुपेक्ष्या भवितुमर्हन्ति। अत्र किं वर्तते यद्भौतिके युगेऽप्यद्यतनीये त्याज्यं भवेत्। किमपि त्याज्यन्नास्ति। आवश्यकतास्ति एषां दृढतया पालनस्य। संस्कृतं न केवलं यज्ञादिकमेव कर्तुं शिक्षयति। समाजे राष्ट्रे व्याप्तां विकृतिमपाकर्तुं प्रेरयति। जनाः श्रमशीलाः भवन्तु दुर्व्यसना न भवेयुः इति उद्बोधयति। तद्यथा—

अक्षैर्मा दीव्यः कृषिमित् कृषस्व। वित्ते रमस्व बहुमन्यमानः।
तत्र गावः कितवस्तत्र जाया तन्मे विचष्टे सवितायमर्यः ॥

पारिवारिकं सौमनस्यं कथं सन्तिष्ठेत? तदर्थमपि कामयते—

मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत्स्वसा।
सभ्यञ्च सव्रताभूत्वा वाचं वदत भद्रया ॥ (अथर्व ३/३०/३/२)

अपि च—

अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्॥

सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ३/३०/३१३

यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥

स्त्रीणां सम्मानाय इदमाशीर्वचः—

सम्राज्ञी श्वशुरे भव सम्राज्ञां श्रश्वां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवेषु॥

संस्कृते जीवनस्य नैराश्यमेव प्रतिपादितमस्तीति वक्तुमौर्ख्यं प्राकट्यते। जीवनस्य शतायुषः कामना, तत्रापीन्द्राणां सक्रियत्वमेषां विचाराणां निर्मूलतामेवाभिव्यनक्ति—

पश्येम शरदः शतम्। जीवेम शरदः शतम्। शृणुयाम शरदः शतम्।
प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्। भूयश्च शरदः शतम्॥

(यजुर्वेद १९/६०१/१-२)

अद्य धनार्थम् मानवो मानवं हन्ति। जनाः इन्द्रियसुखाय पशुतामाचरन्ति, बालं कन्यां वृद्धां युवानं स्त्रियं चापहरन्ति। तैः सह दुर्वृत्तमाचरन्ति कथम्? तेषां मनसि विविधा दुर्विकारा सन्ति। मन एव दुवृत्तं कारयति। अत प्रथमं मनसो निग्रह आवश्यकः। 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः'। 'यत्प्रज्ञानमुच्चेतो धृतिश्च यज्योतिरन्तरमृतं प्रजासु तन्मे मनः शिवसंकल्पमस्तु।' मनसःश्रेयसि कर्मणि प्रवृत्तिर्भवेत् तदर्थं प्रयतनीयम्। एतत्तदैव भविष्यति यदा सकलमपि जीवमात्मवत् जनः पश्येत्। परकीयधनं लोष्ठवत् विजानीयात्, परस्त्री मातृवद् ज्ञायेत। एतत्शिक्षणं बाल्य एव संस्कृताध्येतृभ्यो दीयते—

मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।
आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः॥

संसारे वास्तविकं सुखं जिज्ञास्यते चेत् तदा अधीष्व कठोपनिषद्—

सुखं भवति द्विविधं श्रेयः प्रेयश्च। य आद्ये सुखं यच्छति अन्ते च दुःखम् तत्प्रेयः। सुखम् यदादौ दुःखमन्ते यच्छति तच्छ्रेयः। यो धीरः स श्रेयो गृह्णाति। यो मन्दः सः प्रेयो गृह्णाति। तदुक्तम् कठोपनिषदि—

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद्वृणीते॥

अतः संस्कृतस्य इमे ग्रन्थाः वेदाः ब्राह्मणाः आरण्यकानि, उपनिषदः रामायणम्, महाभारतम्, स्मृतयः पुराणानि मानवमात्रस्य जीवनोपयोगि तथ्यं प्रस्तुवन्ति। किं बहुना सर्वभूतानां हितकरं चिन्तनमस्ति। संस्कृताद्

यावन्ति कौस्तुभानि निष्कास्य विश्वस्य हिताय विश्वसभ्यतासंस्कृत्योः परिशुद्धये उपयोक्ष्यन्ते तावन्ति हितकराणि भविष्यन्ति । समाजे नैतिकाचरणशिक्षा भवेत् कर्त्तव्यापालनस्य शिक्षा भवेत् । सर्वत्र विषये संस्कृतग्रन्थेषु सदृष्टान्तं प्रतिपादनं वर्तते । अद्य समग्रेऽपि विश्वे वृद्धस्य तत्सम्मानं नास्ति यथा भवितव्यं किं बहुना परिवारेऽपि स्थापयितुं नेच्छति जनः । वृद्धाश्रमे वसतु वृद्धः । तदर्थं महद्द्रव्यमपि दिदापिपयिषति । किदृशी एषा विकृतिः समाजे आगता । संस्कृतं शिक्षयति—

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ।। मनुस्मृतिः
यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्त्तुं वर्षशतैरपि ।।

संस्कृतस्य इमानेव गुणानवलोक्य अस्माकं राष्ट्रनायका महात्मनो गान्धिनः अवोचन्—

'संस्कृतं सा भाषा अस्ति, यस्यामास्माकीनाः पूर्वजा चिन्तयन्ति स्म । कोऽपि बालकः कापि बालिका वा संस्कृतस्य प्राथमिकेन ज्ञानेन विरहितो न भवेत् यदि सः आङ्गलमाध्यमेन संस्कृतस्य मूल्याङ्कनं चिकीर्षति स विजानीयात् यत् कस्मिंश्चिदनुवादे तस्य मूलस्य सङ्गतिर्न भवति ।' अतः बालकेभ्यो बालिकाभ्यश्च चारित्रिकाचारविचारणां च शुद्धिस्तदैव भवितुमर्हति यदा आचारविचारप्रधानं चारित्रिकोत्कर्षकं संस्कृतं ते पठेयुः । अतस्तेभ्यः संस्कृतस्य प्रारम्भिकमध्ययनमावश्यकम् इति ।

संस्कृतं विश्वसभ्यता संस्कृतिश्च

डॉ. हर्षनाथमिश्रः

अत्र संस्कृतमिति पदं संस्कृतभाषा-वाङ्मयोभयबोधकम्, विश्वसभ्यता संस्कृतिरितिपदे च सभ्यतासहिता संस्कृतिः सभ्यता- संस्कृतिः, विश्वस्य सभ्यता- संस्कृतिरिति विग्रहः । तेन इतरेतरयोगद्वन्द्वे द्विवचनापत्तिः समाहारद्वन्द्वे च नपुंसकैकवचनापत्तिरिति सन्देहद्वयं नोत्तिष्ठते ।

सर्वं जगदद्य स्वात्मनि भयभीतमिवास्ति । कुत्रापि शान्तिं नानुभवति, न वा कोप्यात्मानं सुरक्षितं मन्यते । एतादृशे समये कपिलकाणादवशिष्ठजनकमहात्मबौद्धभगवन्महावीरमहात्मगान्धीप्रभृतिमहापुरुषाणां जन्मदायकस्य प्रातःस्मरणीयस्य भारतस्य स्मरणं नास्वाभाविकम् । स हि सर्वदा पथप्रदर्शकोऽभूत् । समयः कीदृशः सात्विकविचारहीनः जातः यदिदानीं बुद्धस्य कीर्तिशरीरेऽप्याघातः प्रारब्धः किन्तु विश्वं भृशमेतादृशं कार्यं निन्दनीयं निन्दतिस्म । एतद् दृष्ट्वा मनसि कोऽपि सन्तोषो जायते । संस्कृतवर्षरूपेणोद्घोषिते संस्कृतवर्षे विश्वसंस्कृतसम्मेलनेऽस्मिन् न केवलमिहत्याः संस्कृतस्य पण्डितप्रकाण्डाः समवेताः, प्रत्युत विश्वतो विश्वस्य विद्वत्तल्लजा अपि समवेताः सन्ति । तेषां सर्वेषां समवेतस्वरे कश्चन शक्तिविशेषः सम्भाव्यते यस्योपेक्षा मुष्टिमेयैः कर्तुं न शक्यते ।

तपःस्वाध्यायपवित्रान्तःकरणैः प्रबुद्धविशुद्धसात्विकभावनाभावितैः ऋषिमुनिभिरुद्भाविता भारतीया संस्कृतिः सभ्यता च उद्भावकोदारस्वभाव-हृदय-नैर्मल्य-विशिष्टात् विश्वजनीन-हिताय विश्वजनसुखाय च जाते । अत एव वैदिकी भारतीया संस्कृतिः "सा प्रथमा संस्कृतिः विश्ववारा इति यजुर्वेदे (७-१४) प्रशस्यते" विश्वसंस्कृतेरैतिह्यान्वेषणाय कोऽपि प्रवर्तते चेत् तर्हि वेदा एव सर्वप्रथमं दृष्टिपथमवतरन्ति । अस्मिन् संसारे संस्कृतेः सभ्यतायाश्च कथङ्कारं विकासोऽभूत् इत्यर्थं वेदानुशीलनमनिवार्यं भवति । तत एव सर्वा विकासस्य क्रमिकप्रक्रिया प्राप्यते । सा वैदिकी संस्कृतिः न केवलं प्रथमा किन्तु विकासदृष्टा प्रौढाऽपि । अत एव विश्ववारा = विश्वैः वरणीया वरणयोग्या संस्कृतिरित्युदीर्यते । अत एव मनुस्मृतौ प्रोच्यते—एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

जीवनस्य आन्तरं स्वरूपं ज्ञापयति संस्कृतिः । जीवनस्य जगतश्च परमोच्चभूमिं गतेनात्मना सात्त्विकमननचिन्तनाभ्यां यदनुभूयते "इदं विश्वस्मै विश्वाय हितकरं इदञ्च सुखकरं तत्संस्कृतौ लिख्यते । 'आत्मनः प्रतिकूलानि न परेषां समाचरेत्' "द्यावाभूमी जनयन् देव एकः विश्वस्य कर्ता भुवनस्य गोप्ता" ईशावास्यमिदं सर्वं यत् किञ्चिज्जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्" इतीदृशं सिद्धान्तात्मकं ज्ञानं संस्कृतिः,

संस्कृतेरनुरूपं सदाचरणम्, सभ्यवेशः, मधुरम्, प्रियम्, सत्यसंलापादिकञ्च सभ्यता । ते संस्कृति-सभ्यते एकस्यै-वादर्शतां गतस्य जीवनस्य आन्तरबाह्यस्वरूपे भवतः । ज्ञानक्रिययोः आचारविचारयोश्च सामञ्जस्यं सर्वत्र देशेऽत्र यदासाद्यते तदस्य पूर्णं विकासं सूचयति । ज्ञानं विना कर्म अन्धम्, कर्मणा विना ज्ञानं पङ्गु, भक्त्या विना च ज्ञानं हृदयहीनं कर्म च निष्करुणं भवति । अतोऽत्र उपासनायां ज्ञानकर्म-भक्ति- त्रितयस्य समरसता अपेक्ष्यते ।

अत एवात्र सर्वं चिन्तनं विश्वपरकम् । ओम्विश्वानि देव सवित दुरीतानि परासुव, यद्भद्रं तन्न आसुव । विश्वं सुरक्षितं चेत् सर्वं प्रातिस्विकं जगत् सुरक्षितमिति ।

भारतीया संस्कृतिः सभ्यता च धर्मप्रधाना । धर्मश्च धारणशीलः धरणाद् धर्म इत्याहुः । स च—

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।

"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः । धर्म एव प्रेयसः श्रेयसश्च हेतुः । सम्प्रदायमजहबपदवाच्योऽत्र धर्मत्वेन न गृह्यते । ते समाजं न धारयन्ति । मजहबसम्प्रदायादिपदवाच्याः प्रत्युत विघटयन्ति । जनं जनेन, समाजं समाजेन, राष्ट्रं राष्ट्रेण राष्ट्रसमूहं च विश्वतो विश्वेन यो योजयति स धर्मः । अर्थात् विश्वधर्मः भूमा एव धर्मः विश्वसंस्कृतिसभ्यतायै च उपयुक्तः । सङ्कुचिता राष्ट्रभक्तिः विश्वसंस्कृतिसभ्यतोपासनायां दूरत एव नमस्करणीया । राष्ट्रभक्तिविश्वभक्तिमध्ये विरोधे आपतिते राष्ट्रभक्तिः सङ्कुचितस्वार्थदूषितत्वात्परित्यजनीया । तथा-चोच्यते—

त्यजेदेकं कुलस्यार्थे ग्रामार्थे च कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे तच्च राष्ट्रकृते त्यजेत् ।।
राष्ट्रं विश्वहितार्थाय तृणं मत्वा च संत्यजेत् ।

विश्वमूर्तिर्विष्णुः साधारणभक्त्या प्रसन्नो न भवति । व्यापकस्य तस्य प्रसन्नतायै भक्तिरपि व्यापकैव वेदे एक राट् प्रशस्यते । अयं च एकराट् विश्वाधिपतिरेव ।

ओम्-राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु ।।

कुबेराय वैश्रवणाय महाराजाय नमः ।।ओम्-स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं पारमेष्ठ्यं महाराज्य-माधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुषः आन्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराट् इत्यादि । "महते जानराजाय इत्यत्र विश्वस्य महाजान राज्यस्य इत्यत्र च एकराडिति एकस्य राज्ञो व्यवस्थापि दृश्यते ।

वेदेषु बहुदेवतावादो दृश्यते परन्तु देवानां प्रतिदेवं केचन सामान्यगुणाः सन्ति केचिच्च विशेषगुणाः । भेदकान् गुणान् विहाय सामान्यवैशिष्ट्यमाश्रित्य एकेश्वरवादः स्थाप्यते । अनेकतायामेकत्वान्वेषणमस्याः संस्कृतेः वैशिष्ट्यम् । अत एव "इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः सुपर्णो गरुत्वान् । एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः । (ऋग् I १६४-४६)

न केवलं व्यवहारक्षेत्रे वस्तूनामादानप्रदानमासीत् किन्तु संस्कृतेरपि आदानप्रदानं भवति स्म—

'देहि मे ददामि ते नि मे धेहि नि ते दधे।
निहारं च हरासि मे निहारं निहाराणि ते ॥" यजु.—३.५०

एवम्—आनो भद्रा क्रतवो यन्तु विश्वतः ॥ इत्यत्र च दृश्यते। विश्वमैत्रीं कामयेत् चेत् तर्हि प्रथमं स्वयं मित्रवत् व्यवहर 'मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे। समानी व आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सु सहासति। इत्यादयो मिथः व्यवहारा वेदे विश्वमित्रत्वाय अपेक्षिता वर्णिताः सन्ति।

भारतीयसंस्कृतौ आध्यात्मतत्त्वस्य समन्वयस्य श्रेयः उपनिषदामेव। उपनिषदः निष्कामकर्मोपदेशं ददति। अनासक्तो भूत्वा कर्मकरणे न बन्धः। उपनिषदाम् उपदेशः सर्वेषां समानं साधयति समानानां मानवाना-मेकेश्वरपुत्राणामयं निजः परो वेति गणना लघुचेतसाम् न शोभते उदार चरितानां तेषां कृते वसुधैव कुटुम्बकम् इत्येव मतं ज्यायः। पुराणे विशालेऽपि तत्र मूलभूतौ सिद्धान्तौ द्वावेव वर्तेते परोपकारः पुण्याय पापाय परपीडनम्' इति। तत्र परोपकरणमेव कर्तव्यम् परपीडनं तु सर्वथा त्याज्यम्। तत्र परोपकारेण मैत्री स्वयं भविष्यति परपीडन-त्यागे च तत्र दृढत्वम् स्वतः सिद्धम्।

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥

विषयासक्तिः विषयोपभोगेन न शाम्यति प्रत्युत वर्धते यथा अग्निः इन्धनेन वर्धते वर्तते च।

अहिंसा च योगदर्शने महाव्रतत्वेन आख्याता। तस्याः पालनं स्वयं करणीयं चेत् अन्योऽपि करिष्यति।

यदा च संस्कृतिः आर्षवचननिरपेक्षा स्वभावे चागच्छति तां पालयितुं मनः स्वतः प्रवर्तते तदा सा सभ्यता भवति। रामायणकाले संस्कृतिरियमतीवोन्नता। अतः सर्वैः काव्यशास्त्रीयैः प्रवृत्तिशिक्षणाय राम एव उदाहारि रामादिवत् वर्तितव्यम् इति। रावणस्तु निवृत्तिशिक्षणाय उपात्तः। तत्र काले स एकल एव। अन्ये तु तद्विपरीताः केवलं तस्य भयेन तमनुसरतिस्म। उदाहरणाय मारीचं कुम्भकर्णञ्च पश्य।

विज्ञानस्योपरि आध्यात्मवादस्य नियन्त्रणमावश्यकम्। आध्यात्मवादीयं नियन्त्रणं स्वतो गृहीतं भवति भविष्यति च। तेन च नियमिता वैज्ञानिका मानवविनाशात् विरता भविष्यन्ति प्राणिनाशात् जगन्नाशाच्च।

सर्वे वादाः संघर्षं कलहं च शिक्षयन्ति। मानवतावादश्च शान्तिम् उपदिशति। संस्कृतवाङ्मयं च शान्तिं जपति पठति उपदिशति च।

ओउम् विश्वानि देवसवितर्दुरितानि परासुवः
यद्भद्रं तन्न आसुव ॥
सरस्वती श्रुति महती न हीयताम् किन्तु महीयताम्।

आयुर्वेदे निन्दितपुरुषाणां लक्षणानि तथा चातिकृशस्य

डा. डि.वि.यस.आर. मूर्ती

गुणत्रयविभेदेन मूर्तित्रयमुपेयुषे ।
त्रयीभुवे त्रिनेत्राय त्रिलोकीपतये नमः ॥
ओं नमो ब्रह्मादिभ्य आयुर्वेदसम्प्रदायकर्तृभ्यो महद्भ्यो गुरुभ्यः ॥

धर्मार्थकाममोक्षभेदेन पुरुषार्थाः चतुर्विधाः । एतेषां मूलम् उत्तमम् आरोग्यम् । तादृशारोग्यस्य अपहर्तारः रोगाः । तादृशाः रोगाः शास्त्रोक्तप्रकारेण चिकित्सादिना समूलं दूरीकर्तव्याः ।

हिताहितं सुखं दुःखं आयुस्तस्य हिताहितम् ।
मानञ्च तत्र यत्रोक्तं आयुर्वेदस्स उच्यते ॥ (१-३०)

हितम् अहितम् सुखं दुःखम् इत्यादिकम् आयुः तद् वेदयतीति आयुर्वेदः । तादृशायुर्वेदग्रन्थेषु चरकसंहिता श्रेष्ठतमा । तदुक्तरीत्या किंचित् विचार्यते ।

देहः मनश्च व्याधीनाम् आश्रये । तथैव शरीरं मनश्चेति द्वयं सुखस्यापि कारणम् । तत्र कुष्ठादयो रोगाः शरीराश्रयाः कामादयः मनस्सम्बद्धाः । उन्मादादिकं शरीरं मनश्च आश्रित्य तिष्ठन्ति ।

शारीरकरोगहेतवः वायुः पित्तं कफश्चेति त्रयः ।

रजोगुणः तमोगुणश्च मनोविकारहेतू भवतः । तत्राशीतिः वातजाः विकाराः चत्वारिंशत् पित्तविकाराः, विंशतिः कफविकाराश्च सुष्ठु निरूपिताः चरसंहितायाम् ।

तत्र शारिरिकरोगाः बलिमन्त्रप्रयोगेण, संशोधनेन संशमने तथा चौषधसेवनेन उपशाम्यन्ते । धैर्येण, समाध्यादिना, शास्त्रज्ञानेन, अध्यात्मज्ञानेन च मानसिकरोगाः शान्तिमेष्यन्ति ।

भिषग्वरः आदौ रोगं परीक्षेत । ततः तन्निरोधकम् औषधम् अन्वेष्टव्यम् । रोगविज्ञानपूर्वकं यः तदपनयसमर्थकम् औषधं ददाति तेन जनस्य शारीरिकरोगाः अपनेतुं शक्यन्ते ।

तत्र वातजविकाराः — नखभेदः, विपादिका, पादशूलः, पादभ्रंशः इत्यादिरूपेण अशीतिभेदाः । तत्र चरकसंहितायाम् वातमूलाः शारीरिकरोगाः एकविंशाध्याये वर्णितास्तेष्वष्टौ निन्दिताख्याः व्याख्याताः । तथाहि — शारीरिकरीत्या, अतिदीर्घः, अतिहस्वः, अतिलोमा, अतिकृष्णः, अतिगौरः, अतिस्थूलः, अतिकृशश्चेति अष्टधा निन्दितपुरुषाः उक्ताः । शारीरिकवैरूप्येण लोके एते निन्दां लभन्ते । अनेन हेतुना एते निन्दिताः प्रोक्ताः ।

एषु अष्टविधेषु पुरुषेषु अतिस्थूलः निन्दिततमो भवति। अतिकृशस्तु न तथा निन्दनीयः। रोगाः आदौ अतिस्थूलमेव व्याप्नुवन्ति न तथा अतिकृशम्।

अतिस्थूलशरीरेण बाधाः—

अतिस्थूलपुरुषस्य आयुषः, ह्रासो भवति। अकाले ज्वरोपरोधः, कृच्छ्रेण व्यवायः, दुर्बलत्वं, शरीरे दुर्गन्धः च समुपजायते। तादृशस्य पुरुषस्य स्वेदः अधिकतया जायते। तेन शरीरं दुर्गन्धभूयिष्ठं भवति। तीक्ष्णाग्नित्वात्, प्रभूतकोष्ठवायुत्वाच्च, महती श्रुत्, विपुला पिपासा च भवति। तदुक्तं —

मेदसावृतमार्गत्वात् वायुः कोष्ठे विशेषतः।
चरन् स तुक्षयत्यग्निमाहारं शोषयत्यपि॥

तस्मात् शीघ्रं जरयत्याहारं चातिकांक्षति।
विकारांश्चाश्नुते घोरान् कांश्चित् कालव्यतिक्रमात्॥ (२१-४)

अतिस्थूलपुरुषस्य शरीरम् अधिकेन मेदसा आवृतत्वात् तादृशपुरुषः चलस्फिक् उदरस्तनः भवति। अतिस्थूलस्य पुरुषस्य कर्तव्येषु कार्येषु न तादृशः उत्साहः दृश्यते, यथा कृशस्य। वनदावः यथा वनं दाहयति तथा जठराग्निः वातश्च इत्येतत् द्वयं स्थूलशरीरिणं दाहयति।

अतिस्थूलशरीरिणः चिकित्सादिकं विवेचितमायुर्वेदे —

"वातघ्नान्यन्नपानानि श्लेष्ममेदोहराणि च।
रक्षोष्णावस्तयस्तीक्ष्णा रूक्षाण्युद्वर्तनानि च॥

गुडूचीभद्रमुस्तानां प्रयोगस्त्रैफलस्तथा।
तक्रारिष्टप्रयोगस्तु प्रयोगो माक्षिकस्य च॥"

विडंगं नागरं क्षारः काललोहरजो मधु।
यवामलकचूंर्णस्य प्रयोगः श्रेष्ठ उच्यते॥ इत्यादिना

अतिस्थूलेन जनेन वातनाशकानि श्लेष्ममेदोहराणि, रूक्षाणि, उष्णानि अन्नपानानि वस्तिकर्माणि, तैलं विना उद्वर्तनानि च आश्रयितव्यानि। गुडूचीभद्रमुस्तादिकं त्रिफलाचूर्णादिकं च सेवितव्यम्। वायुविडंगादिकं, नागरक्षारं, काललोहरजः, मधु, यवामलकचूर्णादिकानि च संसेवितव्यानि।

बिल्वादिपञ्चमूलानि मधुना मेलयित्वा सेवेत। प्रशातिका, प्रियंगुः, श्यामाकाः, यवाकाः, यवाः, जूर्णाया कोद्रवामुद्रयः, कुलत्थाः, चक्रमर्दकाः, आढकीनां बीजानि आमलकैस्सह आहाररूपेण देयानि। मधूदकम् अन्नपानत्वेन देयम्।

एवं मेदोमांसकफनाशकानि द्रव्याणि देहस्यातिस्थौल्यह्रासाभ्यां प्रयोजयेत्। तथैव जागरणं, व्यवायं, व्यायामं, चिन्तनं च क्रमेण परिवर्धयेत्।

तथाऽनुष्ठाने अस्माकं शरीरम् अस्मदधीनं भवेत्। तादृशशरीरेण श्रेयः प्रेयश्च साधयितुं शक्यते।

संस्कृतं-विश्वसभ्यता संस्कृतिश्च

डॉ० पि० वरप्रसादमूर्तिः

या स्मर्यमाणा श्रेयांसि सूते ध्वंसयते रुजः ।
तामभीष्टफलोदारमल्पवल्लीं स्तुवे शिवाम् ॥

भाषामन्दाकिनीं वन्दे प्रजाभावार्थवाहिनीम् ।
स्रवन्तीं रससम्पन्नां नानाध्वनितरङ्गिताम् ॥

विश्वेऽस्मिन् नैकविधसभ्यतासंस्कृतयः समुल्लसन्ति । तत्र सुमेरियन् अथवा मेसपटोनियन् सभ्यतासंस्कृतिः, ईजिप्टियन्सभ्यतासंस्कृतिः, इण्डस् अथवा हरप्पासभ्यतासंस्कृतिः, ग्रीकोरोमन्सभ्यतासंस्कृतिश्च सुप्रथिताः विराजन्ते । तत्र ग्रीको-रोमन्सभ्यतासंस्कृतेः प्रायः सहस्रवर्षपूर्विका भारतीया वैदिकी संस्कृतिः रराजेति चरित्रकाराः अभिप्रयन्ति । अत्यन्तप्राचीनासु सभ्यता- संस्कृतिषु भारतीया वैदिकी संस्कृतिः अन्यतमा महीयते ।

संस्कृतम्, ग्रीक्, लेटिन् इत्येतास्तिस्रः भाषाः विश्वस्य Classical Languages इति सादरं प्रकीर्त्यन्ते । एतास्तिस्रः भाषाः Indo-European family भारोपीयभाषापरिवारान्तर्गताः इति भाषाविज्ञानविद्भिर्निरणायि ।

संस्कृतभाषायाः प्राचीनताविषये Origion of Aryans नाम्नि ग्रन्थे Issac Taylor महाशयः निगदति— "The Sanskrit Literature is older by nearly ३००० years tham the Lithunic. Its Phonetic System is inferior only to Sanskrit." इति (origin of Aryans Page २५९) संस्कृतवाङ्मयं तावत् लिथुनिक्वाङ्मयापेक्षया त्रिसहस्रं वर्षप्राक्तनमिति ऐताक् टेलर्महाशयेन निर्धार्यते ।

सुविख्यातः फ्रेञ्चविद्वान् लूयी जकोलियट्महोदयः (Louis Joccolliat) कथयति Sanskrit is in itself the most irrefutable and most simple proof of the Indian origin of the races of Europe and of its maternity. (La Bible Dance Le Inde-Page २१) The Primitive language from which ancient and modern idioms are descended. (Ibid. Page १७८)

Prof. Hopher प्रो० होफर्महाशयस्तु एवमभिप्रैति—

"The most achaic forms of Aryan speech are preserved in the Ṛgveda and Avesta and the crade of the Aryans must have been in the region where Sanskrit and zend were spoken.

संस्कृतभाषा सर्वदा अविच्छिन्नतया भारतीयसंस्कृते: अन्त:स्रोतस्विनी विराजते । टेलर्महाशय: समुल्लिखति—"It was an astounding discovery that Hindustan over which so many conquerors had passed in Wrath and left their foot-prints as they went, possessed, in spite of changes of realms and chances of time a language of unrivelled richness and Variety; a language, the Parent of those dialects that Europe has fondly called classical The Souree alike of grek Flaxibility and Roman Strength." (Mr. Taylor's Paper on Sanskrit Liturature)

Prof. Max Muller महाशयस्तावत् India, What Can it teach us इति प्रसिद्धे ग्रन्थे संस्कृतमधिकृत्य समालिखति— "Yet such is the marvellous continuity between past and present in India that in Spite of Social convulsion, religious reforms, foreign invasions, Sanskrit may be said to be still the only language that is spoken over the whole extent of the Vast country. Even at prerent moment after a century of English rule and English teaching, I believe, Sanskrit is more widely understood in India than lation was in Europe at the time of Dante." (Prof. Max Muller — India What can it teach us Page ८०.)

ऋग्वेदस्तावत् आर्याणां जन्मभूमि: भारतदेश एव इत्युद्घोषयति । यत्र गङ्गा, यमुना, सरस्वती, शतद्रु (Sutlez) परुष्णि (Ravi), असिक्ति (चन्द्रभाग Chenab), सिन्धु इत्येता: सप्तनद्य: प्रवहन्ति सा भूमिरेव आर्याणां जन्मभूमिरिति सुस्पष्टं निर्दिशति । एतदतिरिक्ततया Zend Avesta ग्रन्थे भारतदेश एव सप्तसिन्धुदेश इति समाहूत इति वर्णनं दृश्यते । यत्र नद्य: सम्यक् प्रवहन्ति तेषु स्थलेषु सभ्यतासंस्कृति: सुष्ठु परिवर्धते इति चरित्रकारा: अभिदधति । विश्वे विभिन्ना: सभ्यता - संस्कृतय: नदीतीरेषु व्यराजन्त इति नापरोक्षं विदुषाम् । भारतदेशे विभिन्ननदीप्रवाहकारणात् अत्र संस्कृति: श्रेष्ठतमा विराजते ।

अनादिकालात् "संस्कृति: संस्कृताश्रिता" इत्यार्योक्ति: सुप्रथितैव । अपारे संस्कृतवाङ्मये भारतीयसांस्कृतिकसम्पत् निहिता विलसति । भारतीयसंस्कृति: सर्वदा अनुष्ठानप्रधाना महीयते । तदाचरणोपदेश: गैर्वाण्यामेव संरक्षितो विराजते ।

भारतीयसंस्कृतौ धर्मानुष्ठानं सुमहत् प्राधान्यं भजते । "वेदोऽखिलो धर्म:" इति मनो: निर्देशानुसारं श्रुति-स्मृतिभि: मनुष्यस्यैहिकामुष्मिकश्रेय: प्राप्तये विहितोपदेश: धर्म इति समभिधीयते । महामहिमशालिभि: महर्षिभि: सुरभारत्यां धर्मविषयकोपदेशोऽनुगृहीत: ।

"सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥" इति ।[१]

अनादिपरम्परायां वृद्धैरनुसृतः उत्तमकर्मविशेषः आचारपदेन समाम्नातः । धर्मः आचारादुपजायते । धर्मस्य प्रभुरच्युतः इति कथनेन धर्मानुष्ठानफलप्रदाता अच्युत इति फलितार्थः ।

सदाचारः भारतीयसंस्कृतौ प्रमुखं स्थानमावहति । सदाचार एव धर्मस्य मूलमिति रामः निगदति—

वनवासं वसन्नेव शुचिर्नियतभोजनः ।
मूलपुष्पफलैः पुण्यैः पितृन् देवांश्च तर्पयन् ॥

सन्तुष्टपञ्चवर्गोऽहं लोकयात्रां प्रवाहये ।
अकृद्धः श्रद्दधानस्सन् कार्याकार्यविचक्षणः ॥

कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम् ।
अग्निर्वायुश्च सोमश्च कर्मणां फलभागिनः ॥[२]

अरण्यवासं कुर्वन् अन्तर्बाह्यशुचिभिः पुनीतः कन्दमूलफलादिकमश्नन्, देवपित्रादितर्पणैस्तान् तोषयन्, रागद्वेषाभ्यां विरहितः सन्, किं करणीयम्? किमकरणीयमिति युक्तायुक्तविचक्षणज्ञानसम्पन्नः सन् सश्रद्धं धर्ममाचरन् कालमतिवाहयामीति रामभद्रो वक्ति ।

मनुजः सत्कर्मानुष्ठानायैव इह लोके जन्म लभते । तदीयसत्कर्माचरणे वाय्वग्निसोमाः आदर्शप्रायाः । सदाचारविषये श्रीरामः कियन्मधुरमुदीरयति—

त्वत्तो जनाः पूर्वतरे द्विजाश्च शुभानि कर्माणि बहूनि चक्रुः ।
जित्वा सदेमञ्च परञ्च लोकं तस्माद् द्विजाः स्वस्ति कृतं हुतञ्च ॥

धर्मे रताः सत्पुरुषैः समेतास्तेजस्विनो दानगुणप्रधानाः ।
अहिंसका वीतमलाश्च लोके भवन्ति पूज्या मुनयः प्रधानाः ॥[३]

अस्मत्पूर्वजाः ज्ञानिनः महर्षयः आजीवनं शुभकर्माण्येव समाचचरुः । शुभकर्मणां पुण्यफलात् इह-परलोकौ जयन्ति स्म मुनयः । धर्मे श्रद्धालवः, सत्सङ्गतिं भजमानाः दानशीलाः अहिंसारताः, दोषरहिताश्च लोके पूजनीयतां यान्ति । सदाचारात् के के लाभाः सिद्ध्यन्तीत्यत्र—

सदाचाराद् यशो लोके सदाचारात् सुखं दिवि ।
सदाचाराद् भवेन्मोक्षः सदाचारो हि कामधुक् ॥

---

१. श्रीमन्महाभारतम्— अनुशासनपर्वम् ।
२. श्रीमद्रामायणम्— आयोध्याकाण्डः १०९-२६-२७-२८
३. रामायणम्—अयोध्याकाण्डः १०९-३६-३७

यः सदाचारमुत्सृज्य वर्तते कामतो जनः ।
श्रियं स लभतां कामं श्रेयस्तस्य न विद्यते ॥

सदाचारमयीं नावं समारुह्य सुबुद्धयः ।
पारं याता भवाम्बोधेर्भूयो भीतिं न भेजिरे ॥ इति

सदाचारस्याधिगमाय सत्सङ्गतिर्नितरामपेक्ष्यते । वस्तुतः सङ्गतेः प्रभावः आजीवनं तिष्ठति । सत्सङ्गत्या दैवीसम्पत् सिद्ध्यति—

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ इति ।

सत्सङ्गतिः सर्वश्रेयः प्रेयः प्रदात्री विराजते—

धर्मं प्रवर्धयति पापमपास्य दूरं
निःस्वान् पुनः ससुखमर्थपतीन् करोति ।

कामान् प्रपूरयति मोक्षमथार्पयन्ती
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥ इति ।

चारित्र्यनिर्माणाय आवश्यकः उपायः स्वाध्यायः । "स्वाध्यायान्मा प्रमदः" इत्युपदेशः स्वाध्यायस्य उपादेयतां सम्यगुपपादयति । स्वाध्यायान्मनुष्यस्य लक्ष्यं स्फुटं वेद्यते । स्वाध्यायान्मनुजः ऋषीणाम् ऋणाद्विमुच्यते । स्वाध्यायान्मनुष्यस्य भविष्यदपि उज्ज्वलं स्यात् ।

एवं भारतीयसंस्कृतेराध्यात्मिकसम्पत् संस्कृतभाषायां विलसति । मनुष्यः सदाचारधर्माचरणासक्तः, उत्तमचारित्र्यसम्पन्नः, यज्ञ-तपो-दानादिकर्माणि कुर्वन्, इन्द्रियाणि नियमयन्, शास्त्रविहितान् भोगान् अनुभवन्, राग-द्वेषाभ्यां विरहितः, आहार-विहारादिक्रियासु संयमं वदन् आजीवनं सत्पुरुषान् भजन् मोक्षं विन्देत । एतदतिरिक्ततया सर्वेषु भूतेषु आत्मभावः (आत्मवत् सर्वभूतानि) विद्येत ।

दया सर्वभूतेषु क्षान्तिरनसूया ।
शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति ॥ इति ।[1]

१. गौतम— धर्मसूत्राणि १-८-२४

१. दया — सर्वेषु प्राणिविशेषेषु दया ।

२. क्षान्तिः — सुख-दुःखयोः क्षमा ।

३. अनसूया — परोत्कर्षसहनम् ।

४. शौचम् — अन्तर्बाह्यशुद्धिः ।

५. अनायासः — मनस्तापजनककार्यवर्जनम् ।

६. मङ्गलम् — प्रशस्तकार्याचरणम्, अप्रशस्तकार्यवर्जनम् ।

७. अकार्पण्यम् — आपत्स्वपि दैन्याभावः ।

८. अस्पृहा — विषयसम्बन्धिन्याः असन्तुष्टेः परित्यागः, परकीयद्रव्येषु, परकीयकान्तासु अनासक्तिः ।

यदि "आत्मवत् सर्वभूतानि" इत्येषः भारतीयधार्मिकसिद्धान्तः मनोवाक्कायकर्मभिरनुष्ठीयेत तर्हि विश्वेऽस्मिन् शान्तिः सर्वदा समुल्लसति, परिवर्धते च । प्रकरणेऽस्मिन् श्रीमद्रामायणे रावणाय जानक्या कृतः हितोपदेशः स्मरणीय आस्ते ।

यथा तव, तथाऽन्येषां दारा रक्ष्या निशाचर ।
आत्मानमुपमां कृत्वा स्वेषु दारेषु रमताम् ॥ इति ।

यदि रावणः वैदेह्या एतमुपदेशमश्रोष्यत् तर्हि सः नानयिशष्यत् ।

भारतीयसंस्कृतौ यदा कदापि यस्मात् कस्मात् जनात् यः कश्चन उपकृतश्चेत् स प्रत्युपकारं तस्मै कुर्यादेव । मैनाकः शतयोजनमायतं समुद्रं लङ्घयन्तं हनूमन्तमुद्दिश्य कञ्चित् समयं यावत् तदीयशृङ्गे स्थित्वा विश्रान्तिं स्वीकर्तुं प्रार्थयते । पर्वतपक्षच्छेदनावसरे गोत्रभिदः मैनाकं जुगोप वायुः स्ववेगात् । तमेवोपकारं स्मरन् "आत्मा वै पुत्र नामाऽसि" इत्यागमनिर्देशानुसारं यदि मारुतिरभ्यर्च्यते तर्हि मरुदभ्यर्चित एवेति मन्यमानः अतिथिपूजां स्वीकर्तुमङ्गीकरोतु इति प्रार्थयते—

"कृते च प्रतिकर्तव्य एष धर्मः सनातनः । इति ।

भारतीयसंस्कृतौ उपवेदाः आयुर्वेद-धनुर्वेद-गान्धर्ववेद-अर्थवेदाभिधाः अद्यतनकालेऽपि उपादेयतामुपयान्तीत्यत्र न कोऽपि संशयलवः ।

साम्प्रतं अल्लोपतिक्वैद्यपद्धतिरिति स्तूयमाने आङ्ग्लेयसरणौ "वैद्यपरीक्षाः" नाम्ना रोगिणा महान् धनव्ययः वोढव्य आपतति । परं भारतीयाः आयुर्वेदभिषग्वयाः अत्यल्पेनैव व्ययेन रोगिणां रोगान् दूरीकुर्वन्ति । आयुर्वेदवैद्यसरणेः प्रचुरः प्रचारः कर्तव्यः येन सामान्यजनाः लाभान्विताः भवेयुः । अल्लोपतिकौषधानां प्रचुरोपयोगात् इतराभिः व्याधिभिः पीडिताः भवन्ति जनाः । आयुर्वेदीयौषधोपयोगः तादृशीमनर्थपरम्परां रुग्णाय न जनयति । विशेषतः कालेऽस्मिन् देशीयाः वैद्यरीतयः प्रोत्साह्याः ।

भारतीयसङ्गीतशास्त्रस्य मूलं तावत् गान्धर्ववेदः । बहोराकालान्तरात् नैकविधरोगनिवारणे सङ्गीतमुपकरोतीति गवेषकैः निरूप्यते । आधुनिककाले Electric Guitar तथा Key-Board आगमनान्तरं देशीयाः बाद्यविशेषाः मृग्या भवन्ति । नाट्यशास्त्रे निर्दिष्टाः नैकविधाः देशीयशास्त्रीयवाद्यविशेषाः अद्यावलोकयितुमपि नोपलभ्यन्ते ।

भारतीयसंस्कृतौ कलाः—

मानवस्य मानसमेकाकि न रमते । स आहारसम्पादनेन तृप्तो नासीत् । आहारसम्पादनायैव न जीवति मनुजः । कलाः मानवेभ्यः अलौकिकमाह्लादं जनयन्ति । कलाभिः उन्नतभावाः जागृताः भवन्ति । प्राचीनाः कलाशास्त्रीयग्रन्थाः संस्कृतभाषायामेव समुपनिबद्धाः । इत्थं संस्कृतं लोकोत्तरसभ्यतासंस्कृतेः प्रधानभूमिकां वहतीति दिक् ।

मार्कण्डेयपुराणे एकपत्नीत्वस्य प्रतिष्ठापनम्

मनसुख के. मोलिया

ख्रिस्तस्यैकविंशतितमायां शताब्द्यां प्रविष्टे विश्वेऽस्मिन्, यद्यप्येकपत्नीत्वमादर्शरूपेण स्वीकृतं तथापि विश्वस्यानेकेषु देशेषु अद्यापि बहुपत्नीत्वं वैधानिकं समर्थनं प्राप्नोति । अपि च यत्र संविधानेन एकपत्नीत्वं स्वीकृतं तत्राप्येकनिष्ठस्य दाम्पत्यस्याभावो नैकवारं दृश्यते । विश्वसभ्यता पतिपत्न्योरनन्यस्य प्रेम्णोऽति दूरं दरीदृश्यते । भारतीयसंस्कृतिः पतिपत्न्योः सम्बन्धं संस्काररूपेण स्वीकरोति । अयं सम्बन्धो न केवलं एकजन्मावधिरपि त्वेकजन्मानुसारी भवतीति संस्कृतिसम्मतम् । महाकविना कालिदासेन भारतीयसंस्कृतेरियं भव्यता सीतामुखेन प्रकटीकृता । यथा,

भूयो यथा मे जननान्तरेऽपि
त्वमेव भर्ता न च विप्रयोगः । रघुवंशम्, १४.६६

प्राचीने भारतीये समाजे राजपुरुषा राजानश्च बहुवल्लभाः श्रूयन्ते । जनैरपि बहुपत्नीत्वमनाहतं नासीत् । तथापि संस्कृतस्य मनीषिणः कवय एकपत्नीत्वस्य प्रतिष्ठापनाय चिन्तनशीला आवर्तन्तेति तेषां साहित्यग्रन्थेषु प्रतीयते । महर्षिणा वाल्मीकिनादिकाव्ये रामायणे रामचन्द्रस्य चरित्रेऽयमादर्शः प्रस्थापितः । रामस्य पूर्वजा बहुपत्नीत्वं गृहीतवन्तः । रामोऽपि तेषां मार्गं स्वीकर्तुं स्वतन्त्र आसीत् । किन्तु तेनैकपत्नीत्वं स्वीकृतम् । सीतात्यागानन्तरमश्वमेधयज्ञप्रसङ्गेपि सोऽपरां भार्यां प्रतिग्रहीतुं नैच्छत् । सीतारामयोरेकनिष्ठप्रेम्णः चरमोत्कर्षो भवभूतेरुत्तररामचरिते निरूपितोऽस्ति । कालिदासस्य कुमारसम्भवं शिवपार्वत्योरनन्यस्य प्रेम्णः काव्यमेव । भासरचिते स्वप्नवासवदत्ते यद्यपि बहुपत्नीत्वं दृश्यते तथापि तत्रोदयनवासवदत्तयोरेकनिष्ठस्यानुरागस्य प्रतिष्ठैव विराजते ।

मार्कण्डेयपुराणे महर्षिर्व्यासोऽपि अस्यादर्शस्य स्थापनायै प्रतिबद्धो दृश्यते । अस्मिन्पुराणे ऋतुध्वजस्वारोच्युत्तमानां चरित्रवर्णनेष्वेकपत्नीत्वस्य प्रतिष्ठापनाय विविधा विचाराः प्रदर्शिताः सन्ति ।

शत्रुजितो नृपतेः पुत्रः ऋतुध्वजो मदालसाभिधानामर्धाङ्गिनीं स्वीचकार । एकदा तालकेतुनाम्नासुरेण मिथ्या वार्ता प्रसारिता यद् ऋतुध्वजः पञ्चत्वं प्राप्त इति । पत्युर्मृत्युवार्तां श्रुत्वा साध्वी मदलसा तत्क्षणमेव

प्राणांस्तत्याज । इमं वृत्तान्तं विज्ञाय ऋतुध्वजर्मुहुर्विललाप । तस्या: मृत्युवार्ताश्रवणोत्तरमपि सुरक्षितान्स्वप्राणान् दृष्ट्वा स आत्मानं निर्दयं, निष्ठुरं, नृशंसं च मत्वा स्वभर्त्सनां चकार ।[१]

यद्यपि ऋतुध्वज: पत्नीमनुसृत्य प्राणत्यागं न करोति तथापि सोऽन्ययोषितो भोगस्य त्यागं कृत्वैकपत्नी-त्वमाचरति । स उद्घोषति यत् नान्या स्त्री मदालसाया: स्थानं ग्रहीतुमर्हति ।[२] ऋतुध्वज: स्वप्रतिज्ञां पूर्णरूपेण पालयति च ।

द्वितीयस्य मन्वन्तरस्याधिपते: स्वारोचिषो मनो: पिता स्वारोचिर्नाम राजा बभूव । तस्य स्वारोचेर्मनोरमा, विभावरी, कलावती च तिस्रो भार्या बभूवु: । एकदा स्वभार्याभिर्मलयाचलस्य वनोद्देशे मधुरप्रेम्णा विहरन्स कलहंसीचक्रवाक्यो: संवादं श्रुतवान् । कलहंस्योक्तम्, "स्वभार्याभिरीप्सितान् भोगान् भुञ्जानोऽयं युवा पुण्यवान् धन्यश्च । जगत्यनेका: पुरुषा रूपयौवनशालिन: सन्ति किन्तु तेषां भार्यास्तादृश्यो न भवन्ति । उभयो: कान्तत्वं दुर्लभं भवति । दम्पत्यो: कान्तत्वे सति समानुरागो दुर्लभ एव । स्वपत्न्यामनुरक्ते पुरुषे सति तस्य भार्या तस्मिन्ननुरक्ता भवति । परस्परानुरक्तं दाम्पत्यं त्वतिदुर्लभमेव ।"[३]

स्वारोचेस्तस्य भार्याणां च दाम्पत्यमनुरागयुक्तमिति कलहंस्या मतं चक्रवाकी नानुमन्यते । एकस्य पुरुषस्य बह्वीषु स्त्रीषु समं प्रेम कदापि न प्रवर्तते इति मन्यमाना सा कथयति, "एकस्या: स्त्रिय: सामीप्येऽप्यपरां स्त्रियं भुञ्जानोऽयं स्वारोचिर्मनागपि न लज्जते । ईदृशो निर्लज्ज: कथं धन्यो भवेत् ?" अत्र पुराणकार: दृढं प्रतिपादयति यत् चित्तानुरागस्त्वेकस्मिन्नेव भवति तर्हि नैकाभिर्भार्याभिरेकस्य पुरुषस्य समानुराग: कदापि शक्यो न भवति ।[४]

---

१. तत्याज जीवितं साध्वी धिङ् मां निष्ठुरमानसम् ।
मत्कृते निधनं प्राप्तां यज्जीवाम्यतिनिर्घृण: ॥ मार्कण्डेयपुराणम्, २१.१२, सं. राजेन्द्रनाथ शर्मा, नाग पब्लिशर्स, दिल्ली, द्वितीयावृत्ति, ई.स. १९८९

२. अस्मिञ्जन्मनि नान्या मे भवित्री सहधर्मचारिणी ।
तामृते मृगशावाक्षीं गन्धर्वतनयामहम् ॥
न भोक्ष्ये योषितं काञ्चिदिति सत्यं मयोदितम् ।
सहधर्मचारिणीं पत्नीं तां मुक्त्वा गजगामिनीम् ॥ मार्कण्डेय. २१.२१-२२

३. सन्ति यौवनिन: श्लाघ्यास्तत्पत्न्यो नातिशोभना: ।
जगत्यामल्पका: पत्न्य: पतयश्चातिशोभना: ॥
अभीष्टा कस्यचित्कान्ता कान्त: कस्याश्चिदीप्सित: ।
परस्परानुरागाढ्यं दाम्पत्यमतिदुर्लभम् ॥
धन्योऽयं दयिताभीष्टो ह्येताश्चातिवल्लभा: ।
परस्परानुरागो हि धन्यानामुपजायते ॥ मार्कण्डेय. ६२.९-१०

४. चित्तानुरागो ह्येकस्मिन्नधिष्ठाने यत: सखि ।
ततोऽतिप्रीतिमानेष भार्यासु भविता कथम् ॥ मार्कण्डेय, ६२.१३

चक्रवाक्यात्मानं कृतकृत्यं स्वकान्तं च धन्यं मन्यते। यतस्तयोर्दाम्पत्यं चित्तैक्यमयमद्वैतरसान्वितं सामरस्यपूर्णं च वर्तते। यथा —

कलहंसि पतिर्धन्यो मम धन्याहमेव च।
यस्यैकस्यां चिरं चित्तं यस्याश्चैकत्र संस्थितम्॥ मार्कण्डेय. ६२.१८

पुराणकारश्चक्रवाकीमुखेन बहुपत्नीत्वं निन्दति। बहुपत्नीकः नाभिः सह भोजनासनभूषणसमागमादिभिर्भेदभावजनितेन दोषेण पापीयान् भवति। अग्नेः समक्षं परणीतया भार्यया सह पुरुषेण नित्यनैमित्तिकाः क्रियाः करणीयाः। अन्यभार्यां कामयमानः क्रियालुप्तः पापदग्धो भवति।

स्वारोचिः स्वविद्याप्रभावेण कलहंसीचक्रवाक्योः सम्भाषणं जानन् लज्जितोऽभवत् किन्तु कामासक्तिमूढः स तस्मात्कर्मणो न विरराम। तस्य बहुभार्यासक्तिं निन्दितुं पुराणकारोऽपरं वृत्तान्तं निरूपयति। समन्ताभिस्ताभिः क्रीडमाणः स सुरूपाभिर्मृगीभिः परिवृत्तमेकं मृगं ददर्श। तं मृगं जिघ्रन्त्यस्ता मृग्यः कामावेगं प्रदर्शितवन्त्य आसन्। मृगस्तासां प्रत्याख्यानं कुर्वन्नाह, "अहं स्वारोचेः सदृशो निर्लज्जो नास्मि। तत्सदृशा निर्लज्जा अहयो भवन्ति। भवत्यस्तादृशान्कामुकान्प्रति गच्छन्तु।"[१]

अत्र पुराणकारो बह्वीभिः स्त्रीभिः सहैकस्य पुरुषस्य गमनं निन्दति। यथैका स्त्री अनेकैः पुरुषैरनुगता हासास्पदं भवति तथैवानेकाभिरनुगत एकः पुरुषोऽपि निन्दाभाजनं भवति। स्वारोचेरस्मिन्नाख्याने नायकोऽयं मृगचक्रवाकादिभ्योऽपि निम्नतरो वर्णितः।

तृतीयमनोरोत्तमस्य जन्मकथानकेऽपि मार्कण्डेयपुराणेऽस्यादर्शस्य समर्थनं लभ्यते। उत्तानपादस्य नृपस्योत्तमो नाम पुत्रो बभूव। बभ्रोः कन्या बहुलोत्तमस्य भार्यासीत्। बहुलां प्रति अनुरक्तः सोऽन्यां कामपि न कामयामास। किन्तु कर्कशा कलहप्रिया च बहुला सततं तस्य प्रतिकूलमाचरत्। तस्याः प्रतिकूलेन व्यवहारेण नितरां सन्त्रस्तः स एकदा तां कहलप्रियां तत्याज। भार्यावियुक्तः सोऽन्यां भार्यामानेतुं समर्थोऽपि एकपत्नीत्वं पालयन् काञ्चिदपि भार्यां न प्रतिजग्राह।

उत्तमस्य राज्ये निवसतः कस्यचिद् निर्धनस्य विप्रस्य भार्या केनचिदपहृता। सा कुरूपा कुलक्षणा चासीत्। विप्रः स्वपत्नीमन्वेष्टुं राजानं प्रार्थयत्। तां कुलक्षणां विस्मृत्य सुलक्षणां सुरूपां चान्यां भार्यां स्वीकर्तुं तस्मै विप्रायोत्तमो निवेदयामास। किन्तु तेन ब्राह्मणेन राज्ञो निवेदनं नाभिनन्दितम्। भार्या सर्वदा रक्षणीयैव भवतीति श्रुतेरादेशं स्मृत्वा स आह, "अग्निसाक्षिकां भार्यां त्यक्त्वान्यया सह जीवनं यापयितुं कथं प्रभवेयमहम्? भार्याहीनस्य सर्वाः क्रियाः प्रतिदिनं हीयन्ते। क्रियाहीनो जनः पतितो भवति।"[२]

---

१. नाहं स्वारोचिस्तच्छीलो न चैवाहं सुलोचनाः।
निर्लज्जा बहवः सन्ति तादृशास्तत्र गच्छत॥ मार्कण्डेय. ६२.२६

२. पत्न्यानुकूलया भाव्यं यथाशीलेऽपि भर्तरि।
दुःशीलापि तथा भार्या पोषणीया नरेश्वर॥ मार्कण्डेय. ६६.६३

द्विजभार्याया अन्वेषणं कुर्वन्नुत्तमः कस्यचित् तापसमुनेराश्रममाजगाम। तमागतं दृष्ट्वा मुनिः पूर्वं त्वर्घ्यमानेतुं शिष्यमादिदेश किन्तु पश्चात् किमपि विचार्यार्घ्येण विना केवलेन सम्भाषणपूर्वकमासनदानेनैव तस्य स्वागतं चकार। अस्मिन्विषये उत्तमे पृष्टवति सति तेन मुनिना कथितं यत्स्वायम्भुवस्य मनोः कुले जातस्त्वमवश्यमेवार्घ्यमर्हसि किन्तु स्वकर्मजनितेन दोषेण त्वामर्घ्ययोग्यं नाहं मन्ये। धर्मपत्नीं त्यजता त्वया स्वधर्मोऽपि त्यक्त एव। धर्मभ्रष्टेभ्यो जनेभ्यः सत्पथं दर्शयितुं नियुक्तस्त्वं तु स्वयमेव स्वधर्मात् चलितोऽसि। अत्र पुराणकारो मुद्गरबलाघातं कृत्वा कथयति यत् यथा पत्नी विगुणमपि स्वभर्तारमनुसरति तथा विगुणापि भार्या भर्त्रा परिपालनीयैव भवति।[१]

द्विजभार्यामन्विष्य स पुनरपि मुनेराश्रमं जगाम। तदापि मुनिस्तस्य दारत्यागजनितं दोषं निन्दति। पत्नी मनुष्याणां कृते धर्मार्थकामानां विशेषस्तु धर्मस्य प्रबलं कारणमस्ति। यथा भार्यया भर्ता अत्याज्यस्तथा भर्त्रापि भार्या अत्यागार्हा भवति। उत्तमस्य दारत्यागकर्मणो द्विजेन मुनिना च भर्त्सनां कारयित्वा पुराणकारो दाम्पत्यस्य मिथः कर्तव्यं बोधयति। रामेण कृतं सीतात्यागं प्रति पुराणकारस्य गूढो रोषः प्रच्छन्नतया व्यञ्जनासाफल्येन शिलालिखिताक्षर इव सूचितः।

इत्थं मार्कण्डेयपुराणे त्रिष्वाख्यानेषु एकपत्नीत्वस्य प्रतिष्ठापनं दृश्यते। प्रणयिमिथुनस्य प्रणयो न केवलो दैहिकसम्बन्धापेक्षी किन्तु दाम्पत्यैकरसमयः परस्परप्रेमसव्यपेक्षश्चेति स्वारोचेराख्याने सिद्धं भवति। चारित्र्यहीनो वा गुणहीनो वापि पतिर्दैववदाराधनीयः[२] इति प्रसिद्धस्य स्मृतिवचनस्य स्थाने पुराणकारः प्रतिपादयति यदुभयोरपि परस्परावलम्बिनी निष्ठानिवार्या भवति। एकस्य पुरुषस्य बहुदारानुगमनं गर्हणीयम्। एकपत्नीत्वमाचरता पुरुषेण कृतो भार्यात्यागोऽपि न सम्मतः। बहुदारगमनरतः स्वारोचिस्तिर्यग्योनिभ्योऽपि निकृष्टतरो दर्शितः। स्वभार्यात्यागी महाराज उत्तमोऽर्घ्यायापि नार्हति।

---

१. पत्न्यानुकूलया भाव्यं यथाशीलेऽपि भर्तरि।
दुःशीलापि तथा भार्या पोषणीया नरेश्वर॥ मार्कण्डेय.६६.६३

२. विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः।
उपचार्यः स्त्रिया साध्व्या सततं देववत्पतिः॥ मनुस्मृतिः,५.१५२

विश्वसभ्यतायां कर्णाटकसंस्कृतभाषायाः सहभागित्वमहनीयता

एम्० डि० वसन्तराजः

कर्णाटकजनसामान्यस्य यद्यपि कन्नड एव मातृभाषा तथापि कर्णाटके विशिष्टरूपेण संस्कृतभाषोपयोगप्रचुरता संदृश्यते क्रिस्तपूर्वतृतीयशतमानादारभ्य क्रिस्तषष्ठमशतमानपर्यन्तं प्राकृतभाषा अथवा संस्कृतभाषानिबद्धानि एव शिलाशासनानि तथा ताम्रपटशासनानि आलक्ष्यन्ते। एतदुत्तरकालानन्तरं दशमशतमानकालपर्यन्तं यद्यपि कन्नडभाषानिबद्धशासनानि यत्र- तत्र लभ्यन्ते तथापि संस्कृतभाषानिबद्धशासनानि आधिक्यतया लभ्यन्ते। एतेषां शासनानां ऐतिहासिकविषयनिरूपणमेव मूलोद्देशः तथापि बहूनि शासनानि काव्यगुणसम्पन्नानि च वर्तन्ते। न केवलं शासनान्येव, विश्वादरणीयाः शास्त्रसाहित्यग्रन्थाः तथा काव्यसाहित्यग्रन्थाश्च दशमशतमानकालपर्यन्तं प्राकृतभाषायां तथा प्रचुरतया संस्कृतभाषायां रचितास्सन्ति।

जैनन्यायशास्त्रप्रणयनं प्रथमतः क्रि.श. चतुर्थशतमाने समन्तभद्राचार्यैः कृतमस्ति। एतैराचार्यैः रचितौ आप्तमीमांसा तथा युक्त्यनुशासनं न्यायग्रन्थौ प्रासिद्धौ स्तः। एतैराचार्यैः स्तोत्रकाव्यमपि रचितमस्ति तथा एतैः रचितं स्तुतिविद्यानाम चित्रकाव्यं विद्वज्जनैः प्रशंसितमस्ति। 'आद्यस्तुतिकार' इति हेमचन्द्राचार्यैः एते आचार्याः संस्तुतास्सन्ति। महापुराणे जिनसेनाचार्यैः एतेषां समन्तभद्राचार्याणां कवित्वादिगुणगरिमां प्रति प्रशंसा कृतास्ति यथा—

नमः समन्तभद्राय महते कविवेधसे
यद्वचोवज्रपातेन निर्भिन्नाः कुमताद्रयः।

कवीनां गमकानां च वादिनां वाग्मिनामपि
यशः सामन्तभद्रीयं मूर्ध्नि चूडामणीयते॥ (४३-पर्व १)

अस्य न्यायशास्त्रस्य सुदृढतरं प्रतिष्ठा अकलङ्कदेवाचार्यैः कृतास्ति इति सादरं उत्तरकालीनन्यायग्रन्थकर्तृभिः सूचितमस्ति। तथैव न्याय-तर्कविद्याविचक्षणैः मान्यश्रीशरच्चन्द्रघोषालमहोदयैरपि प्रोक्तमस्ति। [परीक्षामुखमाणिक्यनन्दिविरचितम् इन्ट्रोइडक्शन] क्रि.श. सप्तमाष्टमशतमानयोर्मध्यवर्तिकाले एतैः आचार्यैः न्यायविनिश्चय- लघीयस्त्रय-प्रमाणसंग्रहादिग्रन्थाः रचितास्सन्ति। एते ग्रन्थाः उत्तरकालीनन्यायग्रन्थकर्तृभिः प्रामाण्यभूता यथा अङ्गीकृतास्सन्ति वेदान्तसिद्धान्तस्य अद्वैत-विशिष्टाद्वैतद्वैत इति प्राधान्यतया त्रयो मार्गाः प्रसिद्धा-

स्सन्ति । अद्वैतसिद्धान्तोद्योतनकराः शङ्कराचार्याः यद्यपि जन्मतः केरलीयाः तैरुज्ज्वलितमद्वैतसिद्धान्तं तेषां शिष्यसन्ततौ कर्णाटके सञ्जातानां विद्यारण्याचार्याणां व्याख्यानेन सुष्ठु प्राकाशं नीतमस्ति । शङ्कराचार्यैः प्रतिष्ठापितं शारदापीठं कर्णाटक एव विद्यमाने शृङ्गेरीनगरे अद्यापि वेदवेदान्ताध्ययनस्य तथा संस्कृतविद्याभ्यासस्य केन्द्रो भूत्वा विराजते ।

विशिष्टाद्वैतसिद्धान्तप्रतिष्ठापनमधिकृत्य विख्यातनामधेयाः श्रीरामानुजाचार्याः यद्यपि तमिलनाडुसंजाताः तेषां विशिष्टप्रभावपूर्णकार्यक्षेत्ररूपेण कर्णाटकः मान्यतां प्राप्तोऽस्ति । एतैराचार्यवर्यैः श्रीक्षेत्ररूपेण प्रतिष्ठापितं मेलुकोटेनाम ग्रामं अद्यापि वेदवेदान्ताध्ययनस्य विशेषतः विशिष्टाद्वैतसिद्धान्तस्य तथा संस्कृतविद्याभ्यासस्य च केन्द्ररूपेण प्रसिद्धोऽस्ति ।

द्वैतसिद्धान्तप्रद्योतनकराणां पूर्णप्रज्ञापरप्रशस्तनामधेयानां मध्वाचार्याणां कर्णाटकः न केवलं मातृभूमिः आध्यात्मिकसिद्धिभूमिश्चास्ति । एतैराचार्यैः प्रोद्भासितद्वैतसिद्धान्तः एतेषां कर्णाटकसंजातशिष्यसन्तत्या व्याख्यानमुखेन सुप्रतिष्ठितोऽस्ति । एतैराचार्यैः श्रीउडुपीनगरे प्रतिष्ठापितः श्रीकृष्णमूर्तिः अद्यापि असंख्यातभक्तजनैः आराध्यमानो प्रविराजते । अस्मिन् क्षेत्रेऽपि वेदवेदान्ताध्ययनेन सह संस्कृतविद्याभ्यासः सुष्ठु प्रवर्तितोऽस्ति ।

कर्णाटककविवर्यैरनेकैः प्रशस्तकाव्यगुणसम्पन्नानि संस्कृतभाषानिबद्धानि काव्यानि रचितानि सन्ति । सहस्रैकषट्शतपूर्वकाले रचितानि काव्यानि अद्यापि समुपलभ्यन्ते तथा विद्वज्जनैः समाद्रियन्त इत्येतदेव तेषां प्रशस्तगुणमहत्त्वं द्योतयति । अनेकेष्वेतेषु कविवर्येषु अग्रगण्यतां प्राप्तान् त्रिषष्टिशलाकापुरुषापरनाममहापुराणगतादितीर्थंकरचरितप्ररूपकपूर्वपुराणकर्तृन् जिनसेनाचार्यान् प्रति संशोधकप्रवरास्तथा प्रबुद्धविमर्शका इति ख्यातिं प्राप्तैः प्रो. के. वि. पाठकमहोदयैः प्रशंसा कृता यथा—

"The first place among the Indian Poets is allowed to kalidasa by the consent of all. Jinasena however claims to be considered a higher ginious then the author of cloud messenger- Meghaduta "Similarly Dr. Krishnamachariar also wrote:....."Jinasena's poetry is of a high order and often equals, if not surpasses the beauty of kalidasa's expressions" (History of classical literature, Madras P.159) The entire, passage is quted from "The voice of Ahimsā Tirthankara Ṛṣabhadeva special No. VII- Vol No 3-4. March-April, 1957.

जिनसेनाचार्यैर्विरचितं पार्श्वाभ्युदयनाम खण्डकाव्यमपि विद्वज्जनैः प्रशंसितमस्ति । अस्मिन् काव्ये कविवरकालिदासविरचित शृङ्गाररसभरितमेघदूतखण्डकाव्यस्य श्लोकेभ्यः एकं वा द्वि त्रीणि वा पदानि समायोज्य श्लोकानि रचयित्वा वैराग्यभावोत्कर्षं नीतमस्ति ।

अत्र सोमदेवसूरिकविविरचितस्य यशस्तिलकचम्पूकाव्यस्य महनीयतां प्रति मान्यश्रीहण्डिकिमहोदयैः 'यशस्तिलक ऐण्ड इण्डियन् कल्चर' ग्रन्थे यत्प्रोक्तमस्ति तदवश्यमवलोकनीयमस्तीति सहृदयेषु विज्ञाप्यते ।

शास्त्रग्रन्थरचनायामपि कर्णाटकः आदरणीयोऽस्ति । स्याद्वाद-अनेकान्तवादौ जैनसिद्धान्तस्य विशिष्ट-लक्षणौ स्तः । एतयोः प्ररूपणं संस्कृतभाषायां प्रथमतः समन्तभद्राचार्यैः कृतमस्ति, तथा तदनन्तरं अकलङ्कदेवादि-कर्णाटकसञ्जातो उत्तरकालीनाचार्यैः सुविस्तरं प्रतिपादितौ स्तः । एवमेव जैनगृहस्थानां आचारप्ररूपकः शास्त्रग्रन्थः रत्नकरण्डश्रावकाचारः समन्तभद्राचार्यैः संस्कृतभाषायां रचितः सर्वप्रकारेण आद्यतां प्राप्तोस्ति इत्येतदपि विद्वज्ज-नैरवधारणीयमस्ति । वैय्याकरणेषु अष्टौ वैय्याकरणाः प्रधान्यतया ये संकीर्तितास्तेषु 'जैनेन्द्रव्याकरण' कर्तृदेव-नन्दिपूज्यपादाचार्याः कर्णाटके सञ्जाताः । तथा एतैराचार्यैः रचितः वैद्यग्रन्थः अतीवादरणीयो आसीदिति उत्तरकालीन वैद्यग्रन्थस्थैः 'पूज्यपादभणितं, पूज्यपादैरप्यभाणि, पूज्यपादोदितं' इत्याद्युक्तिभिः अधिगम्यते । प्राचीनभारतीयगणितशास्त्रस्य महनीयतापि षट्खण्डागमस्य धवलाटीकया तथा महावीराचार्यस्य गणितसार-संग्रहेणापि प्रमाणीक्रियते ।

अद्यापि श्रवणवेलगोल-हुंच-मूडुविदरे सिंगनगद्दे-कार्कल- क्षेत्रेषु स्थितैः श्रीजैनमठाध्यक्षैः तथा धर्मस्थ-लधर्माधिकारिभिश्च न केवलं जैनधर्मिणां, जैनेतर धर्मिणामपि काव्यानां तथा आध्यात्मिकग्रन्थानां अध्यापनाध्य-यनपूर्वकं प्राकृत-संस्कृतविद्याशिक्षणप्रशिक्षणं प्रवर्तितमस्ति । तथा एतेषु क्षेत्रेषु ताडपत्रग्रन्थयुक्तग्रन्थभण्डाराश्च सन्ति ।

दिगम्बरजैनसम्प्रदायस्य सर्वे मौलिकधर्मग्रन्थाः कर्णाटकसञ्जाताचार्यैरेव रचितास्सन्तीत्येतदपि विश्व-सभ्यतायै कर्णाटकसंस्कृतभाषायाः प्रशस्ततरं योगदानं प्रकटीकरोति ।

विश्वसभ्यतासंस्कृतिश्च संस्कृतम्

वीना विश्नोई

संस्कृतेः इतिहासोऽत्यन्तः प्राचीनः। अस्यां धरित्र्यां मानवजन्मना सहैव तस्याः जन्म अभूत् मानवविकासानुरूपैव तस्याः धारा निरन्तरं प्रसारिताभवत्। "संस्कृतेः प्रारम्भः तदा अभवत् यदा सङ्केतप्रयोगकर्तुः शब्दोच्चारकाद्यस्य मानवस्य प्रादुर्भावोऽभवत्।"[१] मानवजीवनस्य इतिहासनिर्माणे यानि साधनानि सन्ति तेषु संस्कृतं मुख्यस्थानस्याधिकारि अस्ति।

विश्वस्य प्रत्येकस्य राष्ट्रस्य स्वसंस्कृतिः अस्ति। युगेभ्यः प्रत्येकराष्ट्रस्य सांस्कृतिकी परम्परा तया सुरक्षिता अस्ति। इदं सांस्कृतिकगौरवमेव प्रत्येकस्य राष्ट्रस्य गरिमाद्योतकम् भवति। कस्यापि देशस्य दर्शनस्य, परम्पराणां, कलानां, धर्मसाहित्यस्य, मानवीयमूल्यानाम् आदर्शानां सञ्चयस्य नामैव संस्कृतिः अस्ति। कस्यापि देशस्य उन्नत्यवनतिं, उत्थानपतनम्, आचारविचारं, ज्ञानविज्ञानं जीवनपरिपाटिं च ज्ञातुं तस्य देशस्य संस्कृतिः साधनीभूता।

"संस्कृतिस्तु मनसः आत्मनश्च संस्करणं परिष्करणं च। 'सम्'पूर्वक कारणाद्यर्थकात् 'कृ'धातोः 'क्तिन्'प्रत्ययेन संस्कृतिशब्दो निष्पद्यते। संस्काराणाम् अनवरता प्रक्रिया संस्कृतिः अस्ति। संस्कृतिरेव मानवहृदयेषु विश्वबन्धुत्वसद्भावनामुत्पाद्य अखिललोककल्याणाय कल्पते।

अस्याद्याः वैदिकसंस्कृतेः विकासानन्तरमेव अन्यानां संस्कृतीनां प्रादुर्भावोऽभवत्। अतः वैदिकसंस्कृतिः एवं समस्तसंस्कृतीनां जननी अस्ति।

इयं संस्कृतिः अस्मिन् जगतीतले प्राचीनतमा विद्यते। अस्याः प्राचीनतायाः घोषणा प्राचीनतमे ग्रन्थे यजुर्वेदेऽपि कृता -

सा प्रथमा संस्कृतिः विश्ववारा।[२]

कवीन्द्ररवीन्द्रमहोदयेनापि कथितम् —

---

१. द रेसेज ऑफ यूरोप, एसूकन कैरीटन (वैदिक साहित्य और संस्कृति) कपिलदेव द्विवेदी

२. यजुर्वेद - अध्याय ७ मंत्र १४ आच्छिन्नस्य ते देव सोम सुवीर्य्यस्य, रायस्पोषस्य ददितारः स्याम।
सा प्रथमा संस्कृतिर्विश्ववारा, स प्रथमो वरुणो मित्रोऽग्निः॥

प्रथम- प्रभात उदय तव गगने ।
प्रथम सामरव तव तपोवने ।।

सर्वासु संस्कृतिषु प्राचीना श्रेष्ठा ज्येष्ठा प्रेष्ठा च भारतीया संस्कृतिः, इति निर्विवादं तथ्यम् । यस्मिन्काले सभ्यदेशानां जनाः सभ्यताहीनाः, संस्कृतिविहीनाः, दीनाः स्वजीवनयापनं कुर्वन्त आसन्, तस्मिन्नपि काले भारतीय-संस्कृतिः स्वचरमोत्कर्षे विराजन्ती, सदाचारं निर्दिशन्ती, सर्वलोकहितं वदन्ती, धर्ममुपदिशन्ती, सन्मार्गं कथयन्ती च विशोभते स्म । यथा च भगवता मनुना प्रोक्तम् -

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।[१]

विन्टरनिट्जमहोदयानुसारमपि— "If we wish to learn to understand the begining of our own culture, if we wish to understand the oldest Indo-European culture, we must go to India where the oldest literature of an Indo-European people is preserved."

मनुष्यस्य आत्मिकानां, शारीरिकाणां मानसिकानां च शक्तीनां विकासः संस्कृतेः मुख्यमुद्देश्यम् ।"[२] प्रत्येकस्य संस्कृतेः एका सभ्यता भवति । यदा संस्कृतेः मुख्यतत्त्वानि समाजानुमोदितासु परम्परासु परिवर्तितानि भवन्ति, तदा तानि तस्य देशस्य सभ्यतायानि अङ्गभूताः भविन्त । अनया दृष्ट्या सभ्यता संस्कृतेः एव विकसितं रूपम् अस्ति ।

यस्मिन् काले आधुनिकसभ्यजनानां विदेशवासिनां पूर्वजाः सभ्यताशब्देन विरहिता आरण्यकजीवनपरा इतस्ततो भ्रमन्ति स्म, तस्मिन्नपि काले भारतीयाः दार्शनिकाः साहित्यिकाः अनेके कोविदाश्च गूढातिगूढतत्त्वानां विवेचनं कुर्वन्तः सत्साहित्यं सृजन्ति स्म । किञ्च कुत्रान्यत्र विद्यते वेदोपनिषत्सदृशं सत्साहित्यं कुत्र च राजते मनुयाज्ञवल्क्यकल्पं स्मृतिशास्त्रं, कुत्र च विद्यन्ते वाल्मीकि- व्यास- कालिदास- बाण- सदृशाः कवीन्द्राः कुत्र च वर्तन्ते शुक्र- वाचस्पति- चाणक्य- सदृशाः नीतिविदः कुत्र च संराजन्ते शङ्कराचार्यसदृशाः दार्शनिकाः कुत्र च विद्यन्ते वराहमिहर-भट्टोत्पल-प्रभृतयो गणित निधयः कुत्र वा विलोक्यन्ते नागार्जुन-गोरखनाथाः रसायनविद्यामहोदधयः ।

सर्वासु भाषासु संस्कृतवाङ्मयः प्राचीनतमः चकास्ति । अस्य साहित्यस्य विविधतां समग्रता च विश्वजनीनां दृष्टिं समाकर्षति आधुनिके सन्दर्भेऽपि संस्कृतवाङ्मयः विश्वे संस्कृतेः सभ्यतायाः विकासाय समर्थः । एतेषु ग्रन्थेषु सर्वासां सभ्यतानां संस्कृतीनां शोभनानि अङ्गप्रत्यङ्गानि पूर्णरूपेण सुरक्षितानि सन्ति । अद्यत्वे दौर्भाग्यात् भौतिकवादस्य व्यापकप्रभावेण नैतिकमूल्यानामुपेक्षा भवति । केवलं संस्कृतभाषा प्रभावपूर्णा शक्तिस्वरूपा च अस्ति यया मानवस्य वैयक्तिकी, शारीरिकी, मानसिकी, आध्यात्मिकी चारित्रिकी च उन्नतिः

१. मनुस्मृति - २/२०
२. भारतीयसंस्कृतिःशिवदत्त ज्ञानी, पृ.-१७

सम्भवा । अगाधः खलु संस्कृतपारावारः । अनिर्वचनीया कीर्तिरास्ते संस्कृतकामधेनोः अपूर्वञ्च भाण्डागारं दृश्यते अस्याः सुरभारत्याः, यथोक्तमप्यस्ति—

अपूर्वं तव भण्डारं मातर्भारति दृश्यते।
अव्यये व्ययमाप्नोति व्यये चाव्ययतामियात्॥

संस्कृतभाषायाः साहित्यं वैदिकलौकिकभेदेन द्विविधम् । वैदिकसाहित्यान्तर्गते संहिताग्रन्थाः ब्राह्मणारण्यकोपनिषदादयश्च सन्ति । लौकिके च साहित्ये पुराणरामायणमहाभारतादीनि काव्यरत्नानि राजन्ते ।

संस्कृतभाषा स्वकीयसाहित्यसमृद्ध्या मानवसंस्कृतेः स्वरूपस्य प्रकाशिका वर्तते । अतः मानवसंस्कृतिदृष्ट्या इदं कथनं नास्ति सातिशयं यत् "संस्कृतिः संस्कृताश्रिता ।"

सामाजिकभावनानां सामाजिकविचाराणां च अभिव्यक्तेः यदि साहित्यं दर्पणमस्ति तर्हि सांस्कृतिकाचाराणां विपुलप्रचारेण साहित्यं संस्कृत्याः खलु वाहनम् । अस्माकं संस्कृतेः आकरग्रन्थाः वेदाः अपि संस्कृतभाषायामेव वर्तन्ते। संस्कृतसाहित्यरूपिणः विशालप्रासादस्य आधारशिला वेदाः एव। संस्कृतसाहित्यस्य सर्वप्रथमग्रन्थस्य निर्माणम् अष्टादशसहस्रवर्षाणि पूर्वमभवत् । ततः प्रभृति एव संस्कृतसाहित्यस्य धारा अविच्छिन्नगत्या प्रवहति ।

धर्मार्थकाममोक्षस्वरूपाणां मानवजीवनस्य चतुर्णां पुरुषार्थानां वर्णनम् अस्मिन्साहित्ये विस्तारेण उपलभ्यते । निखिलमपि संस्कृतवाङ्मयं विशेषतश्च उपनिषत्साहित्यं व्याप्तमस्ति आध्यात्मिकभावनया । मानवजीवनस्य चरमलक्ष्यम् निर्वाणप्राप्तिरस्ति । आध्यात्मिकभावना भारतीयजीवनस्य प्रत्येके क्षेत्रे, मानवस्य प्रत्येके व्यापारे व्याप्ता अनुस्यूता च प्रतीयते । अनया भावनया एव स्थावरजङ्गमात्मके विश्वे ब्रह्माण्डे वा सर्वत्रैव तस्य परमेश्वरस्य सत्ता स्वीकृता -

ईशावास्यमिदं सर्वं यत्किञ्चिद् जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्॥[1]

यजुर्वेदस्य कथनमस्ति यत् सर्वे मानवाः एकस्यैव परमपितुः परमेश्वरस्य पुत्राः सन्ति -

शृण्वन्तु विश्वेऽमृतस्य पुत्राऽआ वे,
धामानि दिव्यानि तथ्युः[2]

यः परमेश्वरः अस्माकं पितातुल्यः उत्पत्तिकर्ता अस्ति, पालकः च —

यो नः पिता जनिता यो विधाता। [3]

---

१. यजुर्वेद ४०/१

२. यजुर्वेद,११/५

३. यजुर्वेद,१७/२७

समग्रमानवजाति: एका अस्ति, अत एव ईश्वरेण सूर्य:, चन्द्र:, आकाश:, जलादय: च सर्वेभ्य: समानरूपेण रचिता: सन्ति, यथा—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवाऽमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥[१]

अस्यामुदात्तोक्त्यां विश्वबन्धुत्वस्य मङ्गलकारिका भावना सन्निविष्टास्ति। इदमेव भावम् अथर्ववेदे इत्थं परिपुष्टं भवति —

'**सर्वा आशा मम मित्रं भवन्तु**।'[२] अर्थात् पूर्वपश्चिमोत्तरदक्षिणानां सर्वासां दिशां मानवा: मम मित्राणि भवन्तु।

वेदा: समस्तप्राणिभि: सह साम्यप्रेममैत्रीभावस्योपदेशं ददति येन देशस्य सीमा: मनुष्येषु भेदं जनयितुं न शक्नुवन्ति। भगवद्गीतायामपि विश्वबन्धुत्वस्योपदेश: संसारस्य मार्गदर्शनं करोति —

परस्परं भावयन्त: श्रेय: परमवाप्स्यथ।[३]
लभन्ते ब्रह्मनिर्वाणमृषय: क्षीणकल्मषा:।

छिन्नद्वैधा यतात्मान: सर्वभूतहिते रता: ॥[४]
यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति ॥[५]

शाश्वतमानवमूल्यानां अनुपमेया अक्षमा च निधिरूपा संस्कृतभाषा मानवमात्रस्य कल्याणकारिणी, यत: अस्यामेव भाषायां मानवताया: अपूर्व: संदेश: मुखरित: द्योतते—

सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दु:खभाग्भवेत् ॥

विश्वशान्ते: विश्वबन्धुत्वस्योदात्तभावनाया: निर्देशनमस्मिन् मन्त्रे प्राप्यते —

मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।
मित्रस्य चक्षुषा समीक्षामहे ॥

---

१. हितोपदेश, १/६९ शाङ्गर्धर पद्धति, श्लोक २७३
२. अथर्ववेद, ९/१५/६
३. श्रीमद्भवद्गीता, ३/११
४. श्रीमद्भगवद्गीता, ५/२५
५. यजुर्वेद, ४०/१६

ऋग्वेदे 'कृण्वन्तो विश्वमार्यम्'[१] कथयित्वा श्रेष्ठताया उपदेशः दत्तः । महाभारते मनुष्यः पृथिव्याः सर्वेषु प्राणिषु श्रेष्ठः उच्यते ॥ [२]

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
समानो मंत्रः सिमितिः समानी, समानं मनः सह चित्तमेषाम्॥[३]

इत्थमेवाथर्ववेदे कथितम्—

सं जानीध्वं सं पृच्यध्वं सं वो मनांसि जानताम्॥[४]

समाजस्य कल्याणाय भारतीयसंस्कृत्या वर्णव्यवस्थायाः विधानं कृतं स्वकर्मानुसारं च सर्वे मानवाः ब्राह्मणक्षत्रियवैश्यशूद्राभिधेयेषु चतुर्षु वर्णेषु विभाजिताः सन्ति, उक्तमपि—

लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयेत्॥[५]

भगवद्गीतायामपि गुणकर्मानुसारं सृष्टिरचनायां चत्वारः वर्णाः समाहिताः सन्ति -

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । [६]

यस्मिन् देशे समाजे राष्ट्रे वा सर्वे मानवाः स्वस्व कर्माणि पालयन्ति, तद् देशः समाजः राष्ट्रं वा सपद्येव उन्नतिशिखरमाप्नोति ।

जीवनस्य पूर्णता कर्मणि वर्तते । महाभारते महर्षिवेदव्यासस्य कथनमस्ति यत् अयम् संसारः एकः कर्मभूमिः अस्ति - 'कर्मभूमिरियं ब्रह्मन् ।'

वेदे उपनिषदि च कथितं यत् मनुष्यः निष्कामकर्माणि कुर्वन् शतवर्षपर्यन्तं जीवितुमिच्छति—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।[७]

महाभारते श्रीकृष्णेन कर्मविमुखार्जुनाय कर्मोन्मुखीकर्त्तुं दत्तोपदेशः समग्रराष्ट्रे गुञ्जितोऽस्ति—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।[८]

---

१. ऋग्वेद,९/६२/५
२. महाभारत,शान्तिपर्व - सर्वेषामेव भूतानां पुरुषः श्रेष्ठ उच्यते ।
३. ऋग्वेद,१०,१९२,२/३
४. अथर्ववेद ६/६४/१
५. मनुस्मृति १/३
६. भगवद्गीता ४/१३
७. ईशावास्योपनिषद्,मंत्र २,यजुर्वेद,४०/२
८. श्रीमद्भगवगीता,२/४७

भारतीया संस्कृतिः जीवनस्य सर्वेषु क्षेत्रेषु धर्मस्य प्राधान्यं स्वीकरोति "धर्मो धारयते लोकः"। [१] आपत्तिकालेऽपि मानवः निराशो भूत्वा साहसं न त्यजति यतो हि तस्य विश्वासोऽस्ति यत् ईश्वरस्य विधानं मङ्गलमयमस्ति। अथर्ववेदस्यास्मिन्मन्त्रे स्पष्टरूपेणोक्तम्—

पश्येम शरदः शतम्। जीवेम शरदः शतम्।

तैत्तिरीयोपनिषदि आचार्यः शिष्याय नैतिकतायाः उपदेशं ददाति—

मातृदेवो भव, पितृदेवो भव।
आचार्यदेवो भव, अतिथिदेवो भव॥[२]

इयं संस्कृतिः नूतनप्रवृत्तीः वाह्यप्रभावांश्च सुकरतया आत्मसात् करोति।

ऋग्वेदे कथितम्—

आ नो भद्राः क्रतवो यन्तु विश्वतः।[३]

वैदिकसंस्कृत्यां ऋषिभिः नार्यै गौरवशालिस्थानं प्रदत्तम्। वैदिककालिकः नार्याः अभिनन्दनीयम् उज्ज्वलं च रूपं प्रस्तुतीकरोति। ऋग्वेदे नारी "स्त्री हि ब्रह्मा बभूविथ"त्वे विश्वा सरस्वति इत्यादिरूपेण उद्घोषितास्ति।

कथितमपि—

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।[४]

आदिकाव्यम् रामायणम् तु जनसामान्यस्य समक्षं नैतिकतायाः चरित्रस्य च आदर्शरूपं प्रस्तुतीकरोति। वाल्मीकिरामायणस्य प्रारम्भे चरित्रविषये कथितम्—

चारित्रेण च को युक्तः सर्वभूतेषु को हितः।[५]

रामायणे वर्णितम् रामस्य चिरत्रम् मानवजीवनाय प्रेरणां प्रददाति। रामाय पितृसेवायाः तस्याज्ञाः श्रेष्ठतरम् अन्यत् किमपि धर्माचरणम् नास्ति, सः कथयति—

न ह्यतो धर्माचरणं किञ्चिदस्ति महत्तरम्।
यथा पितरि शुश्रूषा तस्य वा वचन क्रिया॥"[६]

१. चाणक्यसूत्र, २३४
२. तैत्तिरीयोपनिषद, ११/२
३. ऋग्वेद १/८९/१
४. ऋग्वेद, २/४/१७
५. बाल्मीकिरामायणम् बालकाण्डः प्रथमसर्गः, श्लोक ३
६. बाल्मीकिरामायणम् अयोध्याकाण्डः, सर्गः १९ श्लोक २२

कस्मिन्नप्यन्यदेशे भरतरामलक्ष्मणसदृशाः दृष्टान्ताः न प्राप्यन्ते । संस्कृतेः स्मृतिनीतिग्रन्थाः सर्वदा मानवाय सन्मार्गे चलितुं प्रेरणां ददति ।

वस्तुतः प्रेयशास्त्रश्रेयशास्त्रयोः उभयोरपि रचना संस्कृतवाङ्मये उपलभ्यते । एषा संस्कृतिः मानवतायाः संदेशं ददाति । अस्मिन् वैज्ञानिके युगे सम्प्रति सर्वत्र अशान्तेः साम्राज्यं दरीदृश्यते । मानवो वास्तविकतां विहाय कृत्रिमतां प्रति धावति । सर्वत्र धनस्यैव प्रधानता विद्यते । धनमेव सर्वगुणानामास्पदं प्रतिभाति । मानवः मानवं हन्तुमिच्छति । अस्मिन्समये मानवजातेः उत्थानाय परित्राणाय वा भारतीयसंस्कृतिरेव सक्षमा । भारतीयसंस्कृतेः विश्वबन्धुत्वभावना सहिष्णुतायाः भावना च स्पृहणीयमार्गस्यानुकरणाय अलमेव स्तः ।

संस्कृतभाषा अस्माकं देशस्य सांस्कृतिकी भाषा वर्तते । अस्याः भाषायाः वैशिष्ट्यमेवाकलय्य सत्यमेवाह मैक्समूलर महोदयः—

"The greatest language in the world, the most wonderful, and the most perfect."

आस्याः एव भाषायाः आश्रयेण राष्ट्रस्याखण्डता ध्रुवं भविष्यति देशोऽयं च विश्वगुरुपदम् अवाप्स्यति । सुष्ठु कथितं केनचित् -

यावद् भारतवर्षं स्यात्, यावद् विन्ध्यहिमाचलौ ।
यावत् गङ्गा च गोदा च तावदेव हि संस्कृतम् ॥

संस्कृतं विश्वसभ्यतासंस्कृतिश्च

श्रीकीर्तिवल्लभः शक्टा

यथा प्रचलितासु विश्वभाषासु संस्कृतमेव प्राचीनतमा तथैव भारतीया संस्कृतिः अपि विश्वे महनीया श्रेष्ठा प्राचीना च यथोक्तम् भारतस्य प्रतिष्ठे द्वे-संस्कृतं संस्कृतिस्तथा ।

तत्र सम् पूर्वकात् कृ धातोर्निष्पन्नः शब्दः संस्कृतशब्दः । विपुल-ज्ञानविज्ञानसम्पन्ना इयं भाषा अतीव सरला सुमधुरा जनमानसपावनी-लोककल्याणकारिणी च । कथितमपि संस्कृतं नाम दैवीवागन्वाख्याता [1] महर्षिभिः । प्राचीनकालादेव प्रचुरसाहित्यसम्पन्ना इयमधुनापि निखिलेऽस्मिन् विश्वे समाद्रियते । गद्य-पद्य चम्पूभिः त्रिधाविभक्तं संस्कृतसाहित्यं सर्वथा अद्वितीयं सुविशालञ्च । अस्मिन् साहित्ये विश्वस्य प्राचीनतमाः ऋग्यजुर्वेदादयः अधुनापि जगति स्पृहयन्ते । शिक्षा-कल्पो, व्याकरणं, निरुक्तं, छन्दांसि ज्योतिषमिति वेदाङ्गानि, न्याय-वैशेषिक, सांख्य-योग- मीमांसा- वेदान्तादयः दर्शनशास्त्राणि उपनिषदः स्मृतयः सूत्राणि धर्मशास्त्राणि पुराणानि, रामायणमहाभारतादयः ग्रन्थाश्च संस्कृतसाहित्यस्य ज्ञाननिधेः अपारं विस्तारं कुर्वन्ति । यथा पूर्वं वाल्मीकि-व्यास-भवभूति-दण्डिसुबन्धु- बाण- कालिदास-अश्वघोष-भारवि- जयदेव- माघ- श्रीहर्षादिभिः कविभिः संस्कृतस्य गौरवं प्रतिष्ठापितं तथैवात्र वर्तमानेऽपि डॉ. राजेन्द्रमिश्राद्याः अनेके सुकवयः लेखकाश्च संस्कृतसाहित्यस्य संवर्धने तत्पराः सन्ति ।

ये जनाः संस्कृतसाहित्येन सह अन्यासां भाषाणां साहित्यस्य अध्ययनं कुर्वन्ति ते कथयन्ति "वर्तमानकालेऽपि निखिलेऽस्मिन् भूमण्डले सर्वासां भाषाणां साहित्यस्य अपेक्षया नूनं संस्कृतसाहित्यस्य स्थानं सर्वोपरि विद्यते ।"

अस्मिन् कम्प्यूटरयुगेऽपि अस्याः भाषायाः महत्त्वं न्यूनं न भवति अपितु वर्धते एव यथा डॉ. वनेश्वरपाठकेन कथितम् "पाणिनेरष्टाध्यायीसूत्रेषु आधुनिककम्प्यूटरविज्ञानस्य मूलरूपं निहितमस्ति । पाणिनिना अष्टाध्याय्या माध्यमेन सूक्ष्मविश्लेषणस्य परिणामोपलब्धेश्च या पद्धतिः प्रचालिताऽस्ति तामवलोक्याद्यतनकम्प्यूटरवैज्ञानिकाः विस्मयमुग्धाः सन्ति । पाणिनिना प्रयुक्ता संज्ञा प्रत्याहाराश्च कम्प्यूटरविज्ञानस्य मूलरूपमेव प्रस्तुवन्ति । अतो संस्कृतभाषा कम्प्यूटरविज्ञानभाषा भवितुमर्हति ।"[2]

---

१. महाकविः दण्डी

२. संस्कृतं संगणनविज्ञानञ्च— डॉ. वनेश्वरपाठकः

वस्तुत: संस्कृतं हि भारतस्य आत्मा। संस्कृतं विना भारतस्यास्तित्वं क्व ?

विना गङ्गां विना गोदां विना विन्ध्यं हिमाचलम्।
क्व तिष्ठेद् भारतास्तित्वं विना गीर्वाणभारतीम्॥ [१]

मानवजीवनस्य संस्करणं संस्कृति:। निखिलेऽस्मिन् संसारे विभिन्ना: संस्कृतय: वर्तन्ते विभिन्ना: पुष्पिता: फलिता: विलुप्ताश्च जाता: परम् अस्माकं भारतीया संस्कृति: खलु निखिलातिशायिगरिष्ठगुणगरिम्णा सवितु: ज्योतिरिव प्राक्तनाद् साम्प्रतं यावत् जगति देदीप्यते सर्वान् मोहयते च। अत्र प्रमुखतमं कारणमस्ति वेदमूलाऽस्माकं संस्कृति: इयं मानवहृदयेषु विश्वबन्धुत्वभावनामुत्पाद्य अखिललोकहिताय कल्पते। अत एव संस्कृत-वाङ्मयस्य संस्कृतेश्च आलोक: सर्वत्र प्रसृत:। सत्यं वद धर्मं चर, [२] स्वाध्यायान्मा प्रमद, वसुधैव कुटुम्बकम्, तेन त्यक्तेन भुञ्जीथा:, अहिंसा परमो धर्म:, सदाचारी भव इत्यादय: सन्ति अस्माकं संस्कृते: मूलभूतानि तत्त्वानि। एतेषामेव प्रभावेण भारतं संसारस्य गुरुरप्युच्यते। अनेनैव भारतस्य प्रतिष्ठा भुवि प्राक्तनाद् कालाद् विराजते।

एतद्देशप्रसूतस्य सकाशादग्रजन्मन:।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवा:॥

अस्या: संस्कृते: मूलतत्त्वानामाकलनं यूरोप- अमेरिका- चीन- जापानादिदेशानां दार्शनिकै: साहित्यकारैश्च कृतम्। सुविख्यातेन वैज्ञानिकेन तथा च एनिल्ड- टायन्बी-नामकेन इतिहासकारेणापि अस्या: भूरिश: प्रशंसा कृता। [३] नोबेल-पुरस्कार-विजेता जनेस्टीन: कथयति वर्तमानकाले आणविक-नाभिकीय ऊर्जादि- युद्धानां भयेभ्य: रक्षणाय भारतीय- दर्शनविचारधारा संस्कृतिश्चैकमात्रं सदुपायमस्ति। [४]

सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दु:ख भाग् भवेत्॥

द्यौ: शान्तिरन्तरिक्षं शान्ति: पृथिवी शान्तिराप: शान्तिरोषधय: शान्ति:। वनस्पतय: शान्तिर्विश्वेदेवा: शान्तिर्ब्रह्म शान्ति:- सर्वं शान्ति: शान्तिरेव शान्ति: सा मा शान्तिरेधि। [५]

यतो यत: समीहसे ततो नो अभयं कुरु।
शन्न: कुरु प्रजाभ्योऽभयं न: पशुभ्य:॥ [६]

---

१. संस्कृतशतकम् पृ.सं. १०-४ डॉ. राजेन्द्रमिश्र:
२. वेदकालीन संस्कृति
३. भारतीय शिक्षा में एक अभिनव प्रयोगा ले. हरिशंकर कश्यप पृ. स. ३३
४. भारतीय दर्शन डॉ. जिम्मर ले. हिरशंकर कश्यप पृ. स. ३३
५. शु. यजुर्वेद ३६-१७
६. शु. यजुर्वेद ३६-२२

वस्तुत: एतादृशा: समुद्घोषा: केवलं भारतीयसंस्कृते: न अपितु विश्वसंस्कृते: अमूल्या निधय: सन्ति । रुसदेशीय: डॉ. जिम्मर: कथयति "अधुना विश्विद्यालयेषु यत्पाठं पाठयित्वा वयं - गौरवान्विता: भवाम: तत्सर्वं प्राचीनकाले भारतीयज्ञानविज्ञानस्य प्रथमं सोपानमासीत् ।"

निखिलेऽस्मिन् संसारे सर्वत्र भारतीयदर्शनस्य संस्कृतेश्च सुप्रभाव: दृश्यते । अस्या: संस्कृते: सभ्यता- याश्च उदाहरणम् अद्यापि पाश्चात्या: विद्वास: प्रकटयन्ति ।

ब्रह्मा- फूनान- कम्बुज- चम्पा- मलाया- सुमात्रा- जावा- बाली- वोर्नियोप्रभृतिदेशेषु भारतीय- संस्कृते: प्रभावस्तु स्वाभाविक: यदत्र प्राचीन- काले भारतीय- मूलस्य जना: निवसन्तिस्म आधुनापि अत्र भारतीया संस्कृति: दरीदृश्यते ।

ब्रह्मा — ब्रह्मादेशे पुरातत्त्वसम्बन्धिभि: अवशेषै: प्रमाणीभवति यत् ईशाया: पञ्चमीं शताब्दीं यावत् ब्रह्मादेशेन भारतीयधर्मभाषालिप्यादय: स्वीकृता: तदनन्तरं बौद्धधर्मस्य प्रचारेण देशोऽयं पूर्णतया बौद्धधर्मानुयायी अभवत् । अत्रैव ह्यावजाया: समीपे मैडगननामके ग्रामे एकस्मिन् सुवर्णपत्रे कदम्बलिप्यां पालिभाषायां बुद्धस्य वचनद्वयं प्राप्तम् ।[१]

फूनान: — वर्तमानस्य इण्डोजापनराज्यस्य कम्बोडिया- प्रान्ते पुरा भारतीया प्रभुसत्ता आसीत् । फूनानस्य प्रथम- राज्य- संस्थापक: कौण्डिन्य- नामधेयो ब्राह्मण: आसीत् । शैव धर्मानुयायिन: कौण्डिन्यस्य भाषा संस्कृतम् आसीत् । अद्यापि अत्र शुद्धसंस्कृतभाषायां शिलालेखा: प्राप्यन्ते । कालान्तरे अत्र बौद्धधर्मस्य प्रचार: अभवत् ।[२]

कम्बुज: — वर्तमानसमये कम्बोडियाया: उत्तरे कम्बुजराज्येऽपि प्राचीनकाले भारतीया परम्परा विरा- जिताऽऽसीत् अत्रापि संस्कृतभाषाया: शिलालेखादय: समुपलब्धा: । राज्योऽयं तत्काले भारतीयसंस्कृते: महत्त्व- पूर्णं केन्द्रमासीत् । शिवविष्णुदुर्गागणेशादीनां पौराणिकदेवीदेवतानां पूजनं वेदपुराणादीनामध्ययनाध्यापनमपि अत्र तथैवासीत्यथाभारते ।[३]

चम्पा: — चम्पाया: स्थिति: कम्बुजस्य पूर्वभागे आधुनिकस्य अनामस्य दक्षिणभागे आसीत् । अत्रत्य: प्रथमो भारतीय: शासक: श्रीमार: आसीत् तस्य उत्तराधिकारिण: अपि शैवधर्मानुयायिन: संस्कृतभाषिणश्चासन् ।[४]

मलाया — अत्रापि गुनोडजिराईइति स्थानस्य समीपे मन्दिरविशेषस्य अवशेषा: अनेके प्रस्तरमूर्तय:, बौद्धमन्दिरस्यावशिष्टा: संस्कृतशिलालेखादया: सम्प्राप्ता: ।[५]

१. भारतीय संस्कृति का विदेशों पर प्रभाव— ले. अशफाक अहमद अनन्त
२. तदेव
३. तदेव
४. तदेव
५. तदेव

सुमात्रा — प्राचीनकाले सुवर्णनामाभिधेयकोऽयं राज्य: भारतीयसंस्कृते: प्रतीकमासीत्। चीनदेशस्य इत्सिंग: सप्तवर्षाणि यावत् अत्र संस्कृतभाषाया: अध्ययनं कृतवान्। अत्रापि बहवो शिलालेखा: संस्कृतभाषायां विद्यमाना: सन्ति।[१]

जावा — इण्डोनेशियाया: द्वीपेषु जावाद्वीपस्य सर्वाधिकं महत्त्वं वर्तते। द्वितीयशताब्द्यां यवद्वीपेऽस्मिन् भारतात् भारतीया अत्र निवासार्थम् आगता:। पञ्चम- शताब्द्यां यदा फाइयान: भारतात् चीनं प्रति प्रत्यावर्तित: तदा स: यवद्वीपमपि आगतवान्। फाइयानेन सह द्विशतसंख्यका: वणिजकार्यकर्तार: भारतीया: अपि आसन्। अत्रत्यानां शैलेन्द्रवंशीयानां राज्ञां वृत्तमपि ऐतिहासिकदृष्ट्या राजनीतिकदृष्ट्या च अतीव महत्त्वं विदधाति। शैलेन्द्रयुगस्य महनीया कृति: बरोब इरस्य महाचैत्यमस्ति।[२]

बाली — बालीद्वीपस्य विषये डॉ. राजेन्द्रमिश्रस्य कथनमस्ति यत् संस्कृतभाषाया: ज्ञानं विना जावा-बाली इत्यादीनां द्वीपानाम् इतिहासं ज्ञातुं न शक्यते। अद्यापि बाली द्वीपे संस्कृतस्य चत्वारि अनुसन्धानकेन्द्राणि सन्ति यथा —[३]

१. एच० आई० डी० (हिन्दूधर्मसंस्थानम्)

२. गेइंग कृत्य (कृतिसमुच्चय:)

३. उदयनविश्वविद्यालय: (डेनपासानगरे स्थित: इण्डोनेशियाया: राज्यविश्वविद्यालय:)

४. महासरस्वती विश्वविद्यालय: (नगरस्य मध्ये अशासकीय: विश्वविद्यालय:)

बालीद्वीपमवलम्ब्य डॉ. राजेन्द्रमिश्रमहाभागेन अनेकानि पुस्तकानि लिखितानि तासु बालीद्वीपे भारतीयसंस्कृति: सुवर्णद्वीपीया रामकथा, रामायण ककविन प्रभृतय: प्रसिद्धा:।

बोर्नियो — अत्रापि राजा अश्ववर्मण: पुत्रस्य मूलवर्मण: दानपुण्यानां यज्ञादीनां वृत्तं संस्कृतभाषयासमुत्कीर्णमस्ति। बोर्नियाया: पूर्वभागे कोम्बेङ्गस्य गुहा सर्वाधिका महत्त्वपूर्णास्ति। गुहायां गणेशनन्दी- अगस्त्य-नन्दीश्वर- ब्रह्मादीनां द्वादशसङ्ख्यका: मूर्तय: सन्ति।

इन्डोनेशिया (थाइलैन्ड:) — अत्र प्राचीनकालादेव भारतीया संस्कृति: राजते अधुनापि संस्कृत- भाषां प्रति अत्रत्यानां रति: अस्ति।

ईरान: — अत्यधिकेन सूक्ष्मविवेचनेन प्रतीयते यत् प्राचीनकाले भारतीया: आर्यजना: ईरानदेशं गत्वा तत्र निवासं स्वीकृतवन्त: अनेन अस्य देशस्य नाम आर्यदेश: इत्यभवत् कालान्तरे अपभ्रंशत्वेन ईरान इति जात:। पारसीयानां धार्मिक: ग्रन्थ: जिन्दवस्था ईश्वरीयज्ञानस्य प्रतीकमस्ति अस्मिन् ग्रन्थे आर्यशब्दस्य प्रयोग: प्राप्यते। पाश्चात्यानां मतमस्ति यत् - वस्तुत: जिन्दावस्था छन्दोवस्थाया: अपभ्रंश: अस्ति। जेन्दभाषाया: उद्गमस्थानमपि

१. भारतीय संस्कृति का विदेशों पर प्रभाव— ले. अशफाक अहमद अनन्त

२. भारतीय संस्कृति का विदेशों पर प्रभाव— ले. आशफाक अहमद अनन्त पृ.स. १२९

३. Sanskrit Studies in Indonesia — Prof. Rajendra Mishra

संस्कृतमस्ति । भाषाया: अनन्तरं एतेषां संस्कारेष्वपि भारतीयताया: प्रभाव: दृश्यते यथा भारते गर्भिणी ऋतुमती महिला स्पर्शयोग्या न भवति तथैव ईरानेऽपि प्राक्तने मान्यता आसीत् । प्राचीनसमये पारसीयपुरोहितेभ्य: यज्ञोपवतीधारणं यज्ञादिकमावश्यकमासीत् ।

यूनान: — यथा पूर्वस्यां दिशि भारतस्य प्राचीनतमं महत्त्वं वर्तते तथैव पश्चिमायां दिशि यूनानस्य । भारतात् एशियाखण्डेन सभ्यताया: पाठ: शिक्षित: यूनान: यूरोपीयान् देशान् सभ्यताया: पाठम् अपाठयत् । यथा भारते वाल्मीकि: गौतम: कपिल:, कृष्णव्यासादय: दार्शनिका: ऋषय: वभूवु: तथैव यूनाने होमर-सुकरात-अरस्तू-प्लेटो-हैरोडोटस-प्रभृतयो दार्शनिका: प्रसिद्धिं प्राप्ता: । सूक्ष्मविवेचनेन अनुसन्धानेन च प्रतीयते तत्रापि भारतीयानां व्यापारिक- सम्बन्धा: अभवन् येन भारतीय- सभ्यताया: दर्शनं तत्र भवति कतिपयसिद्धान्तेषु एकरूपता दृश्यते । विषयेऽस्मिन् कोलबुकमहाभागस्य कथनमस्ति "इदं दृष्ट्वा आश्चर्यं भवति यत् पैथोगोरस्य ओसलेसस्य च सिद्धान्ता: भारतीयदार्शनिकै: सह समरूपा: भवन्ति ।"

रोम:— इटलीभारतयो: प्राचीनधर्मानुशीलनेन ज्ञायते; पुरा उभयो: विविधक्षेत्रेषु विशेषत: धार्मिकक्षेत्रेषु सांस्कृतिकेषु च साम्यता आसीत् । संक्षेपेण यथा जेनस-गणेश:, सटर्न-सत्यव्रत:,सिरिस-श्री:, जुपीटर-इन्द्र:, मिनर्वा-दुर्गा, मिनर्वा "सरस्वती, डायोनीस-राम:, कृष्ण:-मूषा, तत्काले रोमेष्वपि चत्वार: वर्णा: आसन् यथा—

१. पुरोहित: (PRIESTS) ब्राह्मण:

२. शासक: (SENATORS) क्षत्रिय:

३. साहूकार: (PATRICIOSS) वैश्य:

४. दास: (PLEABIONS) शूद्र:

कतिपयै: ग्रीक-रोमन- लेखकै: भारतविषयमवलम्ब्य पुस्तकानि लिखितानि यथा मैगस्थनीजस्य भारत-वर्णनम् । अज्ञात-ग्रीक- नाविकस्य पुस्तकं तु अद्यापि विराजते तस्य आङ्गलानुवाद: 'पीपुल्स आफ दी एरीबियन सी'इति नाम्ना प्रकाशित: ।

फ्रांस: — अस्मिन् देशे अष्टाविंशतिशताब्द्यां जीन- फ्रैंको- इस- पोन्स- नामधेयकेन खीष्टधर्मप्रचारकेण वेदपुराणादिशास्त्रीयविषयमवलम्ब्य द्विशतसंख्यका हस्तलिपय: बंगप्रान्ते संगृहीता: । अत्रैव जीन फिलियोजैटेन आयुर्वेद- साहित्य- विज्ञान- ज्योतिषादिविषयेषु शोधकार्यं कृतम् । वस्तुत: फ्रांसदेशीया: भारतीयसंस्कृते: सम्यग् ज्ञानाय अभिमुखा: दृश्यन्ते ।[१]

अमेरिका — जेनेबाया: सुप्रसिद्धेन कोलम्बसेन अमेरिकाया: अन्वेषणं कृतम् इति तु सर्वे जानन्ति परम् इत: पूर्वमपि चीन-भारत- जापान- देशीया: जना: क्रमश: फाड-सन्ग, पाताल लोक, फाड-सी इति प्रकारै: जानन्ति स्म, अमेरिकायां मन्दिराणां ये ध्वंसावशेषा: प्राप्ता: ते सर्वे भारतीयमन्दिरै: सह साम्यं स्थापयति । मध्यअमेरिकायां मेक्सिको इति स्थाने प्राचीनतमा: सूर्य- गणेश- इन्द्रादीनां मूर्तय: प्राप्ता: । इत्थं"सूक्ष्मविवेचनेन बहु साम्यता

१. भारतीय संस्कृति का विदेशों पर प्रभाव

भारतीय- सभ्यतया सह प्राप्यते आधुनापि सं. रा. अमेरिकाया: हारवर्ड- पेन्सिल्वानियाँ- शिकागो- केलीफोर्मिया- कोलम्बिया- ब्रिजिनियां- मिशीगल- मिनीसोटा- एरीजोना- प्लोरिडादिविश्वविद्यालयेषु संस्कृताध्ययनस्य गरिमामयी परम्परा वर्तते ।[१]

अफ्रीका — अफ्रिकायामपि वर्तमानकाले सभ्यताया: यत् स्वरूपं प्राप्यते तत्र भारतीयसंसकृते: स्वरूपं प्राप्यते । तत्रत्यानां संस्कारै: सह भारतीय षोडशसंस्काराणां समरूपता सम्प्राप्यते ।

मिश्र: — पादरीब्रूसेलस्य कथनमस्ति भारतवर्षस्य मिश्रस्य च समानता सामाजिक- धार्मिक- पारिवारिक- दृष्ट्या सुस्पष्टा भवति । यथा वर्णाश्रमव्यवस्थादय: । संस्कृतभाषाया: मिश्रीभाषाया: शब्दा अपि परस्परम् एकरूपतां धारयन्ति यथा आदिम - अतुम । संस्कृतभाषायाम् आदिमस्य अर्थ: प्रथम: भवति मिश्रीभाषायाम्, अनुमस्य अर्थ: प्रथम: भवति । अनेन सिद्ध्यति मिश्रस्य भाषाया: उद्गम: संस्कृतादस्ति । कदाचित् मिश्रदेशस्य संस्कृति: अद्वितीया आसीत् ।

चीन:— भारतमिव चीनदेशीया संस्कृति: अपि अति प्राचीना प्रसिद्धा च परं तत्कालेऽपि सभ्यताया: कृते भारतवर्ष: चीनस्य गुरु इति कथ्यते । कालान्तरे बौद्धधर्मस्य प्रभावं तु को न जानाति स्वयं चीनदेशीयं साहित्यमत्र साक्षी वर्तते ।

जापान-कोरिया — ३८४ ख्रीष्टाब्द्यां चीनत: आताऊ शामताऊ नामधेयौ द्वौ बौद्धधर्मस्थ आचार्यौ बौद्धधर्मस्य प्राचारार्थं गतौ तदनु षष्ठशताब्द्यां कोरियायां बौद्धधर्म: राजधर्मत्वेन स्वीकृत: अत्रैव सम्राट् शोमेन भगवत: बुद्धस्य कांस्यप्रतिमा निर्मापिता । कालान्तरे वितात्सो: माध्यमेन एका अपरा मूर्ति: जापाने आनीता इत्थं शनै: शनै: कोरियायां जापाने च बौद्धधर्मस्य अत्यधिक: प्रभाव: जात: । भारते त्रिंशतकोटि देवता: विराजन्ते परं जापाने तु इत: अधिकं देवतानां मन्दिराणि सन्ति । एतेषां मन्दिराणां मूलं बौद्ध: अथवा शिन्तू धर्म: आसीत् । इतिहासकाराणां मतानुसारेण शिन्तू शब्द: हिन्दू शब्दस्य विकृतं रूपं विद्यते ।

खोतन:— अत्रत्यानां बौद्धानां विषये फाइयानेन कथितम् खोतनीया: बौद्धधर्मानुयायिन: सन्ति अत्रापि बौद्धकालस्य अवशेषा: सम्प्राप्ता: तिब्बतीय- जनश्रुतेरनुसारं पुरा विजयसम्भवस्य साम्राज्यमत्र आसीत् । विजयसम्भवस्य गुरुणा आर्य- वैरोयनेन खोतनीभाषाया: कृते ब्राह्मीलिपे: आधारेण खोतनीलिपि: निर्मिता ।

कुची (कूचा) कुचीराज्यमपि भारतीय- संस्कृते: केन्द्रमासीत् वराहमिहिरेण बृहत्सहितायां शक- पल्लव कुशिक- जातीनां वर्णनं कृतम् एता जातव: कुचीराज्यम् अवबोधयन्ति राज्योऽयम् उत्तर-तटीय-उपत्यकायां कुशी द्वीपम् आसीत् ।

तुफीन — कुचीत: पूर्वस्यां दिशि तुफीन नामधेय: देश अत्रापि प्राचीनसभ्यताया: ध्वंसावशेषा: प्राप्यन्ते । अत्र संस्कृत- चीन- ईरानी- तुर्की- आदि भाषासु लिखिता: लेखा: उपलब्धा: ।

१. SANSKRIT STUDIES IN UNITED STATES— PROF. ROSANE ROCHER

काशगर: — चतुर्थशताब्द्यां यदा चीनदेशीय: फायमान: अत्रागत: तदा अत्र पञ्चवार्षिकं महोत्सवमासीत् । अत्रैव काशगरे बौद्धविहार: बुद्धप्रतिमाश्च आसन् । ह्वेनत्सांगस्य यात्राविवरणेनापि काशगरे बौद्धधर्मस्य स्थिति: प्रमाणिता भवति ।

अफगानिस्तानम् — अफगानिस्तानेन सह तु भारतस्य आत्मीया: सम्बन्धा: आसन् । प्राचीनकालादेव आर्यजना: अफगानिस्ताने पञ्जाबस्य उपत्यकासु च निवसन्तिस्म अत्रत्या भौगोलिकी नामावलि: अद्यापि स्वास्तित्वं प्रकटयति तेषां नामानि इत्थं परिणतानि सन्ति गान्धार: - कन्धारे, कुमा-काबुले, बाल्हीक: वलखे, सुवास्तु - स्वाते, वंक्षु - औक्ससे अपेस्ता - अरखेती, सरस्वती - अरगनदावे परिणता: । अफगानशब्दस्य मूलम् अश्वकायनमस्ति । चन्द्रगुप्तमौर्यस्य शासनकाले अफगानिस्तानम् भारतस्य अङ्गमासीन् । काबुले वामियाँनामके स्थाने अजंताया: सदृशानि भित्तिचित्राणि प्राप्तानि । अत्रत्या: विशालतमा: बौद्धप्रतिमा: जगति प्रसिद्धा: ।

लंका— को न जानाति लंका-भारतस्य माहात्म्यम् । राम-रावणयुद्धादारभ्य अद्यावधि वस्तुत: उभयो: देशयो: सांस्कृतिकं ऐक्यं विदधाति लंका । सम्राट् अशोकेन महेन्द्रनामकं स्वपुत्रं संघमित्रानामधेयीं पुत्रीं तत्र सप्तभिक्षुभि: सह बौद्धधर्मस्य प्रचारार्थं सम्प्रेष्य बोधवृक्षस्य यत्पादपं रोपितं तस्य प्रभावेण फलेन च वस्तुत: अत्र बौद्धधारा प्रवाहिता ।

आस्ट्रेलिया— वर्तमानसमये आस्ट्रेलियायां संस्कृतस्य अध्ययनम् अध्यापनं च भवति । विवेचनेन ज्ञायते तत्र भारतीयसभ्यताया: प्रभाव: प्राचीनकाले न आसीत् । साम्प्रतं तु आस्ट्रेलियाया: प्रमुखनगरेषु प्राचीन-भारतीयाध्ययनविषयस्य अध्यापनाय नियुक्तानां विद्वज्जनानां माध्यमेनापि संस्कृतभाषाया: अध्ययनं भवति । एते विद्वांस: भारतीयधर्मस्य बौद्धधर्मस्य च अध्ययनार्थं छात्रान् प्रेरयन्ति । आष्ट्रेलियाया: राष्ट्रियविश्वविद्यालये १९६४ ख्रीष्टाब्दे ए.एल. बॉशम एवं जे. डब्ल्यू. डी. जांगमहोदयस्य नियुक्ति: अभवत् । ए.एल. बाशममहोदय: एशियनसभ्यता अध्ययनविभागे नियुक्त: आसीत् । तदा प्रभृति अस्मिन् विभागे आष्ट्रेलियन् छात्रेभ्य: संस्कृत-तिब्बत- बौद्धादि- विषयकं प्रशिक्षणं दीयते ।[१]

कनाडा— यद्यपि भारतीयसभ्यताया: आंशिक: प्रभावस्तु अत्र विराजते एव परं संस्कृतविषयस्य स्थिति: अत्र नास्ति सन्तोषप्रदा । साम्प्रतम् अत्रत्यानां प्रवासिभारतीयानां प्रभावेण प्रयासेण च विश्वविद्यालयस्तरेषु धर्मस्य अध्ययनाय अध्यापनाय च प्रोत्साहनार्थं दीयमान: आर्थिक: सहयोग: श्लाघनीयोऽस्ति ।[२] इत्थं निखिलेऽस्मिन् संसारे भारतीयसंस्कृते: सभ्यतायाश्च प्रभावो सर्वत्रैव दृश्यते अत्र नास्ति सन्देहाऽवकाश: ।

यदा-कदा मनसि आश्चर्यं भवति तदानीं के गुणा: आसन् येषां प्रभावेण भारतीयसंस्कृते: सुप्रभावो जात: तदनूत्तरमपि प्राप्यते यत् तदानीं तपो-पूता सदाचारिण: अनेके ऋषय: स्वार्थं विहाय लोक-कल्याणकामनया

१. SANSKRIT STUDIES OUTSIDE INDIA Prof. Greg, Baiheg and Prof. Purunhathama Biliamorsa

२. SANSKRIT STUDIES OUT SIDE INDIA Prof. Greg, Baihey and Prof. Ashok Aklujkar

विश्वभ्रमणं कृत्वा भारतीय-संस्कृतेः प्रचारं कृतवन्तः कौण्डिन्येन अगस्त्येन च सर्वप्रथमं समुद्रस्य यात्रा कृता विदेशेषु भारतीयसंस्कृतेः प्रचारश्च कृतः ।

सेयं विधिः अद्यापि राजते बहवो मनीषणः संस्कृताः संस्कृतसेवापरायणाश्च संस्कृतस्य संस्कृतेश्च प्रचारार्थं प्रसारार्थं च स्वजीवनसर्वस्वं समर्पयन्ति ।

मन्ये सर्वे संस्कृतानुरागिणः जगत्यस्मिन् पुनः सदाचारस्य अहिंसायाश्च महिमानं प्रतिष्ठापयिष्यन्ति यया विश्वे सर्वविधा शान्तिः भवेत् । जयतु संस्कृतं संस्कृतिश्च ।

विश्वसभ्यतासंस्कृत्योः संस्कृतस्य योगदानम्

प्रो. ब्रह्मदेवनारायणशर्मा

संस्कृतभाषा विश्वजनहिताय, सांस्कृतिकैक्यप्रतिष्ठापनाय विश्वस्मिन् जगति चार्यसंस्कृतेः प्रसाराय महद् योगदानं कृतवतीति विद्वज्जनानामभिमतम् । एतच्च संस्कृतं विश्वैकसाम्राज्यसंस्थापनाय, विश्वबन्धुत्वोज्जीवनाय, विष्वक् शान्तिसुरतरुसमारोपणाय च अस्ति किमपि मानवेभ्यो भगवदुपायनीकृतं दिव्यतमन्नाम तत्त्वम् । भारतीया मनीषिणः सांस्कृतिकनिधिमुदारभावेन विश्वजनेभ्यो व्यतरन् । तदर्थं सुदूरप्राचीनकालतो बहवो भारतीया विदेशेषु गत्वा भारतस्य सांस्कृतिकसन्देशं व्याख्यातवन्तः । वैदेशिका अपि सहस्रशो भारते समागत्य सांस्कृतिकसागरं विगाहमाना जीवनस्य परमोद्देश्यं लब्धवन्तः । भारतीयविश्वविद्यालयेषु शिक्षितुं सर्वेभ्यो देशेभ्यो दूरतोऽपि विद्यार्थिनः समागताः । भारतागमनमार्गेषु बह्व्यः शिक्षणसंस्थाः पूर्वतः पश्चिमतश्च जिज्ञासूनां कृते समुत्थापिताः । तद्यथा चम्पाअङ्कोरश्रीविजयप्रभृतिस्थानानि संस्कृतविद्यायाः केन्द्राणि बभूवुः । तथापि च काशगरस्य विश्वविद्यालयः प्रख्यात एवासीत् । चीनदेशे बह्व्यः संस्थाः भारतीयग्रन्थानामनुवादाय, चीनीभाषायां मौलिकग्रन्थप्रणयनाय च स्थापिताः । काचित् संस्था नवमे दशमे वा ईशवीयशतके महाव्युत्पत्तिनामकं संस्कृततिब्बतीचीनीभाषाणां कोशं प्रणिनाय ।

भारतीयपण्डिताः यत्र यत्र तैः गतास्तत्र तत्र भारतीय— साहित्यमर्पितं, प्रचारितम् । पुरा जगति भारतीयसाहित्यं क्वचिदनुवादरूपेण, क्वचिद् विशुद्धभारतीयभाषानुबद्धमेव क्वचिच्छायारूपेण च परिव्याप्तं बभूव । अत्रेदं नैवं विस्मरणीयं यदस्मिन् भारतीयसाहित्ये संस्कृतभाषाया एव प्राधान्यमासीत् । भारतीयकथासाहित्यस्य पाश्चात्यदेशेषु विशेषसमादरो बभूव ।

कम्बुज-चम्पा-मलय-यव-सुमात्राप्रभृति पूर्वद्वीपसमूहे संस्कृतभाषायामुत्कीर्णलेखाः गणनातीताः सन्ति । इमे लेखाः प्रायेण लघुकाया एव सन्ति । चीनीतुर्किस्तानप्रदेशे रेवातान समीपं (५००) पञ्चशतं गुहाः सन्ति । तत्र कस्याञ्चिद् गुहायां संस्कृतचीनीतिब्बतीभाषाणां दर्शनसाहित्येतिहासभूगोलादिविषयकानि (१५००) पञ्चदशसहस्राणि पुस्तकानि प्राप्तानि । एतत्सर्वं कार्यजातं भारतस्य सांस्कृतिकदिग्वजयप्रभावादेव सम्पन्नम् । ईरानदेशात् चीनदेशादिसमुद्रं यावत् साईवेरियाप्रदेशस्य तुषारावृतप्रदेशात् जाया-वोर्नियोद्वीपपर्यन्तं प्रशान्तमहासागरस्य द्वीपतः सोकोत्तरपर्यन्तं च भारतेन पूर्वं स्वधार्मिकविश्वासाः प्रतिभाः कथासाहित्यसभ्यताश्च प्रसारिताः, तेन च सुदीर्घकालं यावत्तस्य शाश्वतः प्रभावः स्थापितो बभूव । बौद्धधर्मो विश्वस्य प्रथमः संघटितः प्रचारकश्च धर्मो विद्यते, सोऽपि च भारतीयैः परमोत्साहेन विदेशेषु प्रचारितः । एतेषां सर्वेषां दिग्विजयकार्याणां मुख्यं साधनमासीत् संस्कृतभाषा

संस्कृतस्य मनुश्शुद्धिप्रयोजकता

श्रीशुकदेवशर्मा

न केकलं भारतमेवापितु निखिलमेव विश्वं विविधाभिः समसामयिकसमस्याभिः सुदृढं निगडितं सद्विचेष्टमानं सन्दृश्यते वर्तमाने युगे। समग्रायां धरायां जाज्वल्यमाना पर्यावरणप्रदूषणसमस्या, समाजप्रदूषणसमस्या, राजनीतिप्रदूषणसमस्या, विश्वव्यापिनी सर्वाहितकरी च भ्रष्टाचारसमस्या, विषायमाणानामाशीविषसदृशानां— 'एड्स'-'केंसर'— प्रभृतीनां जीवितापहराणामसाध्यानां रोगाणान्तु समस्या विश्वविश्रुतान् आयुर्वेदवैज्ञानिकानपि सन्त्रासयमाना दरीदृश्यते।

आसामन्यान्यानाञ्च विश्वस्य समस्यानां निष्कृतिस्तु येन केनापि प्रकारेण सततप्रयासनिरता नरा वैज्ञानिका वा सम्पादयेयुर्नाम। परं यदि सर्वसमस्यामूलभूतं मानवमन एव प्रदुष्येत्तर्हि किं स्यादिह लोके? यतो हि— "मन एव मनुष्याणां कारणं बन्धमोक्षयोः"— हतकेयं मनसः प्रदूषणसमस्या सर्वाः समस्या अतिशयाना विद्यते। सम्पूर्णेऽपि भूमण्डले न कश्चिदपि वैज्ञानिको नरो यन्त्रं वा मनसः प्रदूषणं संशोधयितुं क्षमोऽवलोक्यते। इत्थं प्रतीयते यन्मनसः शुद्धौ नाल्पमपि वस्तुजातं प्रदूषितं स्यात्, का कथा सम्भूतेः समस्यानाम्?

मनसः प्रदूषणसम्बद्धानि यानि तत्त्वान्यवलोक्यन्तेऽस्मिन् जगति तानि सर्वाण्येवान्योन्याश्रितानि प्रसरणपराणि विद्यन्ते। अत एवैकस्य तत्त्वस्य प्रदूषणेनान्यस्य प्रदूषणं स्वाभाविकमपरिहार्यञ्च प्रतिभाति। दिवानिशं सर्वतः सन्दृश्यमानेन बहुविधप्रदूषणेन शिशोरपि मनः प्रदुष्येदिति नात्याश्चर्यकरम् अद्यत्वे वायुजलमृत्तिकादिप्रदूषणेन सहास्माकमाध्यात्मिकं सांस्कृतिकञ्चापि पर्यावरणं प्रदूषितं सञ्जातम्। यदा मानवः कुत्सितविचारैरमानवीयकलुषितभावैश्च संवलितो भवति तदैवासौ जीवानां हिंसनं, वनानां— द्रुमाणां पातनं, मानवानां-प्राणिनामुत्पीडनं पञ्चतत्त्वानाञ्चाशुद्धिर्जायते। सर्वमेवैतन्मनसः प्रदूषणं ग्राह्यम्। अस्यैव प्रदूषणं स्वस्थसमाजस्य, समुन्नतिपथप्रवृत्तस्य राष्ट्रस्य, समुन्नतायाश्च संस्कृतेः समुत्पीडकं भवति। सम्प्रति भौतिकवैज्ञानिकाः मनसः प्रदूषणं प्रति नितान्तं भयातुराः विलोक्यन्ते।

यद्यप्याधुनिकेन विज्ञानेन— "यत्र विश्वं भवत्येकनीडम्"— इत्यस्य संकथा सत्यापितास्ति तदपि विज्ञानं पर्यावरणसंरक्षणे नितान्तमसहायं प्रतीयते। विज्ञानेनोत्पादितानामतिशयेन विध्वंसकानामवाञ्छितानाञ्चाविष्काराणां स्मृतिमात्रेणैव हृदयं प्रकम्पते स्वबन्धनस्थानाच्च प्रधावितुमुत्कण्ठते। अतः सर्वविधसुखप्रदायि विज्ञानं प्राणिनां कृते बृहत्तमोऽभिशापः कथयितुं शक्यते, यदि नाम मानवस्य मनः कदापि प्रदूषयेत्?

बौद्धदर्शनस्य मूलग्रन्थानां चीनीभाषातः, संस्कृतभाषातः, तिब्बतीप्रभृतिभाषाभ्यश्च आङ्ग्लानुवादस्येका वृहती योजना वर्तते। अस्मात् संस्थानाद् अनेकानि बौद्धसूत्राणि प्रकाशितानि सन्ति। अस्मादेव 'बुद्धिस्ट टेक्स्ट इन्फार्मेशन' नामिका पत्रिका प्रकाश्यते, यस्यां बौद्धग्रन्थानां संसारस्य कस्यांश्चिदपि भाषायां प्रकाशितग्रन्थानां निबन्धानां च संकलनं विधाय एकस्मिन् वर्षे चतुर्वारं प्रकाशनं विधीयते। अनेन संस्थानेन १९७५ यीसवीय वर्षे पञ्चशतानां बौद्धसंस्कृतग्रन्थानां हस्तलिपीनां माइक्रोफिल्मरूपेण संकलनं कृतम्। बौद्धदर्शने धर्मे च आधुनिकसन्दर्भज्ञानाय एतस्य संस्थानस्य पत्रिकेयमतीवोपयोगिनीति।

अस्माकं परम्परा देशान्तराणि शस्त्रेण जेतुं रक्तं पातयितुं च नास्ति, किन्तु तानि ज्ञानालोकेन प्रकाशयितुम्। तस्य पावनं कुलधर्मो वर्तते। पूवजैर्यत् कार्यं कृतं तदधिकतया सुचारुतया च सम्पन्नं कर्तुमस्माकं कर्तव्यं वर्तते।

उपरितनैर्निदर्शनैरिदं दृढं वक्तुं शक्यते यत् संस्कृतभाषाया बौद्धसंस्कृतेश्च बलीयान् प्रभावो विश्वस्यानेकेषु देशेषु संजातः, येनाद्यापि श्रीलंका-बर्मा-थाईलैण्ड-तिब्बत-भूटान-कोरिया-जापान प्रभृतिदेशेषु भगवान् बुद्धः सर्वतोभावेन समाराध्यते, तदुपदेशानुसारमेव जीवनशैली समाद्रियते, पञ्चशीलसिद्धान्ताश्चानुष्ठीयन्ते।

विश्वस्य दक्षिणपूर्वदेशेषु भारतस्य यः प्रभावो दृश्यते स खलु भगवतो बुद्धस्य उपदेशानां प्रचारसंचारक्रमे एवाभूत्। एष खलु सांस्कृतिकदिग्विजय इति नाम्ना ख्याप्यते। भारतीयेयं संस्कृतिः कथं प्रतीचीमगमद् इत्यस्य मेगास्थनीज महाशयानां 'इण्डिकाख्ये विवरणे श्रमणब्राह्मणशब्दप्रयोगेनैव आकल्यते। अशोकेन-धर्मप्रचारकाः सीरिया, मिश्र, मकदूनिया, प्रदेशे च धर्मप्रचारार्थं प्रेषिताः। न केवलं दूता एव श्रीलंकां प्रति अपितु तेन स्वपुत्रेण महेन्द्रेण स्वपुत्र्या संघमित्रया च बौद्धधर्मस्य प्रचारः कारितः। पूर्वस्यां दिशि बर्मा-पालि-स्याम-चम्पा-कम्बुज-मलय-जावा-सुमात्रा प्रभृतिषु देशेष्वपि अशोकेनैव धर्मः प्रसारितः। अष्टादशशतकातु यूरोपः बौद्धधर्मदर्शनेभ्यः परिचितो जातः। विभिन्नैः विद्वद्भिः पालि-संस्कृतभाषाभ्यां श्रीलंका-चीन-भारत-तिब्बतप्रभृतिदेशेभ्यश्च बौद्धज्ञानस्य मूलं स्वरूपं ज्ञातुं प्रयतितम्, तेषां प्रयत्नेनैव तत्तद्देशस्थाः जनाः तदीयप्राक्तनसंस्कृतिबोधे अनुरक्ता अभूवन्।

श्रीयुजेनेवबर्नफ-महाशयेन (१८०१-१८५२) पालिव्याकरणस्य प्रणयनम्, महावंशस्य अभिधानप्रदीपिकायाश्चाध्ययनम्, सद्धर्मपुण्डरीकस्य अनुवादं १८५२ वर्षे विधाय बौद्धदर्शनस्येतिवृत्तमुल्लिख्य बौद्धाध्ययनानुसंधानस्य कार्यमनुष्ठितम्। श्री पी. ग्म्लिवोट-नामकेन फ्रांसदेशस्य दूतेन श्रीलंकातः प्रभूतमात्रायां पालिपाण्डुलिपीनां संकलनं व्यधायि। एतस्मात् संकलनात् आई.पी. मिनायेफमहाशयेन १८६९ वर्षे पातिमोक्खसमन्तपासादिकयोः कतिपयांशानां सम्पादनं कृत्वा प्रकाशनं कृतम्। विग्गेफासबोल-ए. वेवरमहोदयाभ्यां धम्मपदजातके च प्रकाशिते। रावर्टचाइल्डर्समहाशयेन महापरिनिब्बान-खुद्दकपाठौ अपि प्रकाशितौ। स एव पालि-अंग्रेजीकोषस्यापि निर्माणं कृतवान्। एनिलसेनार्त्तमहाशयेन कच्चायनव्याकरणं प्रकाशितम्। इत्थं पालिसाहित्यव्याकरणकोशानां प्रकाशनेन अस्यामध्ययनाय विदुषां प्रवृत्तिः पूर्वादधिका संजाता। पालिटेक्सर सोसायटीनामिकया संस्थया पालित्रिपिटकेषु अभिधर्मस्य कतिपयान् ग्रन्थानतिरिच्य समग्रस्यैव पिटकानुपिटकस्य आङ्लानुवादो, रोमनलिप्यां तस्य संस्करणमपि कृतम्। टी.एस.डब्लू रीजडेविसमहाशयानां 'पालिआङ्लभाषाडिक्सनरी' अतीव ख्याता सती प्रसिद्धिं प्राप्नोति। इत्थं पालि-बौद्धदर्शनस्य अध्ययने कासवोलटर्नरक्लफ-मिनयेफप्रभृतीनामतीव योगदानमास्ते।

ब्रियनहफ्टन-हासनमहाशयः नेपालदेशतः अशीतिसंख्याकाः पाण्डुलिपीः फ्रांसदेशस्य 'सोसाइते आशियतिकाय' सम्प्रेष्य प्रतीच्येषु विद्वत्सु संस्कृतबौद्धदर्शनं प्रति रुचिं प्रावर्धयत्। सिल्पालेवीमहाशयेन महायानमाश्रित्य कार्यं सम्पादितम्। स खलु चीनी-मोट-संस्कृत-पालिभाषायां इपानपुरस्सरं मध्येशियायः संस्कृतेर्बोधेन सह सर्वास्तिवादपरम्परायाः धर्मसमुच्चयस्य, विंशतिकायाः, त्रिंशतिकायाश्च, बृहत्कोशसंग्रहस्य मध्यान्तविभागटीकाकारिकायाश्च संकलनं सम्पादनं नूतनमन्वेषणं च कृतवान्। पुसेमहोदयेन अभिधर्मकोशस्य षट्खण्डेषु प्रकाशनं कृतम्। मूलसंस्कृतग्रन्थानामनुवादोऽपि कृतः। ते च ग्रन्था सन्ति-आदिकर्मप्रदीप-प्रसन्नपदा-मध्यमकावतार-बोधिचर्यावतार-न्यायबिन्दुप्रभृतयः। बौद्धदर्शनं माध्यमिकदर्शनं पाश्चात्त्येषु अतीवौत्सुक्यं प्रवर्धयति, अत एव दर्शनेऽस्मिन् अनेके शोधनिबन्धाः प्रकाशिता वर्तन्ते। लन्दन-वर्लिन-पेरिस-कोपेनहेग-टोक्यो-महानगरेषु बौद्धदर्शनसम्प्रदायानां विविधभाषासु स्थितानां ग्रन्थानां भाषान्तरं विधाय मूलद्वारा वा अध्ययनं प्रचलति। सम्प्रति अमेरिकायां बौद्धधर्मस्याध्ययने महती रुचिः समवलोक्यते। न्यूयार्कमहानगरस्य विश्वधर्मसंस्थाननामके संस्थाने

संस्कृतसाहित्यं च। इयमार्या संस्कृतभाषा बहुभिर्विदेशीयैरपि समधीता, तस्यां ग्रन्थादिप्रणयनं विधाय परमं वैदुष्यमपि स्वकीयं ख्यापितम्। सरविलियमजोन्समहोदयस्य संस्कृताविष्कारघोषणातः पूर्वमेव संस्कृतस्य भूयांसो व्याकरणकोशादिग्रन्था यूरोपदेशे प्राप्तप्रचारा अभूवन्निति निश्चप्रचं वक्तुं शक्यते। फ्रांसदेशे १७१८ तममीशुवत्सरादारभ्य १७४० तमयीशुवत्सरं यावत् 'कालेजरामल' इत्याख्यराजकीयमहाविद्यालयस्य पुस्तकालये संस्कृतवाङ्मयं संचितमभूत्। एकोनविंशे यीशुशतके आंकतिलघुपेरो महोदयः पारसीकभाषान्तरितानां पञ्चाशतसंख्याकानामुपनिषदां फ्रेञ्चभाषान्तरं व्यधात्। इतः परं सर विलियमजोन्स-स्थापिता वङ्गदेशीया 'एशियाटिक सोसाइटी' संस्कृतविद्यायाः सौरभप्रसाराय विशिष्टं केन्द्रमजायत। इत्थमाङ्गलदेशेषु संस्कृत-पालि-प्राकृत-अपभ्रंशादिभारतीयभाषाणामनुशीलनमुपाक्रमत।

अस्मिन्नेव काले आङ्गलदेशीयेन सम्यक्संस्कृतज्ञेन अलेग्जेण्डर हेमिल्टन नामकेन नौविभागाधिकारिणा फ्रीड्रिस्व श्लीगल-प्रभृतयो भूयांसश्छात्राः संस्कृतमध्यापिताः। १८१४ तमे यीशुवत्सरे पेरिसविश्वविद्यालये संस्कृत-प्राध्यापकाः ए.एल् दशेजीमहोदयो गुरुमन्तरा स्वयमेव संस्कृतमधीतवान् विशिष्टो वैयाकरणश्च जातः। अस्य शिष्यः श्रीविनूर्फमहोदयः ऋग्वेद-अवेस्तयोः संबन्धे तुलनात्मकमनुशीलनं प्रावर्तयत। अस्य शिष्यपरम्परायामासीद् मैक्समूलरमहोदयः। श्रीफूशोमहोदयो ललितविस्तरग्रन्थस्य त्रिविष्टपदेशीयभाषातः फ्रेञ्चभाषान्तरं श्री वर्गेनमहोदयः कम्बोजसंस्कृतशिलालेखानां च फ्रेञ्चभाषान्तरं व्यधात्। श्रीबर्गेन्यमहानुभावस्य शिष्यः श्री सिल्वा-लेवीमहोदयः संस्कृतधर्मशास्त्राणि नाट्यशास्त्रादीनि च पर्यालोचयत्।

एतेन बौद्धसंस्कृतवाङ्मये विशिष्टं कार्यमनुष्ठितम्। सोरवोनविश्वविद्यालये वेदव्याकरणनदीष्णेन विदुषा श्रीलुइरेनु महोदयेन काशिकावृत्तिमाश्रित्य गवेषणाकार्यं कृतम्। श्रीपियरफिलियोजामहाशयः सम्पूर्णमहाभाष्यस्य फ्रेञ्चभाषानुवादं कर्तुं बद्धपरिकर आस्ते, तस्य प्रथमखण्डः पाण्डिचेरीसंस्थानात् प्रकाशितः। डॉ. लुड्विक्स्टर्नबारवमहोदयेन महासुभाषितसंग्रहाभिधं महत् कार्यं प्रायेण विंशतिखण्डेषु सम्पादितं यस्य पञ्चषाणि खण्डानि अद्यावधि प्रकाशितानीति।

एवं यीशवीयषोडशशतकादारभ्याद्यावधि विदेशीयसंस्कृतविदुषां संस्कृतविषयककार्यवृत्तमिह निदर्शनार्थमुदाहृतम्। इतो बहुकालपूर्वं सप्तमशतके एव त्रिविष्टपदेशीयैः पण्डितैर्भारतमागत्य संस्कृत-भाषाधीतेति नाविदितं विदुषाम्। किञ्च बौद्धधर्मो यीशुसंवत्सरात् पूर्वमेव चीनदेशं प्राकाशयत्। चीन-देशाद् बौद्धधर्मानुयायिनो जना भारतमागत्य बौद्धविहारेष्वधीत्य कृतकृत्या अभूवन्। पश्चाद् बौद्धधर्मस्य महापण्डितः कश्चित् पारसीको राजकुमारो भारतीयबौद्धपण्डितानां साहाय्येन कतिपयपालिग्रन्थान् संस्कृतेनानूदितवान्।

ह्वेनसांगो हर्षवधनस्य शासनकाले सप्तमे यीशवीय-शतके भारतीयानेकविद्यालयेषु धर्मदर्शनादीनां ग्रन्थानधीत्य नालन्दाविश्वविद्यालयस्योपकुलपतिपदमलमकरोत्। ६७१ तमे यीशुवत्सरे भारतमागतेन इत्सिङ्ग-महोदयेन चीनदेशे चीनीसंस्कृतभाषात्मकोऽभिधानग्रन्थः प्रणीतः। एतेन विश्वस्य देशेषु संस्कृतज्ञानं संस्कृतिश्च चिरकालादेव प्रवृत्तं बभूव इति ज्ञायते।

संक्षेपत:, सर्वविधपर्यावरणप्रदूषणस्य विशिष्टं कारणन्तु अस्माकं मन एवास्ति। स्वेच्छाचारिणा, नृशंसतातत्परेण, प्रवञ्चनासंसक्तेनातिशयचञ्चलेन, ईर्ष्यया जडीभूतेन दिवारात्रावशान्तेन च मनसाधुनिको मानव: सर्वत्र सर्वं प्रदूषयितुं संलग्नो दृश्यते। तस्यैवंविधा मन:स्थिति: सञ्जाता यदसौ प्रतिवेशिनं सम्बन्धिनमपि वोत्पीडयितुं न लज्जते। जलीयानां वन्यानामन्येषाञ्च जीवजन्तूनान्तु का कथा ? ? भौतिकं सुखमनुभवन्नसौ न चेतयते परेषां सुखं परिवेशं वा। अयमेव हेतुर्यदापणेषु वीथिषु च दुर्गन्धसम्पृक्तानां पदार्थानां संघट्ट: समाजे चानेकविधा: असाध्या: रोगा: विसंगतिपरिपूर्णाश्च परिस्थितय: समुत्पन्ना: सन्ति। अस्यैव महामहिमशालिनो मनस: प्रदूषणेनास्माकं प्राणभूतानि पञ्चतत्त्वानि सन्दूषितानि, स्वस्वार्थपूर्त्यै द्रुमाणां कर्त्तनं, परकार्यसिद्ध्यै चोत्कोचग्रहणभूतानामसामाजिकानां तत्त्वानां परम्परा: प्रारब्धा:। सर्वमेतन्मानवस्य मानसिकप्रदूषणस्यैव परिणामो विद्यते। मानसिकप्रदूषणस्य संशोधनायास्माकं तप:पूतैराद्यैरार्यैर्नैकधा मन:—शुद्ध्यै सङ्कल्पितम्।

भारतीयसंस्कृतेर्मूलभूतेष्वाद्येषु वेदग्रन्थेष्वपरिमिता: स्तुतय: सूक्तयश्च मनस: शुद्धिं प्रतिपादयन्त्यउपलभ्यन्ते—

"आ नो भद्रा: क्रतवो यन्तु विश्वत:।" (ऋ. १,८९,१)

"आ रे देवा द्वेषो अस्मद् युयोतन।" (ऋ. १०,६३,१२)

"पृथिवी ? यच्छा न: शर्म सप्रथ:।"(ऋ. १,२२,१५)

"भद्रं कर्णेभि: शृणुयाम देवा:।" (ऋ. १,८९,८)

"भद्रं पश्येमाक्षभिर्यजत्रा:।"(ऋ. १,८९,८)

"मित्रस्य चक्षुषा समीक्षे।"

"सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।"

"मधु जनिष्णीय मधु वंशिषीय।"(ऋ. ९,१,१४)

"विश्वानि देव सवितर् दुरितानि परासुव।"(ऋ. ५,८२,५)

यजुर्वेदे तु षड्भिर्मन्त्रैर्महर्षिणैकस्मिन्नेव सूक्ते स्वस्य मनस: शिवसङ्कल्पनं प्रार्थितम्। कथितञ्च यद्दैवं (अतिशयप्रकाशशीलं मन:) जाग्रतस्तथैव सुप्तस्य दूरमुदैति; ज्योतिषामप्यद्वितीयं ज्योति:स्वरूपं दूरङ्गमञ्च मे मन: शिवसङ्कल्पमस्तु।[1] यच्च प्रज्ञानं चेतो धृतिश्चास्ति; प्रजास्वन्तरमृतं ज्योतिरस्ति; यद्विना मानव: किमपि कर्म कर्त्तुं न पारयते तदेव मे मन: शिवसङ्कल्पमस्तु।[2] एवमेवान्यैश्चापि मन्त्रै: मनस: शुद्धिर्वाञ्छितास्ति। अथ च वाण्यां सत्यतां

१. "यज्जाग्रतो दूरमुदैति दूरं तदु सुप्तस्य तथैवेति।
दूरङ्गमं ज्योतिषां ज्योतिरकं तन्मे मन: शिवसङ्कल्पमस्तु॥" (यजु. ३४,१)

२. "यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मन: शिवसङ्कल्पमस्तु॥" (यजु.३४,३)

कामयमानः ऋषिर्वदति— "वाचः सत्यम् अशीय"[१]— यत्किञ्चिदप्यहं वदेयम्, तत्सर्वं सत्यमेव स्याद् यतो हि सत्यं विना मनो न शुद्ध्यति।

अथर्ववेदे च वाचो माधुर्यं समेषाञ्च कल्याणमिच्छन्-ऋषिः कथयति—यत्किमपि मुखान्निःसरेत्तत्सर्वं मधुमदेव स्यात्[२]; भूमौ सर्वेषां प्राणिनां शं स्यात्[३]; सर्वाश्च दिशोऽस्मान् प्रति मित्रभावाप्लाविताः स्युरिति।[४]

यद्यपि गीतायाः षष्ठेऽध्याये पार्थेन चञ्चलस्य मनसो निग्रहं वायोरिव सुदुष्करं भणितं[५] परं तत्रैव श्रीकृष्णेन तस्य निग्रहोऽभ्यासवैराग्याभ्यां सम्भव इति प्रतिपादितम्।[६] पातञ्जलयोगदर्शनं मनसो निग्रहं 'योगेन' साधयति।[७] प्रायेण सर्वाण्येव शास्त्राणि, धर्मशास्त्राणि अन्ये चापि ग्रन्थाः संस्कृतसाहित्ये मनसो वश्यतां तेनैव च शुभाशुभकर्मणामनुष्ठानं मन्यन्ते। वशिते च तस्मिन् केवलं सत्कर्मणामेव विपाको जायते। मनुस्मृतिकारेण द्वादशाध्याये मनसस्त्रिविधमशुभं कर्म वर्णितम्।[८] मानवोऽधर्मे (असत्कर्मणि) कदापि मतिं न कुर्यात्।[९] मनुष्यस्य मन एव सर्वाः देवतास्तदेव च शरीरिणां शुभाशुभं कर्मयोगं जनयति।[१०] अस्य (मनसः) च शुद्धिः सत्यभाषणेन तथैव भवति यथाद्भिर्गात्राणि शुद्ध्यन्ति।[११]— "मन एव मनुष्याणां कारणं बन्धमोक्षयोः"— संस्कृतसाहित्यविश्रुतेयं सूक्तिरस्मान् "बन्धमोक्षाभ्यां"— सदसत्कर्मणामेवाभिप्रायं बोधयति। अस्मादेव कारणान्मनुः मनोवचनकर्मसम्बद्धेभ्योऽसद्भ्यः कर्मभ्यो मानवं मुहुर्मुहुर्निवारयति।[१२]

---

१. यजु. ३९,४.
२. "यद् वदामि मधुमत् तद् वदामि।"(अथर्व, १२,१,५८)
३. "सर्वमेव शमस्तु नः।" (अथर्व. १९,९,२)
४. "सर्वा आशा मम मित्रं भवन्तु।" (अथर्व. १९,१५,६)
५. "चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥"(गीता. ६,३४)
६. "असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥" (गीता. ६,३५)
७. "योगश्चित्तवृत्तिनिरोधः।"(पा.यो.द. १,१)
८. "परद्रव्येष्वभिधानं मनसाऽनिष्टचिन्तनम्।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम्॥" (मनु. १२,५.)
९. "सर्वमात्मनि संपश्येत् सच्चासच्च समाहितः।
सर्वं ह्यात्मनि संपश्यन् नाधर्मे कुरुते मनः॥"(मनु. १२, ११८.)
१०. "आत्मैव देवताःसर्वाः सर्वमात्मन्यवस्थितम्।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्॥"(मनु. १२,११९.)
११. "अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति॥ (मनु. ५,१०९.)"
१२. "एवं संचिन्त्य मनसा प्रेत्य कर्मफलोदयम्।
मनोवाङ्मूर्तिभिर्नित्यं शुभं कर्म समाचरेत्॥" (मनु. ११,२३९.)

अन्ते चेदमेव कथयितुं शक्यते यद् यावत्पर्यन्तं मानवीयं मनः प्रदूषणरहितं नोपजायते तावत्पर्यन्तं विश्वस्य, राष्ट्रस्य, समाजस्य परिवारस्य वा प्रदूषणं नोपशम्यते। प्राणिनः परितो विद्यमानानां प्राकृतिकतत्त्वानां संशोधनमपां जीवजन्तूनां द्रुमाणां वनानां संरक्षणमपि मनुष्यस्य मनः शुद्ध्यैव सम्भवमस्ति न त्वहर्निशं सप्रयत्नानां वैज्ञानिकानां विविधैरुपायैः। अतः सर्वविधप्रदूषणमुक्तये मनसः संशुद्धिरत्यावश्यकी नान्यथा जनकल्याणस्य विश्वकल्याणस्य वा परिकल्पनापि कर्तुं शक्यते। प्रदूषणरहितमेव मनः— "सर्वजनहिताय-सर्वजनसुखाय"— प्रयतिष्यते।

संस्कृतमेवैकाकिनी भाषा भूतले या प्राणिजातं मनःशुद्ध्यर्थं सम्प्रेरयति सर्वात्मना। अस्माकमाद्यैरार्यैस्त्विदमेव प्रार्थितं भूयोभूयः— "तन्मे मनः शिवसङ्कल्पमस्तु"—। धर्मशास्त्राणां— "मनः सत्येन शुद्ध्यति"— प्रभृतिभिः समुद्घोषैर्विनिश्चेतुं शक्यते यन्मनःशुद्धिस्तु संस्कृतस्याध्ययनाध्यापनाभ्यामेव सम्भाव्यते जगतीह नान्यथा। एषेव भाषायोपकरोत्यात्मनो मनसो जनस्य परिवारस्य राष्ट्रस्य संस्कृतेश्च। वस्तुतः संस्कृतमन्तरेण न समस्यारहितं जीवनं जीविन इति मे दृढा मतिः।

संस्कृतं विश्वसभ्यता संस्कृतिश्च

श्रीसतीशचन्द्रशर्मा

विश्वस्यास्य सभ्यता-सांस्कृतिश्चेति द्वयं संस्कृतानुप्राणितं आसीत्, इदानीं नास्ति, भविष्ये भविष्यतीति मन्ये। परमाणुशस्त्राणां शिखरे स्थितं विश्वमिदं संस्कृतेनैव केवलं सुरक्षितं भवितुमर्हति। "वसुधैव कुटुम्बकम्" विचारोऽयं संस्कृतेन प्रदीयते, "सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः, सर्वे भद्राणि पश्यन्तु, मा कश्चिद्दुःखभाग् भवेत्" इत्यादीनि आशीर्वचांस्यपि अनेनैव प्रसार्यन्ते। विश्वशान्तिसन्देशः, विनम्रतायाः भावः, अहिंसायाः, अचौर्यस्य च भावः, सत्यस्य सन्देशः, ब्रह्मचर्यस्य अपरिग्रहस्य चोद्घोषः संस्कृतेनैव प्राप्यते। अहिंसायाः पाठः हिंसां हन्ति, अचौर्यस्य च पाठः चौर्यं समापयति, अकामश्च कामं विनाशयति। एभिः बलात्कारः, प्राणिवधाः, भ्रष्टाचारः, स्वयमेव समाप्तिं यास्यन्ति-यैः विश्वमिदं अद्य ज्वलत् ज्वालामुखीमुखे समुपविष्टं वर्तते। "ऋषयः दीर्घसन्ध्यत्वात् दीर्घमायुरवाप्नुयुः" सन्देशोऽयं सदाचरणाय प्रेरयति। स्वार्थस्य भावनया, तृष्णया, भ्रातृद्रोहेण, अहंकारेण, कपटाचरणेन महाभारते जीवहानिः, राज्यहानिः, सर्वस्वहानिः चेत्यादीनि कर्माणि परिणामतः सञ्जातानि-अलोभेन भ्रातृप्रेम्णा, कपटराहित्येन, अतृष्णया रामायणे भ्रातृत्वलाभः, राज्यलाभः, सर्वेषां जीवनलाभश्च सञ्जातः— इत्येव वर्तते विश्वकृते सम्यक्सन्देशः संस्कृतस्य, यच्च घोषणामपि करोति यत् "रामादिवत् प्रवर्तितव्यं न रावणादिवत्" इति।

अद्य एकतायाः, अखण्डतायाः, सर्वधर्मसद्भावस्य, सदाचारस्य, शान्तेश्च महती आवश्यकता अनुभूयमाना जगतः समक्षं समुपस्थिता वर्तते, सा केवलं संस्कृतेनैव प्राप्तुं शक्यते-न वर्तते अन्यः कोऽप्युपायः तस्य प्राप्तेः इत्येव विस्तारयामि।

आधुनिकी या सभ्यता वर्तते तया दत्तानि सन्ति केवलं 'इरिटेशन', 'टेंशन', 'फ्रस्ट्रेशन', 'डिप्रेशन' इत्यादीनि रोगाणि येषां दूरीकरणस्योपायः वर्तते केवलं संस्कृतपार्श्वे न त्वन्यत्र कुत्रचित्। एभिः आधिभिः व्याधिभिश्च ग्रसितः जनः व्याकुलः सन् कान्दिशीकः सज्जातः भाग्यमीश्वरं वा उपालभते। तत्र दोषः वर्तते आवश्यकतानां अधिक्यस्य, उन्नतिशिखरे गन्तुं तीव्रगत्या धावमानतायाः, पारस्परिकेर्ष्याद्वेषयोः, चौर्यभावस्य, असत्यस्य, कामाधिकतायाश्च। जनेन धैर्ययुक्तेन, सन्तुष्टिपरकेण, कर्त्तव्यनिष्ठेन, धर्मपरायणेन, विनम्रीभूतेन भाव्यम्-यच्च संदिशति संस्कृतं केवलम्।

संस्कृतं संस्कृतज्ञाः वा न भवन्ति खलु अन्धविश्वासिनः तादृशाः यादृशाः कापुरुषाः स्वकीयस्य कूपस्य क्षारं जलं पिबमानाः भवन्ति-यतोहि तेषां विचारेषु मतवैभिन्न्यम् बहु प्राप्यते-यस्मात् कारणात् एकेन अपरस्य, अपरेण च द्वितीयस्य मतस्य खण्डनं कृतमुपलभ्यते ग्रन्थेषु । ते भवन्ति खलु स्वतन्त्रविचारकाः युक्तिप्रमाणाभ्यां वस्तुसिद्धिकारकाः, स्वकीयस्य सिद्धान्तस्य संस्थापकाः, सदाचरिणो विद्वान्सः अतः संस्कृतं आचरणीयम् । संस्कृतस्य अध्ययनं कर्तव्यं, तस्य बोधः करणीयः, तदनुसारं आचरणीयम् प्रचारश्च तदनुसारं करणीयः— इति सन्देशः वर्तते विश्वसभ्यतायै संस्कृतस्य । संस्कृतम् इत्येतदपि निर्दिशति यत् विधिस्वरूपात्मकः स्वभावः भवेज्जनस्य न तु निषेधस्वरूपात्मकः— यतोहि विधिस्वरूपात्मकेन स्वभावेन आयुर्वृद्धिर्जायते, शान्तिः समधिगता भवति, पारस्परिकं वातावरणञ्च सौहार्दपूर्णं जायते । निषेधस्वरूपात्मकेन स्वभावेन आयुः क्षीणा भवति, रोगाणामुत्पत्तिर्जायते, अशान्तेश्च प्राप्तिभर्वति । इत्येतद् मतं विज्ञानसम्मतमपि वर्तते सुपरीक्षितञ्च वर्तते आधुनिकैः वैज्ञानिकैः । तस्मात् सिद्धं भवतीदं यत् जीवनायौषधं वर्तते संस्कृतम् । सेवनीयञ्च संस्कृतं विपुलं विज्ञैः सर्वैः ।

विश्वस्य सभ्यता संस्कृतिश्चेति द्वयं जनं आचारहीनं, निरकुंशतया विचरणशीलं, कामान्धं, क्रूरं, हिंसकं, आतङ्कवादिनञ्च निर्माति-यस्य परिणामः विनाश एव केवलं भवति न तु लाभः कीदृशोऽपि । अत एव जनाः सन्त्यद्य अशान्ताः, अस्वाभाविकाः, चौराः, हिंसकाः, आचारहीनाश्च । यदा च संस्कृते संदेशः वर्तते यत् 'आचारहीनं न पुनन्ति वेदाः ।' तस्मात् कथं ते भविष्यन्ति स्वतः आचारवन्तः, तपस्तप्ताः, गरिमायुक्ताः, अद्वेषिणः,विनम्राः सुजनाः । तैस्तु संस्कृतमनिवार्यतया सेवनीयम् येन भविष्यति पारमार्थिकं, याथार्थ्ययुक्तम् — उत्थानम् विश्वस्य ।

भारतस्य संस्कृतिः प्राचीनतमा वर्तते । एतद्देश-प्रसूतस्य जनस्य सकाशात् विश्वस्य संस्कृतिः अनुप्राणिता आसीत् । यावत् संस्कृतस्य संस्कृत्या विश्वसभ्यता अनुप्राणिता आसीत् तावत् विश्वमिदम् अखण्डं, शान्तियुक्तम्, अप्रगल्भं, अहिंसकं, सत्येनानुप्राणितं क्षमाशीलञ्च बभूव परन्तु यदाप्रभृति विश्वेन संस्कृतमुपेक्षितं, तस्योपदेशः उपेक्षितः, तत्र श्रद्धा उपेक्षिता तदा प्रभृति विश्वसंस्कृतिः तरलं कृशरमिव जायमाना कान्दिशीकी सञ्जाता । अद्य पुनः वर्त्तते कम्प्यूटरयुगेऽपि सा आवश्यकता यया विश्वसंस्कृतिः सभ्यता चेतिद्वयं संस्कृतस्योपासनां करोतु, तमनुसरतु, कल्याणं चात्मनः करोतु येन विश्वमिदं परमाणुपर्वतशिखरे विराजमानं विवेकयुक्तं भूत्वा स्वकीयं शेषं जीवनं सुरक्षितं कुर्यात् ।

अद्य एका ज्वलन्तसमस्या विश्वस्यास्य समक्षं वर्तते विकरालरूपस्वरूपा, यया क्लान्तः सर्वविधासुविधासम्पन्नोऽपि जनः मस्तके चक्रमिव धृत्वा परिभ्रमति इतस्ततः तस्याः समाधानाय अन्वेष्टुकामः कमप्युपायम् । तस्याः समस्यायाः नामास्ति अशान्तिः । प्रायशः जनाः अशान्ताः सन्ति, अन्वेषयन्ति च शान्तिं सततम्, धावमानाश्च दृश्यन्ते तामनु, परन्तु स्वकीयां छायामिव पश्यन्त अपि तस्या अधिगमे निष्फलाः दृश्यन्ते । अस्मात् कारणादेव तेषां जीवनमपि वैय्यर्थ्यं प्रति गच्छद्दृश्यते । यतो हि तेषां संस्कृतौ सभ्यतायाञ्च नास्ति कोऽप्युपायः एतादृशः, यादृशः वर्तते संस्कृतपार्श्वे । संस्कृतम् उपदिशति यत् दानेन, सहयोगेन, पारस्परिकसाहाय्येन, सद्भावनया च शान्तिमधिगन्तुं शक्नोति जनः अतिशीघ्रम् । शान्तिं क्रेतुं न शक्नोति कोऽपि । एतदतिरिक्तं अपरिग्रहस्य भावनया, सन्तोषस्य वृत्त्या, अभिलाषाणाञ्च न्यूनीकरणभावेन साधिगन्तुं शक्यते । अतः सिध्यति यदेतत्सर्वम् संस्कृतेन प्राप्तुं शक्यते अतः संस्कृतमुपासनीयम् ।

एका अन्या विशेषता वर्तते संस्कृते या जनं सुसंस्कृतं, तपस्तप्तम्, सर्वगुणसम्पन्नञ्च विधातुं शक्नोति । तस्या: विशेषताया: नामास्ति आध्यात्मिकी शक्ति: । केचन जना: शरीरेण कुत्रचिद् गच्छन्ति, मनसा अन्यत्र गच्छन्ति, बुद्ध्या च गच्छन्ति अपरत्र-येन ऐक्यं न जायते तेषां परस्परम् । ऐक्याभावेन च समायान्ति श्रेयांसि बहु विघ्नानि । अस्योपायार्थं निर्दिशति संस्कृतम् आध्यात्मिकीं शक्तिं प्रति गन्तुम् । अध्यात्मं खलु शरीरमनोबुद्धीनां परस्परं याथातथ्येन बहुमूल्यं सन्तुलनं करोति । यच्च अत्यन्तमावश्यकं भवति मानवाय । अतोऽपि संस्कृतस्योपकार: वर्तते विश्वसंस्कृतौ ।

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा: मा गृध: कस्यस्विद्धनम् ।।

मन्त्रमिदमाश्रित्य जन: ज्ञातुं शक्नोति यत् विश्वमिदम् ईशेन व्याप्तमस्ति अत: येन प्रकारेण ईश: अस्मान् रक्षति, ददाति, पालयति च तेनैव प्रकारेण जनेन व्यवहर्त्तव्यम्, भोक्तव्यम्, अवगन्तव्यञ्च । न तेन कस्यापि धनं प्रति कीदृश्यपि अभिलाषा करणीया । अनेन विचारेण जन: सुसंयतो भूत्वा सभ्यतायाश्च सीमायामात्मानं संरक्षन् सुसंस्कृतं जीवनं जीवितुं शक्नोति । न स परकीयं धनं दृष्ट्वा दु:खी भविष्यति यथा अद्य जन: दु:खी वर्तते ।

गर्भाधानादारभ्य अन्त्येष्टिं यावत् सन्ति तावत् षोडश- संस्कारा: संस्कृते, येषामाचरणेन जीवनस्याभ्युदय: जायते । एतादृशी संस्कृति: विश्वेऽन्यत्र दुर्लभा वर्तते । प्रात:कालं शयनादुत्थाय पुन: रात्रौ शयनं प्रति गच्छता पुरुषेण किं किमाचरणीयं सम्पूर्णे दिवसे इत्येतदपि संस्कृतमेव शिक्षयति जनं स्वकीयसंस्कृतिमाध्यमेन येन जन: सुखी भवति । एतत्सर्वं विश्वसंस्कृत्यापि अनुसर्त्तव्यम् येन विश्वेऽस्मिन् रामराज्यवत् सुखिनो जना: भविष्यन्ति । आत्मवत् परदारेषु परद्रव्येषु लोष्ठवत्, आत्मवत् सर्वभूतेषु य: पश्यति स पण्डित: । इत्येष: सिद्धान्त: एड्सनामाख्यं रोगं हरति, छलकपटपूर्वकं क्रियमाणं चौर्यकर्म परिहरति, ईर्ष्याद्वेषपूर्विकां हिंस्रवृत्तिम् अपाकरोति येन विश्वेऽस्मिन् सन्तुलनं भवति । योगसन्दर्शकानि दर्शनानि अपि सन्ति प्रमुखानि अङ्गानि भारतीयसंस्कृते: येषामाचरणद्वारा जन: ऋषितुल्यो भवति, भवति च संयमी ऋषिवत्, आचरति च सम्यक् मुनिवत् । एतादृशानां भारतीयसंस्कृते: संस्कृतस्य च सिद्धान्तानां प्रभाव: विश्वस्य संस्कृतिं सभ्यताञ्च प्रभायितुं अलं वर्तते-अत: अनुसर्त्तव्यास्ते नूनं विश्वेन - इति शम् ।

भारतीयसंस्कृतेर्विकासे संस्कृतभाषायाः योगदानम्

डॉ० अशोकचन्द्रगौडशास्त्री

संस्कृतेः स्वरूपम्, भारतीया संस्कृतिश्च

"संस्कृति" शब्दोऽतीव विस्तृतेऽर्थे प्रयुज्यते । परम्परागतः अनुस्यूतसंस्कारो जायते यया सा संस्कृतिः । संस्क्रियते यया सा संस्कृतिरिति व्युत्पत्त्या 'सम्' इत्युपसर्गपूर्वात् तनादिगणस्थाद् "डुकृञ्" करणे इत्यस्माद्धातोः "स्त्रियां क्तिन्"[१] इति सूत्रेण स्त्रीलिङ्गे भावे चार्थे क्तिन् प्रत्यये, "सम्परिभ्यां [२] करोतौ भूषणे" इति सूत्रेण भूषणेऽर्थे 'सम्' इत्युपसर्गात् 'कृञ्' धातौ परतः सुडागमे "संस्कृति" शब्दो निष्पद्यते । भूषणीभूता सम्यक् चेष्टा यत्र तत् स्थानम्, सांस्कृतिकं स्थानम्, तदस्ति विश्वस्मिन् विराजमानो देशो "भारतम्", तस्यैव गौरवान्विता संस्कृतिः — भारतीया संस्कृतिः, तथा च तन्मूलम् संस्कृतभाषा । उक्तञ्च —

"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथेति ।।"

"संस्कृति" शब्दस्य अर्थाः, परिभाषा च

"संस्कृति"शब्दोऽयं सामान्येन सामाजिकानां शिष्टमनुष्याणां साहित्यिक-सामाजिक-राजनैतिक-आर्थिक-नैतिक-आध्यात्मिक-कलात्मक-प्रभृतीन् विचारान्, तादृशीः प्रवृत्तीश्च बोधयति । शाब्दिकार्थदृष्ट्या "संस्कृति"शब्दोऽयमुत्तमविधिना कृतानि कार्याणि अथवा उत्तमाचरणशीलैः शिष्टैः कृतानि कार्याणि - इत्यर्थप्रकाशकः । किन्तु साम्प्रतम् "संस्कृति"शब्दो व्यापकीभूतः, कस्याऽपि देशस्य, समाजस्य, जातेर्व्यक्तेश्च सकलादर्श-सामाजिकपरम्परा-आध्यात्मिकविचार-जीवननिर्वाहाद्यर्थं विहिताश्चेष्टाः स्वात्मनि निवेशयति ।

"संस्कृति" शब्दस्य कृते "कल्चर" (culture) शब्दः, 'आंग्ल' भाषायां प्रयुज्यते, यः "कल्टिवेशन" (cultivation) शब्दमभिसम्बद्ध्यते । तस्येदमेव तात्पर्यमस्ति यद् भूमिः कृष्टा भविष्यति, कृष्टायां भूमौ बीजवपनं भविष्यति । तेन यत् फलं लप्स्यते, तेन राष्ट्रं पुष्टं भविष्यति । परन्त्वयमर्थः संकुचित एव स्यात् ।

---

१. पाणिनि - अष्टाध्यायी, ३/३९४

२. तदेव, ६/१/१३७

"संस्कृते:" परिभाषाविषये, प्रामुख्यम्भजमानेषु विद्वत्सु, तत्र श्रीजेम्स-हेस्टिंग्स-श्रीएडवर्डबर्नेलटेलर-श्री के.एम.मुंशी - डॉ भगवानदास - श्रीमैथ्यू-आर्नोल्ड-श्रीशिवदत्तज्ञानी - डॉ. बैजनाथपुरी - प्रभृतिभिरनेकैर्मनीषिभि-र्विद्वद्भिर्विचारो विहित: ।

एवं "संस्कृति" (culture) शब्द: किञ्चिद् राष्ट्रम्, ग्रामम्, जनजातिं चाऽभिसम्बद्धुमर्हति । एवमस्माकं भारतीयानामप्येका संस्कृति: या "भारतीया संस्कृति:" प्रोच्यते ।

यद्यपि संस्कृते: समान एव प्रतीयमान: शब्द: "सभ्यता" इति । किन्तु, तथा न । उभावपि भिन्नौ । वस्तुत: "सभ्यता" (civilization) मानवस्य भौतिकीं विचारधारां सूचयति, संस्कृतिश्च आध्यात्मिकस्य मानसिकस्य च क्षेत्रस्य विकासं सङ्केतयति ।

संस्कृतेर्व्यापकपक्षं गृह्णीयात् चेत् "स्वरूपरक्षा" अपि ग्रहीतुं शक्यते । "भिन्नभिन्नरुचिर्हि लोक:" इत्युक्ते: स्वरूपज्ञानस्य विभिन्नत्वम् । तत्र स्थूलशरीररक्षा, तत: पुत्रपत्नीप्रभृतीनां रक्षा, ततश्च समाजे सामाजिक-सुखरक्षा सामान्येन मनुष्येण विधीयते । सामाजिकस्थितौ दया-सत्याऽहिंसा-परोपकारादीनां समावेशस्तत्र जायते ।

मनुष्यस्य सद्विचारा:, सच्चेष्टा:, तेन संस्थापिता: विभिन्ना: परम्पराश्च विशिष्टां संस्कृतिमुत्पादयन्ति, तस्या: विकासं च कुर्वन्ति । अत इदं वक्तुं शक्यते यत्, कस्याऽपि देशस्य, जाते:, समाजस्य वा विशिष्टपुरुषाणां विचारा:, वचनानि, कार्याणि, आचारा:, व्यवहारा:, तैश्च संस्थापिता: परम्परा: तस्य देशस्य संस्कृतेर्निर्माणं कुर्वन्ति ।

"संस्कृति:" इति कथने विभिन्नकालानां संस्कृति: इत्यर्थो नास्ति । यथा-आर्यकालिकी, रामायण-कालिकी, बौद्धकालिकी, मुगलकालिकी, ब्रिटिशकालिकी वा संस्कृति: । भारते तु संस्कृति: आध्यात्मिकज्ञान-युक्तैव गृह्यते, न तु भौतिकत्वप्रधाना ।

मनोबुद्धिचित्ताऽहङ्कारादिभिर्निशिदिनं सम्यगसम्यक् चेष्टा: क्रियन्ते । देहेन्द्रिजन्याश्चेष्टा: "आचारे", अहङ्कारादिभिर्विहिताश्चेष्टाश्च "विचारे" समाविशन्ति । आचारविचाराणां च संस्कार एव संस्कृति: । सदाचार-सद्रीति-सद्वेष-सन्निवास-सदाहारा:, प्रवृत्तीनां परिष्कार:, तासां धर्मानुकूलत्वञ्चैते संस्कृतिकोटौ समाविशन्ति ।

एवं कृतायां विचारणायां संस्कृते: निम्नाङ्कितं लक्षणं पर्यवस्यति—

"कस्याऽपि समाजस्य, देशस्य, राष्ट्रस्य वा मानवानां धर्म-दर्शन-ज्ञान-विज्ञानादिभि: सम्बद्धा: क्रिया-कलापा:, आदर्श:, सभ्यता, संस्कारश्चैतेषां समेषामपि यत् सामञ्जस्यं तदेव "संस्कृति:" । अथवा स्थूलरूपेण संस्काराणां नाम एवं संस्कृति: । "संस्कृतिस्तावत्-दुर्गुण-दुर्व्यसन-पापाचरण-पापभावनाश्च हृदयेभ्यो निस्सार्य मानवं निष्पापं शुभगुणैर्युक्तं च विदधाति ।"

भारतीया संस्कृतिः

भारतीया संस्कृतिः खलु विश्वस्य संस्कृतिषु प्राचीनतमा वर्तते । मोनियरविलियम्स-कीथ-मैकडॉनल-विन्टरनिट्ज़प्रभृतिभिः पाश्चात्यैरपि विद्वद्भिः प्राचीना भारतीया संस्कृतिर्भूयो भूयः प्रशंसिता, तस्या उदात्तत्वं श्रेष्ठत्वं च प्रतिपादितम् ।

संस्कृतौ शिष्टानां प्रवृत्तयः, चेष्टा, परम्पराः, विचाराश्च समाविशान्ति । तत्र भारतीयसंस्कृतौ विशेषरूपेण कर्तव्यबोधको धर्मः, कर्मयोगः, वर्णव्यवस्था, आश्रमव्यवस्था च समाविशन्ति ।

धर्मलक्षणम् —

"धर्म" शब्दोऽत्र कर्तव्यपरकः । किं कर्तव्यम्, किं न कर्तव्यम्, किं सम्यक्, किम् असम्यक् एतादृशं ज्ञानमेव धर्मः । तादृशो धर्मः कीदृश इत्याह —

धृतिः क्षमा देमोऽस्तेयं [१] शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।

अर्थात् धृतिः = धैर्यम्, क्षमा, दमः = कामक्रोधादीनां दमनम्, अस्तेयम् = अचौर्यकरणम्, शौचम् = पूतत्वम्, इन्द्रियनिग्रहः = जितेन्द्रियत्वम्, धीः = बुद्धिः = सदसत्-सम्यगसम्यग्विचारणाशक्तिः, सत्यम्, अक्रोधः = क्रोधाभावः एतानि दश लक्षणानि सन्ति धर्मस्य, तैर्युक्त एव मनुष्यः अनुस्यूतसंस्कारवान् सन् पशुभ्यो विलक्षणो भवितुमर्हति । अपि चोक्तम् महाभारते — [२]

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधम्प्राहुः साक्षाद् धर्मस्य लक्षणम् ।।

अर्थात् श्रुतिः = गुरुमुखाद्ध्ययनम्, स्मृतिः = स्वाध्यायः, सदाचारः, स्वस्य = आत्मनः च प्रियम् अभीष्टमिति चैतानि दश लक्षणानि धर्मस्येति ।

धर्मः सर्वाः प्रजाः धारयति, रक्षति च । तदुक्तम् महाभारते —

धारणाद् धर्ममित्याहुः धर्मो धारयते प्रजाः ।
वस्तुधारणसंयुक्तः धर्म एवेति निश्चयः ।।

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद् धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ।।

वस्तुतस्तु आचारशुद्धिरेव धर्मः । तदुक्तम् मनुना मनुस्मृतौ —

आचारः परमो धर्मः ।

---

१. मनुस्मृतिः

२. 'वेदः स्मृतिः सदाचार' इत्यादिपाठान्तरेण मनुस्मृतावपि दृश्यते

भारतीयसंस्कृतौ पुरुषार्थचतुष्टयम्, सत्यम्, अहिंसा, त्यागः, सेवा चेति प्रमुखाः गुणाः । तत्रापि अध्यात्म-वादः, अनेकतायामेकता चेति प्रामुख्यम्भजमानं वैशिष्ट्यद्वयम् । तस्याः संस्कृतेर्मूलम् संस्कृतभाषा अस्ति, भविष्यति कालेऽप्यस्याः विकासः संस्कृतमन्तरेण नैव सम्भाव्यते ।

भारतीया संस्कृतिः पुनर्जन्मन्यपि विश्वसिति । तथा चोक्तम् —

जातस्य हि ध्रुवं मत्युर्ध्रुवं [१] जन्म मृतस्य च ।

बहूनि मे व्यतीतानि [२] जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥

अपरश्चाऽस्याः संस्कृतेर्गुणः — अनेकतायामेकता । विभिन्नाः प्रदेशाः, विभिन्नाः भाषाः, विभिन्नाः सम्प्रदायाश्चाऽस्माकं देशे वर्तन्ते तथापि भारतीया संस्कृतिः वर्णाश्रम-पुरुषार्थचतुष्टय-षोडशसंस्काराधारिता सत्याऽहिंसादिना लोकाभ्युदयकारिणी आत्मावबोधोन्मुखी दृश्यते ।

यस्मिन् काले सभ्यानां देशानां जनाः सभ्यताहीनाः, संस्कृतिहीनाः दीनाः स्वजीवनयापनं कुर्वन्त आसन्, तस्मिन्नपि काले भारतीया संस्कृतिः चरमोत्कर्षे विराजन्ती, सदाचारान् निर्दिशन्ती, सर्वलोकहितं वदन्ती, धर्ममुप-दिशन्ती, सन्मार्गं च कथयन्ती च शोभते स्म । तथा चोक्तम् मनुना मनुस्मृतौ —

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

'पुरातनीयं संस्कृति' रिति कृत्वैव नास्या गरिमा, किन्तु गुणगणैरेव वर्तते तस्याः महिमा, तैरेव च जायतेऽन्यसंस्कृतिषु स्वतो लघिमा । विचारस्वातन्त्र्यम्, धर्मप्राधान्यम्, आत्मज्ञानम्, सदाचारः, समन्वयः इत्यादयो दुर्लभा विविधा गुणा अत्रैकीभूता दृश्यन्ते । प्राचीनकालेऽसावेव संस्कृतिः सर्वस्मिन् जगति स्वप्रभावं दर्शितवती; यस्याऽवशेषोऽद्यापि चीन-जापान-कम्बोडिया-प्रभृतिषु देशेषु सुस्पष्टमवलोक्यते ।

भारतीयसंस्कृतेः सर्वप्रथमोऽयं गुणो वर्तते, यदियं भगवती भागीरथीव स्वमध्यपतितान् स्वेतरसंस्कृति-नदीनदादीन् स्वात्मरूपेण परिणमन्ती, स्वात्मसात् कुर्वन्ती निर्बाधं प्रवहति ।

भारतीयसंस्कृतेर्मूलम्-वैदिकी संस्कृतिः

भारतीया संस्कृतिः, आर्यसंस्कृतिः, हिन्दूसंस्कृतिश्चैते शब्दाः प्रायेणैकस्मिन्नेवार्थे प्रयुज्यन्ते । अस्माकं देशे यस्याः भारतीयसंस्कृतेः प्रचारोऽस्ति, तस्याः प्रारम्भो वैदिककालादारभ्यते । अतः प्राचीना भारतीया संस्कृतिः, वैदिकी संस्कृतिर्वा भारतीयसंस्कृतेर्मूलम् । तथा च वैदिकसंस्कृतेरारम्भो वैदिककालात् अर्थाद् वेदाविर्भावकालात् अद्यप्रभृति (सं. २०५८ वैक्रमाब्दे) १२,०५,३३,१०२ (द्व्यधिकैकशतोत्तरद्वादशकोटिपञ्चलक्षत्रयस्त्रिंशत्सहस्र-

१. भगवतद्गीता २/२७
२. तदेव,४/५११

मिति) वर्षेभ्य: पूर्वं जात: । वैदिक-भाषावर्णनप्रसङ्गे वैदिककालविषयो व्याख्यास्यते । आर्यैरेव संस्कृतेरस्या: विकासो विहित:, आर्या एव कालान्तरे 'हिन्दू' नाम्ना प्रसिद्धा:, अत: संस्कृतिरियम् 'आर्यसंस्कृति:', 'हिन्दूसंस्कृति:' इति रूपेण च कथ्यते ।

भारतीयसंस्कृते: परम्पराणां मान्यतानाञ्च स्थापना अस्माकं देशस्य प्राचीनै: वैदिकै: आर्यऋषिभिर्मनीषिभिर्ब्राह्मणैश्च विहिता । ता आर्यैस्तु स्वीकृतैव, किन्तु आर्याणामप्राबल्यकारणेन देशस्याऽस्य आर्येतरजातिभिश्चाऽङ्गीकृता । अत्र मानाविधविभिन्नताविरोधरुत्त्वेऽप्यैकताया: भावना निहिता ।

भारतीयसंस्कृतेर्मूलम् वैदिकी संस्कृति: मानवजीवनस्य सर्वाङ्गीणविकासदृष्ट्या महत्त्वपूर्णा वर्तते । प्राचीनतमा सत्यपि वर्तमानयुगे मानवानां कृते दिव्यसन्देशं दातुं समर्थैवैषा संस्कृति: । अस्या: संस्कृतेस्तत्त्वानि देशकालसीमाभिर्न बाध्यन्ते । तत्वान्येतानि सार्वदेशिकानि, सार्वभौमिकानि च । विश्वस्य संस्कृतिषु अस्या: संस्कृतेस्तत्त्वान्यन्वेष्टुं शक्यन्ते । वैदिकसंस्कृतेर्व्यापकं शाश्वतञ्च प्रभावमवाप्य भारतीया संस्कृति: सर्वत्र विजयतेतराम् ।

यूरोपदेशस्य यया संस्कृत्याऽद्य विश्वम्प्रभावितम्, तस्या: मूलेष्वपि भारतीयसंस्कृते: — वैदिकसंस्कृतेश्छाया दृश्यते । यूरोपीयसंस्कृतेर्मूलमन्त्रा अद्य विश्वबन्धुत्वम्, समता, स्वातन्त्र्यभावश्चैतानि तत्त्वानि सर्वाण्यपि वैदिकसंस्कृतेरेवाऽवदानानि । वेदेष्वेतत् सकलभावपरिपूर्णा अनेके मन्त्रास्समाम्नाता: । तथाहि —

"शृण्वन्तु विश्वे [1] अमृतस्य पुत्रा: ।।"

"अभयं मित्रादभयं [2] अमित्रादभयं ज्ञातादभयं पुरो य: ।
अभयं नक्तमभयं दिवा न: सर्वा आशा मम मित्रं भवन्तु ।।"

"मा भ्राता भ्रातरं द्विक्षन् [3] मा स्वसारमुत स्वासा ।
सभ्यञ्च सव्रता भूत्वा वाचं वदत भद्रया ।।"

"पुमान् पुमांसं परिपातु विश्वत: ।।"

अत: आशास्महे वयं यत् कृत्रिमेऽस्मिन् जगति स्वार्थद्वेषवैमनस्यछलछिद्रादीनां जायमाने नग्ने ताण्डवे सिद्धान्तानाम् आदर्शानाञ्च समाप्तिस्थितावापन्नायां वैदिकी संस्कृतिरेव श्रीरामबाणकल्पा श्रेष्ठौषधि: सती चिरन्तनकालाद् विश्वस्य पथप्रदर्शननिरता सती भविष्यति कालेऽपि सर्वेषां पथप्रदर्शनं करिष्यति ।

---

१. ऋग्वेद: १०/१३/१
२. अथर्ववेद: १९ काण्डम्/१७ सूक्तम्/मन्त्र: ६
३. अथर्ववेद:

संस्कृतभाषा द्विविधा-वैदिकी लौकिकी च

संस्कृतभाषा देवानां भाषा। इयं द्विविधा-वैदिकी लौकिकी चेति। आचार्यः पाणिनिः अष्टाध्याय्याम् उभयविधशब्दानामनुशासनमकरोत्। सः संस्कृतस्य कृते "भाषा" [१] शब्दं, वैदिकभाषायाश्च कृते "छन्दस्" [२] शब्दं प्रयुङ्क्ते। कात्यायनः पतञ्जलिश्च तदेवानुसरतः। तथा चोक्तम् महाभाष्ये —

"अथ शब्दानुशासनम्। [३] शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्। केषां शब्दानाम्? लौकिकानां वैदिकानां च। लौकिकास्तावत्-गौरशःपुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति। वैदिका खल्वपि - शन्नो देवीरभिष्टये...। इषेत्वोर्ज्जे त्वा.... इति॥"

अनेन प्रतीयते यद् वेदानां भाषा वैदिकी भाषा, तथा च लोकानां भाषा लौकिकी भाषा। लौकिकी भाषाऽपि द्विविधा-द्विजातिभाषा (संस्कृता), मानुषी, संस्कृता चेति। वैदिकभाषात एव लौकिकसंस्कृतभाषाया उत्पत्तिर्जाता। वेदेषु संस्कृतेर्मूलतत्त्वानि निहितानि, सैवास्ति वैदिकी संस्कृतिः। सैवास्ति मूलम् भारतीयसंस्कृतेः। संस्कृतभाषाऽपि वैदिकीं संस्कृतिमेव वर्द्धापयति, विकासयति, भारतीयसंस्कृतिस्वरूपञ्च प्रापयति।

वैदिकभाषायाः संस्कृतभाषायाश्च कः कालः। इत्यस्मिन् विषये मैक्समूलरप्रभृतयो विद्वांसः वैदिकलौकिकसंस्कृतभाषयोः कलाम् १५०० ईशवीयपूर्वतः ५०० ईशवीयपूर्वं यावत् स्वीकुर्वन्ति। ते पाणिनेः पूर्वं यावद् वैदिकभाषायाः कालः, पाणिनेश्च समयः ५०० ईशवीयवर्षपूर्वमिति स्वीकुर्वन्ति। वैदेशिका विद्वांसो भारतीयं प्राचीनतमं वाङ्मयम् आर्वाचीनं साधयितुं कृतप्रयत्नाः दृश्यन्ते। किन्तु अहो महद् दौर्भाग्यम् यद् डॉ. मङ्गलदेवशास्त्री डॉ. वाचस्पतिगैरोलापण्डितबलदेवोपाध्यायप्रमुखा भारतीया विद्वांसोऽपि तदेव मतं समर्थयन्तो दृश्यन्ते।

भारतीयानां हेमाद्रिसङ्कल्पावलोकनेन भारतीयज्यौतिषशास्त्रानुमोदितो मन्वन्तरसिद्धान्तो ज्ञायते। तदनुसारम् सम्प्रति श्वेतवाराहकल्पः सप्तमं वैवस्वतमन्वन्तरम्, अष्टाविंशतितमः कलियुगः, कलियुगस्य च प्रथमचरणं प्रचलति। अस्माकं मतानुसारम् वैवस्वतमन्वन्तरम् मनुष्योत्पत्तिकालः, यतो हि प्राक्तनेषु षट्सु मन्वन्तरेषु ग्रह-वृक्ष-वनस्पति-जीव-जन्तुप्रभृतीनामुत्पत्त्यनन्तरमेव मनुष्योत्पत्तेः सम्भवात्। प्रतिकल्पं वेदानामाविर्भावो भवति, रचना न भवति। तदनुसारं वैदिकभाषाया अपि आविर्भावो वैवस्वतमन्वन्तरारम्भे जातः।

चतुर्णां युगानाम् एको महायुगो भवति। एकस्मिंश्च महायुगे ४३,२०,००० (त्रिचत्वारिंशल्लक्षाणि विंशतिसहस्राणि) मितानि वर्षाणि भवन्ति। एकसप्ततिमहायुगानामेकं मन्वन्तरं भवति। तच्च चतुर्दशविधं भवति। इतः पूर्वं षड् मन्वन्तराणि व्यतीतानि। अस्मिन् सप्तमे वैवस्वतमन्वन्तरे —

व्यतीताः सप्तविंशतिमिताः महायुगाः = ४३,२०,००० X २७ = ११,६६,४०,०००

(एकादशकोट्यः षट्षष्टिलक्षाणि, चत्वारिंशत्सहस्राणि) मितानि वर्षाणि

---

१. भाषायां सदवश्रुवः॥ पाणिनि - अष्टाध्यायी ३/२/१०८

२. छन्दसि लुङ्लङ्लिटः॥ तदेव, ३/४/६

३. पतञ्जलि-व्याकरणमहाभाष्यम् १/१ आ. १

तथा च —

सत्ययुगस्य व्यतीतानि वर्षाणि = १७,२८,००० मितानि

त्रेतायुगस्य व्यतीतानि वर्षाणि = १२,९६,००० मितानि

द्वापरयुगस्य व्यतीतानि वर्षाणि = ८,६४,००० मितानि

संकलनया ३८,८८,००० मितानि वर्षाणि

सम्प्रति (सं. २०५८ वैक्रमाब्दे) कालियुगस्य ५१०२ (द्व्यधिकैकशतोत्तरपञ्चसहस्राणि) मितानि वर्षाणि व्यतीतानि । अतः —

११,६६,४०,००० + ३८,८८,००० + ५१०० = १२,०५,३३,१०२

इति संकलनया वैवस्वतमन्वन्तरारम्भाद् अद्यावधि (सं. २०५८ वै.) १२,०५,३३,१०२ (द्वादशकोट्यः पञ्च लक्षाणि त्रयस्त्रिंशत् सहस्राणि द्व्यधिकैकशतम्) मितानि वर्षाणि व्यतीतानि । अयमेव वेदानाम् वैदिकभाषाया आरम्भकालः, न तु १५०० ईशवीयपूर्वम् । तथा च वैदिकभाषायाः कालो रामायणकालात् पूर्वं प्रचलति । वैदिकवाङ्मये सामान्यतया चतस्रो वेदसंहिताः, उपवेदाः, ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषदश्च समाविशन्ति ।

अस्माकमार्याणाम्मते वैवस्वतमन्वन्तरमेव मनुष्योत्पत्तिकालः । वैवस्वतमन्वन्तरे मनुष्योत्पत्त्यनन्तरमेव परमेश्वरेण मूलमनुष्याणां हृदयेष्वादिज्ञानम्वेदज्ञानं प्रकाशितम्, तस्य भाषा वैदिकसंस्कृतभाषा । अर्थाद् वैदिक-भाषायाः कालः १२,०५,३३,१०२ (द्व्यधिकैकशतोत्तरत्रयस्त्रिंशत्सहस्रपञ्चलक्षद्वादशकोटि) - मितवर्षपूर्वादारभ्य रामायणकालात् पूर्वं यावत् स्वीकर्तव्यः । वाल्मीकीयरामायण-रचनाकालात् लौकिक-संस्कृतभाषायाः काल आरभ्यते, वाल्मीकीयरामायणे संस्कृतभाषायाः कृते 'मानुषी' 'संस्कृता' इति शब्द प्रयोगदर्शनात् । तथाहि—

अहं त्वतितनुश्चैव [१] वानरश्च विशेषतः ।
वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ॥

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ॥

रामायणकालो लौकिकसंस्कृतभाषायाः कालत्वेन स्वीक्रियते । रामायणकालः त्रेतायुगस्याऽन्तिमं चरणं स्वीकर्तुं शक्यते । तदनुसारम्अद्यप्रभृति (सं. २०५८ वै.) १२,६९,१०२ (द्व्यधिकैकशतोत्तरैकोनसप्ततिसहस्र-द्वादशलक्ष) मितवर्षपूर्वं रामायणकालः । अतो लौकिकसंस्कृतभाषायाः कालस्य प्रारम्भः न्यूनातिन्यूनं १२,६९,१०२ (द्व्यधिकैकशतोत्तरैकोनसप्ततिसहस्रद्वादशलक्ष) मितवर्षेभ्यः पूर्वं स्वीकर्तुं शक्यते ।

१. वाल्मीकीयरामायणम्/सुन्दरकाण्डम्/३०/१७-१९

रामायणकालादारभ्य पाणिनेः पतञ्जलेश्च कालं यावत् संस्कृतभाषा पृथिव्यां देवानाम् (विदुषाम्, भौमदेवानाञ्च) मनुष्याणाञ्च लोकभाषा आसीत् । वाल्मीकीयरामायणम्, महाभारतम्, स्मृतयः, पुराणानि, दर्शनानि च लौकिकसंस्कृतभाषायां सन्ति । वाल्मीकिरामायणावलोकनेव ज्ञायते यत् लौकिकसंस्कृतभाषा मनुष्याणां भाषा आसीत्; परन्तु द्विजानां (विदुषां) भाषा सामान्यमनुष्यभाषापेक्षया क्लिष्टा सुसंस्कृता चाऽऽसीत् । "प्रत्यभिवादे[1] ऽशूद्रे" इति सूत्ररचनाद्वारा पाणिनिना संस्कृतभाषाभाषिषु जनेष्वपि सभ्य (द्विजाति) असभ्य (शूद्र) भाषयोर्भेदो व्याख्यातः ।

संस्कृतसाहित्येष्वेवाऽनेके एतादृशाः संकेता उपलभ्यन्ते येनेदं सम्यक्तया सिद्ध्यति यत् प्राचीनकाले भारतवर्षे महान् जनसमूहो लोकव्यवहारक्षेत्रे संस्कृतभाषाया उपयोगं करोति स्म । वाल्मीकिरामायणस्य सुन्दर-काण्डावलोकनेन ज्ञायते यत् तस्मिन् काले द्विजाः संस्कृतभाषां भाषन्ते स्म । यास्काऽऽचार्येण, पाणिनिना, कात्यायनेन, पतञ्जलिना च लौकिकसंस्कृतभाषा "भाषा" (भाष् भाषणे धातोर्निष्पन्ना) पदेनाऽभिहिता, तथा च सा वैदिकभाषातो भिन्नरूपेण प्रस्तुता । पाणिनेराचार्यस्याऽनेकानि सूत्राणि यदि जीवितभाषारूपेण न पठ्येरन् तर्हि तेषां संगतिर्न भवितुमर्हति । यास्कपाणिनिकात्यायनप्रभृतिभिर्मुनिभिः प्राच्येषु औदीच्येषु च प्रचलितानां वैशिष्ट-च्यानामुल्लेखो विहितः । व्याकरणमहाभाष्ये "अजेर्व्यधञ्पोः" [2] इति सूत्रव्याख्याने भगवता पतञ्जलिना 'सूत' शब्दस्य निरुक्तिविषये वैयाकरणसारथिविवादः प्रदर्शितः । स विवादः संस्कृतभाषायामेव समपद्यत । तथा हि —

"एवं हि कश्चिद्"[3] वैयाकरण आह-कोऽस्य रथस्य प्रवेतेति । सूत आह—अहम् आयुष्मन् अस्य रथस्य प्राजितेति । वैयाकरण आह-अपशब्द इति । सूत आह-प्राप्तिज्ञो देवानां प्रियः, न त्विष्टिज्ञः । इष्यत एतद् रूपम् । वैयाकरण आह-अहो ! नु खलु अनेन दुरुतेन बाध्यामहे इति । सूत आह—न खलु वेञ् सूतः, सुवतेरेव सूतः । यदि सुवतेः कुत्सा प्रयोक्तव्या दुःसूतेनेति वक्तव्यम् ।" इत्यादीनि बहूनि प्रमाणानि सन्ति ।

वैदिकसंस्कृतेर्मूलतत्त्वानि —

वैदिकसंस्कृतेर्मूलतत्त्वानि निम्नाङ्कितानि सन्ति —

अध्यात्मवादः, त्यागभावः, कर्मवादः, आत्मविश्वासः, पुनर्जन्मवादः, विश्वबन्धुत्वभावना, साम्यवादभा-वना, सर्वाङ्गीणोऽभ्युदयः, आशावादश्चेति ।

अध्यात्मवादः— अस्मान् भोगवादादपसार्य सत्यतत्त्वभूतपरमेश्वरविषयकज्ञानम्प्रति प्रेरयति, प्रकृतिप्रेम च शिक्षयति । ईश्वरः सर्वव्यापकः, सर्वेषां नियन्ता इति स्वीकरणमेव आस्तिकता, तेनैवाऽऽत्मिकी उन्नतिः सम्भाव्यते । तथा च वेदेषु समाम्नायते —

---

१. पाणिनि - अष्टाध्यायी ८/२/८३

२. तदेव, २/४/५६

३. पतञ्जलि-व्याकरणमहाभाष्यम् २/४/आ. १/सू. ५६

ईशावास्यमिदं सर्वं[१] यत् किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम्॥

स नो बन्धुर्जनिता[२] स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त॥

हिरण्यगर्भः समवर्तताग्रे[३] भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

त्यागभावः— इति द्वितीयं तत्त्वं कथयति यत् पदार्थानामुपयोगः त्यागभावेन विधेयः— 'मा गृधः कस्यविद् धनम्।' अपि च गीतायाम्—

अथैतदप्यशक्तोऽसि[४] कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥

यो न हृष्यति न द्वेष्टि[५] न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥

कर्मवादः— इति वैदिकः सिद्धान्तो वदति यद् जीवनं कर्ममयम्, अतः कर्म कुर्वन्नेव शतं वर्षाणि जीवेम। तथा च समाम्नायते—

कुर्वन्नेवेह कर्माणि[६] जिजीविषेच्छतं समाः।
एवन्त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥

गीतायामपि कर्मवादः समर्थितः, किन्तु निष्कामकर्मयोगः।

तथा चोक्तम्—

कर्मण्येवाऽधिकारस्ते[७] मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि॥

यज्ञाद् भवति पर्जन्यः[८] यज्ञः कर्मसमुद्भवः॥

१. यजुर्वेदः४०/१ तथा ईशावास्योपनिषद्। १
२. तदेव,३२/१०
३. ऋग्वेदः१०/१२१/१
४. भगवद्गीता,१२/११
५. तदेव,१२/१७
६. यजुर्वेदः,४०/२
७. गीता,२/४७
८. तदेव,३/१४

आत्मविश्वासः— इति तत्त्वमुपदिशति यद् आत्महननं पाप इति । तथा च समाम्नायते यजुर्वेदे —

असूर्या नाम ते लोका [१] अन्धेन तमसावृताः ।
तास्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥

ये जनाः स्वार्थपरायणाः, संकुचितवृत्तयः, भोगपरायणाश्च सन्ति, ते आत्मघातिनः सन्ति । वस्तुतस्तु आत्मघातिनः अन्धकारावृतेषु लोकेषु गत्वा नरकभागिनो भवन्ति, अतः आत्मैव आत्मनः मित्रं शत्रुश्चेत्युक्तम्—

उद्धरेदात्मनाऽऽत्मानं [२] नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥

पुनर्जन्मवादः इति वैदिकसंस्कृतेः पञ्चमं तत्त्वम् । आत्मा नित्यः । सः पुनः पुनः अन्योऽन्यं शरीरं गृह्णाति । तथा च समाम्नायते वेदेषु —

असुनीते पुनरस्मासु चक्षुः [३] प्राणमिह नो धेहि भोगम् ।
ज्योक् पश्येम सूर्य्यमुच्चरन् तमनुमते मृडया नः स्वस्ति ॥

द्वे सृती अशृणवम् [४] पितृणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरञ्च ॥

तथा च गीतायां प्रतिपादितं यद् जीवात्मा नित्यः, सः जीर्णानि शरीराणि विहाय, अन्याऽन्यानि शरीराणि गृह्णाति । अनेकानि जन्मानि भवन्ति, तानि सर्वो न ज्ञातुं शक्नोति । तथा हि —

न जायते म्रियते वा कदाचिन्नाऽयं [५] भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥

वासांसि जीर्णानि यथा विहाय [६] नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥

बहूनि मे व्यतीतानि [७] जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥

---

१. यजुर्वेदः ४०/३
२. भगवद्गीता, ६/५
३. ऋग्वेदः १०/६०/६
४. यजुर्वेदः, १९/४७
५. भगवद्गीता, २/२०
६. तदेव, २/२२
७. तदेव, ४/५

विश्वबन्धुत्वभावना नाम वैदिकसंस्कृतेर्महत्त्वपूर्णं तत्त्वम् संसारात् वैषम्यदूरीकरणार्थमुपदिश्यते । तथा च वेदेषु समाम्नायते —

श‍ृण्वन्तु विश्वे [१] अमृतस्य पुत्रा ॥

अभयं मित्रादभयममित्राद् [२] अभयं ज्ञातादभयं पुरो यः ।
अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु ॥

मित्रस्याऽहं चक्षुषा सर्वाणि [३] भूतानि समीक्षे ।
मित्रस्य चक्षुषा समीक्षामहे ॥

मा भ्राता भ्रातरं द्विक्षन् [४] मा स्वसारमुत स्वसा ।
सम्यञ्च सव्रता भूत्वा वाचं वदत भद्रया ॥

तथा चोक्तम्—

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥

साम्यवादभावना अपि वैदिकसंस्कृतेर्महत्त्वपूर्णं वैशिष्ट्यम् । सर्वेषां कल्याणभावना संस्कृतेरस्याः मूल-मन्त्रः । तथा च समाम्नायते वेदेषु —

सङ्गच्छध्वं संवदध्वं [५] सं वो मनांसि जानताम् ।
देवा भागं यथापूर्वे संजानाना उपासते ॥

पुमान् पुंसं परिपातु विश्वतः ॥

तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ॥

असतो मा सद् गमय, तमसो मा ज्योतिर्गमय ।
मृत्योर्माऽमृतं गमय ॥

---

१. ऋग्वेद १०/१३/१
२. अथर्ववेदः १९/१७
३. यजुर्वेदः ३६/१८
४. अथर्ववेदः
५. ऋग्वेदः,१०/१९१/१

एते मन्त्राः वैदिकसंस्कृतेः पारस्परिकसुमतिं, सद्भावं, मानवकल्याणभावनाम्, औदार्यं च समुद्घोषयन्ति । उक्तञ्च गीतायाम् —

समत्वं योग[१] उच्यते ।

विद्याविनयसम्पन्ने[२] ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

सर्वाङ्गीणोऽभ्युदयः इति वैदिकसंस्कृतौ प्रशस्यते विशेषतः । तथा च समाम्नायते वेदेषु —

विश्वानि देव[३] सवितर्दुरितानि परा सुव ।
यद् भद्रं तन्न आ सुव ॥

स्वस्ति पन्थामनुचरेम[४] सूर्याचन्द्रमसाविव ।
पुनर्ददताघ्नता जानता संगमेमहि ॥

आशावादः वैदिकसंस्कृतेर्महत्त्वपूर्णं तत्त्वम् । भारतीयविचारधारायां विविधदर्शनानामुदयेन संसारः असारः, क्षणभगुरं नश्वरं च जीवनम् प्रभृतीनां नैराश्यपूर्णभावनानां प्रसारः प्रारब्धः, येन मानवीयविकासस्य कृते महती बाधा समुपस्थिता । अस्याम्परिस्थितौ "जीवेम शरदः शतम्" इत्यादिवेदोद्घोषेषु शतं वर्षाणि जीवनस्य कामना, अभ्युदयस्य विचारश्च मानवमात्रमुत्साहयतः । "आशा हि परमं ज्योतिः नैराश्यं परमं तमः" इत्युक्तेः, "चरैवेति चरैवेति" श्रुतेश्च सञ्चरणशीलता अत्यावश्यकी, या मानवानां हृदयेषु आशायाः सञ्चारं कुर्वन्ती आत्मचेतनां चोद्बोधयति ।

एवम् वैदिकसंस्कृतिः मानव कल्याणस्य सन्देशमावहन्ती उद्घोषयति यन्मानवमात्रस्य मुख्यं लक्ष्यम् ब्रह्मप्राप्तिरेव । तथा च वेदेषु समाम्नायते —

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं[५] तमसः परस्तात् ।
तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥

अपि च "ब्रह्म तल्लक्ष्यमुच्यते"इत्याद्युक्तेः । ब्रह्मप्राप्तेश्च साधनं तपः । "तपसा चीयते ब्रह्म" "तपसा किल्बिषं हन्ति" इत्याद्युक्तेश्च ।

१. भगवद्गीता २/४८ ॥५/१८
२. भगवद्गीता २/४८ ॥ ५/१८
३. यजुर्वेदः ३०/३ ॥ तथा ऋग्वेदः ५/८२/५
४. ऋग्वेदः ५/५१/१५
५. यजुर्वेदः ३१/१८

भारतीयसंस्कृतेर्वैशिष्ट्यानि —

भारतीया संस्कृतिर्विभिन्नपरम्पराणां समन्वितं रूपमस्ति, यस्याः प्रारम्भः आर्यऋषिभिर्वैदिकसंस्कृति-रूपेण विहितः। तथाप्यनेकेषां सांस्कृतिकतत्त्वानां समावेशपूर्वकं संस्कृतिरियं प्रगतिपथमारोहति स्म। भारतीया संस्कृतिः सकलपापप्रक्षालिनी पुण्यसलिला भागीरथीव प्रतीयते, यत्र विभिन्नानां नदीनां जलानामपि ग्रहणं विधीयते। अत एव "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" इत्यभ्युक्त्यनुसारं भारतीया संस्कृतिः विश्वस्य सर्वा अपि संस्कृती अतिशेते।

भारतीयसंस्कृतेर्निम्नाङ्कितानि वैशिष्ट्यानि सन्ति —

अध्यात्मभावना, धर्मपरायणता, देवतावादः, अवतारवादः, कर्मफलम्, पुनर्जन्म, यमनियमपालनम्, यज्ञः, पुरुषार्थ- चतुष्टयम्, वर्णाश्रमव्यवस्था, षोडश- संस्काराः, विश्वबन्धुत्वभावना, समन्वयभावना, असाम्प्रदायिकत्व-ञ्चेति।

तत्र अध्यात्मभावना वैदिकसंस्कृतेरध्यात्मवाद एव। धर्मपरायणता इत्यत्र "धर्म" शब्दः कर्तव्यपरक इति पूर्वमेवोक्तम्। 'देव' शब्दः दिव्यगुणैर्युक्तमर्थं व्यनक्ति। परमेश्वरो दिव्यगुणैर्युक्त इति कृत्वा परमेश्वरस्य गुणान् वदन्ति वदेषु परमेश्वरस्य नामानि आश्रित्य पृथक् पृथग् देवानां कल्पना विहिता आर्यैः। सा कल्पनैव देवतावादः। पौराणिकयुगे तस्य विस्तारो जातः। अयमेव वादः अवतारवादरूपे वकसितः। तत्र दिव्यगुणानां परमेश्वरप्रेरणया मानवादिरूपेष्ववतरणम्। समये-समये समाजस्य राष्ट्रस्य च कल्याणम् तादृशेन मानवेन विधीयते। कर्मवादस्तु वैदिककालादेव प्रचलति। तत्र "नाभुक्तं क्षीयते कर्म" इत्युक्त्या कर्मणः फलं प्राप्यते, किन्तु निष्काम- कर्मयोग एवं भगवता श्रीकृष्णेन प्रतिपादितः, प्रशंसितश्च। जीवात्मा शरीरं धारयति, पूर्वं जीर्णं शरीरं त्यक्त्वा पुनः शरीरं प्राप्नोति। तत्र शरीरं मृतं भवति, नैवात्मा। तदेवास्ति पुनर्जन्म। संसरणं संसारः। विभिन्नेषु शरीरेष्वात्मनः संसरणमेव संसारः। पतञ्जलिना योगशास्त्रे "तस्य वाचकः प्रणवः" इत्युक्त्या ब्रह्मविषयं प्रतिपाद्य, ब्रह्मप्राप्तौ यमनियमपालनस्य महत्त्वं विवेचितम्। तत्र सत्याऽहिंसाऽस्तेयब्रह्मचर्याऽपरिग्रहा यमाः। शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः। सामान्यजीवनेऽपि यमनियमपालनस्य महत्त्वमस्ति। वेदेषु, भगवद्गीतादि-ग्रन्थेषु च जगदिदं 'यज्ञ' रूपमेवेत्युक्तम्। तत्र गृहस्थानां कृते पञ्चमहायज्ञानां विधानं विहितम्। राज्ञां कृते अश्वमेधादीनां विधानमस्ति। भारतीयानां हृदयेषु वृद्धान् प्रति श्रद्धा बाहुल्येन दृश्यते। तथा चोक्तम् मनुना —

अभिवादनशीलस्य [1] नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशो बलम्॥

भारतीयदृष्ट्या तु स्थूलसूक्ष्मकारणशरीराणाम् आत्मस्वरूपस्य च रक्षा आवश्यकी। ततः आत्मदर्शनम् संस्कृतेश्चरमसीमा। अत एव चत्वारः पुरुषार्थाः — धर्मार्थकाममोक्षाख्याः संगच्छन्ते। तत्र मोक्ष एव मुख्यः।

---

१. मनुस्मृतिः

भारतीया संस्कृतिरुद्घोषयति यद् — "ऋते ज्ञानान्न मुक्तिः" । वस्तुतस्तु शारीरिकमानसिकाऽऽत्मिकविकासैरेव मनुष्यस्य सम्पूर्णजीवनस्य विकासो भवितुमर्हति ।

तत्र चतुर्विधपुरुषार्थसाधनाय चतुर्णामाश्रमाणां व्यवस्था वर्तते - ब्रह्मचर्य - गृहस्थ - वानप्रस्थ - सन्यासभेदात् । प्रथमे तावद् ब्रह्मचर्याश्रमे विद्याभ्यासः, नानाविधक्लेशसहनशक्तिप्राप्तिश्च समाविशतः । द्वितीये तावद् गृहस्थाश्रमे व्यावहारिकजीवने प्रवेशः, धर्मस्य व्यावहारिकं ज्ञानञ्च समाविशतः । तथा चाऽत्र द्वितीय तृतीय पुरुषार्थयोः अर्थकामरूपयोरूपलब्धिरपि समाविशति । तृतीये चतुर्थे चाऽऽश्रमे सामाजिकोन्नतिं विधाय, काम्यानि कर्माणि परत्यज्य परमपुरुषार्थस्य 'मोक्ष' रूपस्य कृते प्रयासः समाविशति । एवम् भारतीयसंस्कृतौ सर्वदैवाऽऽत्मबोधस्य प्रवृत्तिर्दृश्यते

भारतीयसंस्कृतौ कर्माधारेण चत्वारो वर्णाः कल्पिताः - ब्राह्मण-क्षत्रिय-वैश्य-शूद्रभेदात् । तथा च वेदे समाम्नायते —

ब्राह्मणोऽस्य मुखमासीद्[1] बाहू राजन्यः स्मृतः ।
उरू तदस्य यद् वैश्यः पद्भ्याँ शूद्रो अजायत ॥"

अपि चोक्तम् गीतायाम् —

चातुर्वर्ण्यं मया सृष्टम्[2] गुणकर्मविभागशः ॥

भारतीयसंस्कृतौ मानवानां षोडशविधाः संस्काराः विधीयन्ते । जन्मनः पूर्वं गर्भाधान-पुंसवन-सीमन्तोन्न्यनसंस्काराः । ततः क्रमशः जातकर्म-नामकरण-निष्क्रमण-अन्नप्राशन-चूडाकर्म-कर्णवेध-उपनयन-वेदारम्भ - (कुत्रचिद् विद्यारम्भ) - समावर्तन-विवाह-वानप्रस्थ-सन्यासाऽन्त्येष्टि संस्काराः विधीयन्ते । तथा च भारतीयेषु विश्व- कल्याणस्योदात्ता भावना, समन्वयभावना च दृश्यते इति पूर्वमेवोक्तम् । समन्वयभावना, साम्यवाद एव असाम्प्रदायिकत्वम् तत्र सर्वेषां कृते पूजाविचारादिस्वातन्त्र्यं भवति ।

अत्र देशे अनेका जातयः, अनेके प्रदेशाः, अनेका भाषाः; किन्तु समन्वयभावनायाः प्राबल्येन, देशेऽस्मिन् सांस्कृतिकी, धार्मिकी च एकता वर्तते । अयमस्ति- अनेकतायामेकतेति । अस्माकं देशे सतीष्वपि विविधासु भाषासु सर्वाणि धार्मिककृत्यानि संस्कृतभाषायामेव विधीयन्ते आर्यैः । आर्येतरा जना अप्यत्र निर्भया भूत्वा स्वस्वकृत्यानि सम्पादयन्ति । कुत्रचिदपि साम्प्रदायिकतायाः संकुचिता भावना नाऽस्ति ।

भारतीयसंस्कृतेर्विकासः संस्कृतभाषा च —

भारतीयसंस्कृतेः सर्वविधविकासस्य विषये कृतायां विचारणायामिदमवगम्यते यत् संस्कृतितत्त्वैः परिपूर्णं समग्रमपि प्राचीनं साहित्यं संस्कृतभाषायामेवोपलभ्यते । चत्वारो वेदाः, उपवेदाः, ब्राह्मणग्रन्थाः, आरण्यकानि, उपनिषदः, अस्माकं गौरवभूतानि षड्दर्शनानि, आयुर्वेदादिशास्त्राणां ग्रन्थाश्चैते सर्वेऽपि संस्कृतभाषायामेव सन्ति ।

१. ऋग्वेदः, पुरुषसूक्तम्, मं. ११
२. भगवद्गीता ४/१३

वेदेषु मनुष्याणां कर्तव्याकर्तव्ययोर्निर्धारणम्, संस्कृतितत्त्वानां विवेचनं च वर्तते इति पूर्वमेव व्याख्यातम् । ततश्च लौकिकं संस्कृतवाङ्मयम् - वाल्मीकीयरामायणम्, महाभारतम्, पुराणानि, स्मृतयः, महाकाव्यानि नाटकानि चैतत् सर्वं संस्कृतितत्त्वैः परिपूर्णं विद्यते ।

अतः स्वीयसमृद्धवाङ्मयद्वारेण संस्कृतभाषा अनेकतायामेकत्वं सम्पादयन्ती भारतीयां संस्कृतिं सम्यग् विकासयितुं संवर्द्धयितुं च समर्थेति मम द्रढीयान् विश्वासः ।

विश्वस्मिन् अद्य सर्वत्र विविधाः विषमताः दृश्यन्ते । तत्र संस्कृतभाषा "शृण्वन्तु विश्वे अमृतस्य पुत्राः" "मा भ्राता भ्रातरं द्विक्षन्" इत्यादिभिर्मन्त्रैः "सर्वे भवन्तु सुखिनः" इत्यादिभिः सूक्तिभिर्वैषम्यं दूरीकृत्योद्घोषयति यत्—

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥

अतो भारतीयसंस्कृतिं सम्यक् प्रवर्द्धापयन्ती, विकासयन्ती, तथा च स्वीयाऽजरत्वाऽमरत्वसन्देशं च प्रसारयन्ती सुरभारती संस्कृतभाषा यदा विश्वस्मिन् गौरवान्विता भविष्यति तदा भारतीयं जनमानसम् श्रीमोक्ष-मूलरभट्टस्य पद्यमिदमुच्चस्वरेण गास्यति —

यावद् भारवतर्षं स्याद् यावद् विन्ध्यहिमाचलौ ।
यावद् गङ्गा च शोणा च तावदेव हि संस्कृतम् ॥

विश्वसभ्यतायां संस्कृतौ च संस्कृतस्य योगदानम्
संस्कृतं विश्व संस्कृतिश्च

डा. केवलकृष्णशास्त्री

संस्कृतभाषा न तु भारतस्यैव अपितु विश्वस्य प्राचीनतमा भाषा इति सर्वे जानन्ति । अस्यां भाषायां न केवलं भारतस्य अपितु विश्वस्य सभ्यता संस्कृतिः सन्निहिता वर्तते ।

चत्वारो वेदा अस्यां भाषायां प्राचीनतमा ग्रन्थाः सन्ति । वेदेषु ज्ञान-विज्ञानस्य प्रायः सर्वे विषयाः समाहिताः दृश्यन्ते । न केवलं भारतस्य अपितु विश्वस्य-अनेकानां भाषाणां प्रादुर्भावः संस्कृतादभूत् । अस्माकम् ऋग्वेदो विश्वस्य प्राचीनतमं ग्रन्थरत्नमस्ति इति न तु केवलं भारतीया अपितु मैक्समूलरकीथप्रभृतयोः विद्वांसः सर्वतोभावेन स्वीचक्रुः । संस्कृतभाषा आर्यभाषाणां जननी द्रविडभाषाणां पोषयित्री च इति-अभिधीयते । विलियमजोन्स महोदयः कथयति स्म—

"संस्कृतभाषा यूनानीभाषाया अपेक्षया अधिका समृद्धाः लैटिनभाषायाश्चाधिका विस्तृतेति, उभयोः भाषायोरपेक्षया सुसंस्कृता परिष्कृता चास्ति ।"

विश्वस्य विभिन्नप्रदेशेभ्यः ज्ञानपिपासवो जना अत्र भारते प्रतिभाशालिनां विदुषां सकाशं संस्कृतस्य-अध्ययनार्थमागच्छन्ति स्म ।

मनुना उक्तम्—

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।

प्रसिद्धेन कविदण्डिना स्वकीये "काव्यादर्श" नाम्नि ग्रन्थे स्फुटतया लिखितम्— "संस्कृतं नाम दैवी वागन्वख्याता महर्षिभिः- इति ।"

दण्डिमहोदयेन पुनरुक्तम्—

"इदमन्धतमः कृत्स्नं जायेत भवुनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।"

यदि शब्दज्योतिः विश्वे न स्यात् तर्हिः सम्पूर्णं विश्वम्-अज्ञानमयं भवेत् । तस्मात् कविना साधूक्तं शब्दज्योतिः विश्वमिदं दीप्यते' इति ।

बृहदारण्यकोपनिषदि अपि-दृश्यते—

"वाग्वै सम्राट् परमं ब्रह्म" अर्थात् 'वाक्' एव विश्वस्य सम्राट् परं ब्रह्म वरीवर्त्ति ।

जार्जफोरेस्टरमहोदयेन अनूदितस्य अभिज्ञानशाकुन्तलमिति नाटकस्यावलोकनेन गेटेमहोदयोऽकथयत् यत्—

"विश्वस्य नाट्यसाहित्ये इयं (अभिज्ञानशाकुन्तलम्) अनुपमा रचना विद्यते ।"

जर्मनदेशीयो विद्वान् सृपन्हायरमहोदयः उपनिषत्साहित्यस्याध्ययनं विस्तरेणाकार्षीत् । स अतीव प्रभावितः विस्मितश्चासीत् । स स्वकीयविचारान् उद्घाटयति स्म—

"उपनिषदामध्ययनं मह्यं वास्तविकशान्तिकारणम् अभवत् । इमा मृत्यूपरान्तमपि मह्यं शान्तिदायिका भविष्यन्ति ।"

अस्यामेव भाषायां वेदाः वेदाङ्गानि (शिक्षा-कल्प-व्याकरण-निरुक्त, छन्दस्-ज्योतिषम्), अष्टादशपुराणानि, उपपुराणानि, स्मृतिग्रन्थाः षड्दर्शनग्रन्थाः, रामायण-महाभारत, साहित्यशास्त्रम् विज्ञानम्, इतिहासः, कोशः, राजनीतिः, तन्त्रसाहित्यम्, आयुर्वेदः, चतुःषष्टिकला इत्यादयः प्रायः सर्वे विषयाः समुपलभ्यन्ते ।

महाभारते -उक्तम्—

"यद् इह नास्ति तत् कुत्रापि नास्ति"

अनेन एव कारणेन पाश्चात्याः विद्वांसोऽपि संस्कृतस्य अध्ययनं कृत्वा स्वकीयं जीवनं धन्यं मन्यन्ते । आङ्ग्लविद्वांसः काशीं गत्वा तत्र पण्डितानां विदुषां च साहाय्येन धर्मशास्त्राणामनुवादम् आङ्गलभाषायां चक्रुः । ते अनूदितग्रन्थान् दृष्ट्वा चकिता आसन् ।

श्रीमद्भगवद्गीताया अनुवादो विश्वस्य प्रायः सर्वासु भाषासु समुपलभ्यते । अस्मिन् ग्रन्थरत्ने जीवनदर्शनं सन्निहितं दृश्यते । सन्तुलित-व्यक्तित्व-विकासाय पुरुषार्थचतुष्टयप्राप्त्यै मार्गः प्रदर्शितः । गीतादर्शनस्य मूलं वेदेषु-उपनिषत्सु समुपलभ्यते ।

सन् १७८५ ई. चार्ल्सविल्किन्समहोदयः गीताया हितोपदेशस्य च अनुवादं चकार ।

१७८३ ई. सरविलियमजोन्समहोदयः संस्कृतस्य ज्ञानं प्राप्तवान् । तदा स "रायल एशियाटिक सोसायटी आफ बंगाल" नाम्न्याः संस्थायाः स्थापनामकरोत् ।

अस्माकं हितोपदेशपञ्चतन्त्र इत्यादिषु ग्रन्थेषु शिष्टाचार-सदाचार-राजनीति-लोकनीति इत्यादीनां विषयाणां प्रतिपादनं कथामाध्यमेन समुपलभ्यते । फारसदेशस्य सम्राटशेरखां महोदयस्य आदेशेन पञ्चतन्त्रस्य अनुवाद शाही हकीम बुर्जाए महोदयेन 'पहलवी' भाषायां चकार । 'पहलवी' भाषायाः सीरिया भाषायां ५७० ई. चकार । यूनानीभाषायां ११८० ई., फारसीभाषायां ११३० ई., हिब्रू भाषायां १२५० ई. लैटिनभाषायां १२७० ई., जर्मनभाषायां १४८१ ई., इतालबी भाषायां १५५२ ई. आंग्लभाषायां १५७० ई. अभूत् । अस्मिन् ग्रन्थे मनोवैज्ञानिकक्रमेण विवेकशून्यान् नीतिज्ञान् आचार्यविष्णुशर्ममहोदयः कृतवान् ।

पण्डितजवाहरलालनेहरुमहोदय उदघोषयत् यत्

"ये जना भारतीयसंस्कृतिनिष्ठा रामायण-महाभारतादीनि ग्रन्थरत्नानि न पठिष्यन्ति ते भारतीयानां भारतस्य वा विषये किमपि ज्ञातुं न शक्नुवन्ति।"

नेहरुः कथयति—

"यदि कश्चित् मां पृच्छेद्भारतस्य विस्तृता
सम्पत्तिः का अस्ति ? अहं निःसङ्कोचं कथयिष्यामि

'संस्कृतभाषा तस्याः साहित्यं च तथा च
तस्यां भाषायामन्तर्निहितम् अनुपमज्ञानम् च..."

श्री वी.वी. गिरिमहोदयः २७.मई, १९६६ ई. कर्नाटकराज्यस्य षट्षष्ट्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे बेंगलूर नगरे स्वकीये भाषणे स्वकीयम् उदगारान् प्रकटयन् अकथयत्—

"संस्कृतं भारतस्य सर्वोत्तमो निधिरस्ति एवञ्चसभ्यतायाः प्रतीकमस्ति। इयं केवलं भाषा नास्ति। अतः इदं-आवश्यकमस्ति यद् भारतदेशस्य सर्वेषु विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च संस्कृतशिक्षणस्य प्रगतिर्भवेदिति।"

आधुनिककाले संस्कृतस्य अध्ययनम् अध्यापनं, शोधकार्यं प्रकाशनञ्च जर्मन्देशस्य प्रायः बहुषु विश्वविद्यालयेषु प्रचलति। अन्येषु यूरोप, अमेरिका, जापान, चीन, थाइलैंड, रूस, फ्रान्स—आदीनामन्येषां देशानां विश्वविद्यालयेष्वपि संस्कृतस्य अध्ययनमध्यापनं च प्रचलति।

कैम्ब्राइज, आइन्सफोर्ड विश्वविद्यालयेष्वपि संस्कृतस्य स्वतन्त्रविषयत्वेन अध्यापनं भवति तथा अनुसन्धानकार्यं च प्रचलति।

वेदानां द्वौ भागौ स्तः— कर्मकाण्डं ज्ञानकाण्डञ्च। कर्मकाण्डे—कर्मणो महत्त्वं प्रतिपाद्यते यज्ञ-होम-अनुष्ठान कर्म स्वर्ग-प्राप्त्यर्थकर्म इत्यादिरीत्या। वेदानाम् अन्तः भागः वेदान्तनाम्ना अधिगम्यते। अयं भाग उपनिषदपि कथ्यते। अस्यां पराविद्या अपराविद्या अपि विवेचिता वर्तते—

"द्वे विद्ये वेदितव्ये तत्र परा अपरा च "

शाहजहांनृपस्य पुत्रः दाराशिकोहमहोदयः संस्कृतस्य ज्ञाता आसीत्। स श्रीमद्भगवद्गीताया उपनिषदाम्-अनुवादं फारसीभाषायां चकार। श्रीमैक्समूलरमहोदयः संस्कृतस्य अद्वितीयः पण्डित असीत्। स चतुर्णां वेदानां संकलनं कृत्वा तेषामुपरि भाष्यमपि कृतवान्।

अन्येभ्यः = स्रोतोभ्यः प्राप्तं साहित्यं काल्पनिकं भवितुं शक्यते परं संस्कृतसाहित्यं तथ्योपरि आधारितम् अस्ति। अस्माकम् आयुर्वेदस्य ज्ञानं प्रति पाश्चात्यचिकित्सका आकृष्टा अभूवन्। ते अस्माकं देशस्य आयुर्वेदचिकित्सकान् आद्रियन्ते, यतो हि ते अस्या पद्धत्याः प्रभाविता दृश्यन्ते।

योगस्य प्रचार: प्रसारश्च सर्वत्र भूमण्डले दृश्यते एव । प्राय: सर्वत्र अमेरिका, रूस, यूरोपप्रभृतिषु देशेषु योग-विज्ञान प्रशिक्षणस्य अनेका: संस्था: प्रादुर्भूता: । यूरोपस्य देशेषु पञ्चशतानि योगे-आयुर्वेदस्य संस्थानानि विराजन्ते ।

श्रीरामकृष्णपरमहंसस्य शिष्य: श्रीविवेकानन्दो भारतीयसंस्कृते: विश्वे ध्वजां स्थापितवान् । परम-हंसयोगानन्दमहोदयेन अमेरिकादेशस्य सेल्फ रिलाईयेशन फैलोशिप योगकेन्द्रस्य स्थापना केलेफोर्निया नगरेऽकारि । तत्र योगस्य क्रियायोगस्य, उपनिषदां, गीताया: दर्शनेन अमेरिकादेशवास्तव्या जना: परमप्रभाविता आसन् । अनेन सर्वधर्मसमन्वयभावनाया विकासोऽभवत् । सर्वेषु धर्मेषु मूलभूता: सिद्धान्ता: समाना: सन्ति परं तेषां क्रियान्वयनं परिस्थित्यनुसारं विभिन्नं दृश्यते । सर्वे धर्मा: मानवानां कल्याणाय, शान्त्यार्थं स्वप्रत्यभिज्ञायां सहायका: सन्ति ।

संस्कृतिर्नाम— तत्तद्देशीय जनानाम् आचारव्यवहारानुष्ठानादिकम् यच्च मनुष्य: जन्मनोमरणपर्यन्तम् आचरति तत् । 'संस्कृति' आंग्लभाषायां कल्चर (Culture) इत्यभिधीयते—

"A Culture is a component of all the things which we eat, do and perform from birth to death."

भारतीयसंस्कृते : परम्परा अक्षुण्णा आसीत् । अत्र पितरौ गुरुश्च देवसमा: पूज्यन्ते स्म—

मातृदेवो भव
पितृदेवो भव
आचार्यदेवो भव

अस्या उल्लेख: तैत्तिरीयोपनिषदि शिक्षावल्यां दृश्यते ।

अथितिदेवो भव ।

अतिथिरपि देवतुल्यं गौरवं विन्दति स्म ।

प्राचीनकाले वर्णाश्रमव्यवस्था आसीत् । गीतायामुक्तम्—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागश: ।

पुरुषार्थचतुष्टयं (धर्मार्थकाममोक्षा:) सामाजिककुशलताया: शुचितायाश्च अनुपममुदाहरणमस्ति ।

उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत
क्षुरस्य धारणा महता दुरत्यया ।
दुर्गमा पन्था: तत्र कवयो वदन्ति ।।

पुरुषार्थस्य अस्माकं संस्कृते: स्वकीयं महत्त्वम् आसीत् ।

भारते राष्ट्रियैकता संस्कृते अस्ति। समस्तभारते बाह्यभेदेषु सत्स्वपि संस्कृतिः एका अस्ति। संस्कृतेः इयम् एकता संस्कृतभाषाद्वारा विज्ञायते—

ईशावास्योपनिषदि निर्दिशति—

ईशावास्यमिदं सर्वं यत् किञ्चित् जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम्॥

अस्माकं राष्ट्रियचिह्नम् अशोकचक्रमस्ति। तस्योपरि लिखितमस्ति— 'सत्यमेव जयते'। अस्माकं प्राचीनग्रन्थाः पाण्डुलिपयः न केलवं भारते अपितु सर्वत्र विश्वे— चीन् थाईलैंड, जर्मन आदिषु विद्यमानेषु पुस्तकागारेषु समुपलभ्यन्ते। ते लोकाः एषां महत्त्वं परिचिन्वन्ति। अतः तत्तद्देशेषु ते सुरक्षिताः सन्ति।

अन्ताराष्ट्रियदृष्ट्या अपि संस्कृतस्य वैशिष्ट्यमस्ति। राष्ट्रियैकताया आधारशिला संस्कृतमस्ति। अस्माकं देशस्य प्रथमप्रधानमन्त्रिणा पण्डितजवाहरलालनेहरुमहोदयेन पञ्चशीलाः सिद्धान्ताः निर्मिताः (भ्रातृत्वं, सह-अस्तित्वं, परस्परसीमायाः सम्मानः, संस्कृतेः आदान-प्रदानं, सहबन्धुत्वम्।) इमे सिद्धान्ताः शान्ति-सन्देशवाहका आसन् भारतस्य विदेशनीतिः— "सर्वैः सह शान्तिप्रियेण सुसम्बन्धेन च प्रवर्तते।"

अस्माकं विद्यालयेषु महाविद्यालयेषु सर्वप्रथमं परमसत्तां नत्वा कार्यस्य प्रारम्भो भवति स्म—

द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्ति र्विश्वे देवाः शान्ति ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥

यतो यतः समीहसे ततो नो अभयं कुरु।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः सुशान्तिर्भवतु।

उपर्युक्त मन्त्रेषु विश्वस्य शान्त्यर्थं निर्देशो विहितः न केवलं भारतवासिनां कृते।

शतपथब्राह्मणे वर्णनमस्ति—

ॐ असतो मा सद् गमय,
तमसो मा ज्योतिर्गमय।
मृत्यो र्मामृतं गमय॥

अर्थात् असत्याद् मां सत्यं प्रति नय, अन्धकारात् प्रकाशं प्रति नय, मृत्योरमृतं गमय।

मनुनाप्युक्तम्—

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्॥

अर्थात् प्रतिदिनमुत्थाय वृद्धानां शुश्रूषाकार्ये संलग्नस्य मनुष्यस्य आयुः विद्या यशो बलञ्च वर्धन्ते।

अस्माकं संस्कृतिः Live and let live "जीवामः जीवयिष्यामः" (जियो और जीनो दो)

श्रीमद्भगवद्गीतायामुक्तं—

उद्धरेदात्मानात्मानं नात्मानमवसादयेत्।
आत्मा हि आत्मनो बन्धुः आत्मा हि आत्मनो रिपुः ॥

ऋग्वेदे उक्तम्— **'विश्वमेक-नीडम्'**

यथा चोक्तम्—

उदारचरितानां तु वसुधैव कुटुम्बकम् इत्यादयः आदर्शाः प्राचीनकालादेव प्रचलन्ति ।

सत्यं ब्रूयात् प्रियं ब्रूयात्
न ब्रुयात् सत्यम् अप्रियम् ।।

उपनिषत्सूक्तम्— **'सत्यमेव जयते नानृतम्'**

इत्यादयः उदात्ताः विचाराः संस्कृतग्रन्थरत्नेषु समुपलभ्यन्ते । ये अस्माकं अन्ताराष्ट्रियभावनायाः संस्कृतेश्च महत्त्वं द्योतयन्ति ।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।।

अनेन ज्ञायते यत् इयं भावना न केवलं भारतीयानां कृते आसीत् अपितु एकलविश्वस्य कल्याणाय सुख-समृद्ध्यर्थम् अभवत् । अन्ताराष्ट्रियक्षेत्रे अस्माकम् उदात्ताः प्राचीनादर्शाः कार्यान्विताः भवेयुः । एते उदात्ताः विचारा अन्ताराष्ट्रियसहयोगाय पारस्परिकशान्त्यर्थं संस्कृतेः समिष्टगततत्त्वानां आदानप्रदानार्थं महोपकारका भवन्ति ।

अस्माकं संस्कृते 'धर्म' शब्दस्य अर्थः "धारयते इति धर्मः अर्थाद्यः प्राणिमात्रस्य रक्षां करोति । भारतीयसंस्कृतेः 'धर्मो रक्षति रक्षितः' । मनुस्मृतिग्रन्थो धर्मस्य विषये कथयति— 'वेदोऽखिलो धर्ममूलम्' इति ।

आहार-निद्रा-भय मैथुनञ्च
सामान्यमेतत् पशुभिः नराणाम् ।
धर्मो हि लोकेऽधिको विशेषः
धर्मेण हीनाः पशुभिः समानाः ।।

धर्मेण हि मानवस्य आचारव्यवहाराणां नियमीकरणं क्रियते ।

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।

उपर्युक्तधर्मस्य दशलक्षणानि सदाचारस्य उत्तमचरित्रस्य द्योतकानि सन्ति । अत्र कर्तव्यधर्मयोर्मध्ये भेदः न दृश्यते ।

'Work is worship' स्वकर्तव्यस्य सम्यग्रूपेण वाहनं धर्मः अस्ति ।

अस्माकं देशे गौतमबुद्धसदृशानां युगपुरुषाणम् अवतरणमभूद् । ये सकलमानवानां कल्याणं परिकल्पयन्तः स्वकीयान् उपदेशान् संस्कृते लोकभाषायाञ्चाकार्षुः ।

संगच्छध्वं संवदध्वं संवो मनांसि जानताम् ।
देवा भागं यथापूर्वे संजनानामुपासते ॥

'अहिंसा परमो धर्मः' अस्य धर्मस्य मुख्य उद्घोष आसीत् । इदमेव कारणं यत् बौद्धधर्मो न तु भारते अपितु चीन, जापान, थाइलैड, लंका आदिषु बहुषु देशेषु प्रचलितोऽभूत् ।

प्रतिवर्षं बहवो जनाः भारते बौद्धदर्शनस्य तीर्थानां (बोधगया, सारनाथ, कालिंग उदयगिरि आदि स्थलानां) दर्शनार्थम् आत्मलाभाय च गच्छन्ति ।

दार्शनिकदृष्ट्या अपि संस्कृतस्य महत्त्वं सर्वोत्कृष्टमस्ति । पाश्चात्त्यदार्शनिका अद्य आध्यत्मिकतां प्रति उन्मुखा दृश्यन्ते, परञ्च अस्माकं देशस्य ऋषयः सहस्रेभ्यः वर्षेभ्यः पूर्वमेव अध्यात्मिकं ज्ञानं प्राप्तवन्तः । 'दर्शन' शब्दस्य व्युत्पत्तिः 'दृश्यते अनेन इति दर्शनम्' अर्थात् यया विद्यया आत्मज्ञानम् आत्मबोधो वा भवितुं शक्यते तत् 'दर्शनम्' । अस्माकं भारतदेशस्य षड्दर्शनम्— न्यायवैशेषिकौ, सांख्ययोगौ, वेदान्तः मीमांसा च— भारतस्य गौरवस्य परिचायकम् अस्ति । एतदतिरिक्तं काश्मीरशैवदर्शनम्, दाक्षिणात्य शैवदर्शनम्, तन्त्रसाहित्यं, जैनदर्शनम् बौद्धदर्शनम् इत्यादयः बहवः दार्शनिकग्रन्थाः संस्कृतसाहित्ये समुपलभ्यन्ते । आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यश्च— अस्माकं दर्शनेषु आत्मलाभाय इमानि सोपानानि निर्धारितानि आसन् ।

उपर्युक्तेन विवेचनेन इति विज्ञायते यत् विश्वसभ्यतायां संस्कृतौ च संस्कृतस्य योगदानं पदे पदे समुपलभ्यते । विश्वस्य बह्वीनां भाषाणां सम्यक् ज्ञानाय, त्रिविधतापाद् विमुक्त्यै, भारतीयदर्शनानां ज्ञानाय, सामाजिककुशलतया पारिवारिकसुख-समृद्ध्यर्थं, शिक्षायाः प्रमुखमुद्देश्यम् पुरुषार्थचतुष्टयप्राप्त्यर्थम्, राष्ट्रिय-अन्ताराष्ट्रियभावनाया विकासार्थं, भारतीयज्ञानविज्ञानस्य समुन्नतये, संस्कृतेः पुष्टानां तत्त्वानां विश्वशान्तये सुख-समृद्ध्यर्थं, शान्त्यर्थं, योग-आयुर्वेद-चतुः षष्टि-कलानां सम्यगवबोधनार्थं धर्मे निगूढतत्त्वानां ज्ञानार्थं मानवस्य सर्वांगीणविकासाय संस्कृतस्य ज्ञानम् अनिवार्यं भवेत् । अतः विश्वसभ्यतायां संस्कृतेः संस्कृतस्य अद्वितीयं योगदानम् अस्ति ।

कृष्णोदयमहाकाव्ये आयुर्वेदः

डॉ. कृष्णदेवशास्त्री

आयुरस्मिन् विद्यते, आयुरनेन विद्यते, आयुर्विन्दतीति वा आयुर्वेदः ऋग्वेदस्योपवेदतया विश्रुतः ।[१] कश्यपसंहितायामृग्वेदस्य पञ्चमवेदत्वं निरूपितम् — ऋग्वेदयजुर्वेदसामार्थवेदेभ्यः पञ्चमः आयुर्वेदः । यद्यपि नाट्यशास्त्रे-'नाट्यवेदस्तु पञ्चमः'[२] इति कथयता नाट्याचार्यभरतेन नाट्यवेदस्य पञ्चमवेदत्वं स्वीकृतम् । महाभारते इतिहासं पञ्चमवेदेति वर्णितम् । अनेनायुर्वेदस्यापि पञ्चमवेदत्वं भवितुमर्हति ।

ऋग्वेदे आयुर्वेदसम्बद्धविषया उद्धृताः । 'शतं ते राजन् भिषजः सहस्रमुर्वी गभीरा सुमतिस्तेऽस्तु ।'[३] अन्यत्रापि तत्र भषज भिषक् प्रभृतयः[४] शब्दा रोगोपशमनोपाया विवेचिताः । अथर्ववेदेऽपि आयुर्वेदस्य प्रभूतानि तत्त्वानि सन्ति । चरकसंहितायां वर्णितमस्ति, अथर्ववेदे भक्तिरादेरया वेदो ह्याथर्वणो दानस्वस्त्ययनवलिमंगल-मनियमप्रायश्चितोपवासमंत्रादिपरिग्रहाच्चिकित्सां प्राह ।[५] आयुर्वेदस्य मूलमस्ति दीर्घायुष्यकरणं नाम्नाऽपि विचारस्यास्य समर्थनं प्राप्यते । उपसूर्यः मत्यैभ्यः अमृतं रश्मिभिरातनोतीति वैदिकी मान्यता विद्यते । वेदस्य गायत्री सूर्यमेव गायति । स्वास्थ्यसम्वर्धनं स्वास्थ्यरक्षणञ्चापि तस्य प्रयोजनं विद्यते ।

आयुर्वेदस्याष्टाङ्गानि विश्रुतानि सन्ति । तेषु शल्यशालाक्यकायचिकित्सा भूतविद्या कौमारभृत्य अगद-तन्त्ररसायनतन्त्रबाजीकरणादीनि प्रसिद्धानि ।

साहित्यं सामाजिकवृत्तस्य प्रतिबिम्बितं रूपं विद्यते सामाजिकवृत्तस्य प्रतिविम्बनं साहित्येऽपि भवतीति कथनं समुचितमस्ति । समाजस्तु मानवानां समुदायेन निर्मितः संघटनविशेषः । मानवानां मानवेतराणां समानेन सह नित्यसम्बन्धो विद्यते । साहित्ये काव्यादीनि विश्रुतानि । काव्ये पुनः सामाजिकवृत्तैः प्रभावितानां कवीनां हृद्गता भावा एव निबद्धा भवन्ति । अतो मानवानामायुर्वेदेन सह सम्बद्धता निश्चिता । यथा काव्येन सह मानवानां सम्बद्धता

---

१. आयुर्वेदस्य इतिहासः- अभिदेव विद्यालंकारः- हिन्दी साहित्य

२. नाट्यशास्त्रे-सम्मेलनप्रभागः- पृ.९१

३. ऋग्वेद — १/२४/८

४. ऋग्वेद २/ ६/१६

५. चरम सू. अध्यायः— ३०

तथैवायुर्वेदेन सहापि मानवानां सम्बद्धता दृश्यते । परिणामतः वृत्तादिगुम्फने चरित्रादिचित्रणे आयुर्वेदस्य वर्णनं यत्र तत्र काव्येष्वपि प्राप्यते ।

आधुनिकमहाकाव्येषु कृष्णोदयं नाम महाकाव्यं विश्रुतमस्ति । महाकाव्यमिदं पञ्चदशसर्गात्मकं भागवतमहाभारतादिपुरावृत्तस्योपरि समाधृतं कृष्णवृत्ताश्रितं विद्यते । अस्य प्रणेता डॉ. रामाशीषपाण्डेयः रॉचीविश्व विद्यालयस्याचार्यो मारवाड़ीमहाविद्यालयस्य संस्कृतविभागाध्यक्षो वर्तते । महाकाव्येऽस्मिन् प्राक्वृत्ते युगप्रवर्तितं परिवर्तनं विधाय महाकविना भावात्मकं चिन्तनं कृतम् । काव्यमिदं कृष्णादिवद् व्यवहर्तव्यं न कंसादिवदिति सर्वस्मिन् समये व्यवहारशिक्षणाय भौतिकताय तप्तानां तापनिरसनामाध्यात्मिकाम्मृतोपलपब्धये कृष्णकथाभूतसागरे सद्यः स्नानाय विद्यते ।

आयुर्वेददृशाऽपि महाकाव्यमिदं महत्त्वपूर्णमस्ति । अत्रायुर्वेदशास्त्रान्तर्भूता अनेके शब्दा विशेषेण प्रयुक्ता विद्यन्ते येन प्रतीयते यदायुर्वेदसम्बद्धा कवेरास्थ काव्ये निबद्धा सन्ति । अत्रायुर्वेदशास्त्रीयशब्देषु भेषजं[१] ताप,[२] स्वास्थ्य;[३] रोग;[४] असाध्यः[५] रोगहीनः[६] विशेषेण प्रयुक्ता विद्यन्ते । एते शब्दा आयुर्वेदशास्त्रीयार्थानभिव्यञ्जनेऽपि समर्थाः सन्तिः ।

आयुर्वेदमतेन सामान्यतया रोगाः द्विविधाः-शारीरिकाः मानसिकाश्च । मनसः स्थितिः शरीरे भवति । शरीरं तु धर्मस्य प्रथमं साधनमस्ति यतो हि — 'शरीरमाद्यं खलु धर्मसाधनम्' शरीरं तु व्याधिमन्दिररूपेण विदितम् । पञ्चभौतिकतत्त्वैर्निर्मितमिदं शरीरं तेषां तत्त्वानामसन्तुलनेन रोगग्रस्तं भवति । पुनश्चायुर्वेदः शरीरे त्रिदोषाणां स्थिति स्वीकरोति कस्याप्येकस्य दोषस्य वृद्धिं गते सति तज्जन्यरोगाः भवन्ति ।

दोषाणां स्थितिर्यदा सामान्या भवति तदा शरीरे रोगस्याक्रमणं न भवति । वातपित्तश्लेष्मादयो दोषा विषमस्था रोगं जनयन्ति ।

कृष्णोदयमहाकाव्ये शारीरिकाः मानसिकाश्च रोगाः संकेतिता विद्यन्ते । ग्रन्थारम्भे एव कविः कथयति—

अथात्मरूपाऽप्रतिमस्य निर्मला
पुनातिजन्तोर्भुवनस्य मानसम् ।
कथाति गंगेव हि तापनाशिनी
सुधाधरानन्दप्रदा मनोहरा ॥

१. कृष्णोदयम् - १/४
२. तत्रैव १/१
३. तत्रैव-३/४२
४. तत्रैव ३/४५
५. तत्रैव - ३/१०५
६. तत्रैव - ५/१

यथा गंगा तापनाशिनी विद्यते, गङ्गायां स्नानेन शरीरस्य तापं नश्यति तथैव कृष्णोदयस्य कथा भुवनस्य जन्तोर्मानसं पुनाति तेन पवित्रमानसेन शरीरस्य ताप अपि नश्यति। अत्र मानसिकस्य शारीरिकस्य च तापस्य नाश्यर्थं विवरणं प्राप्यते। पुनस्तत्रैव प्राप्यते यदियं कथा त्रितापतप्ताय च भेषजोत्तमा विद्यते।[१] तापं त्रिविधं भवति—दैहिकं दैविकं भौतिकञ्च। लोका एतेन तापेन तप्ता भवन्ति। आयुर्वेदे दैहिकस्य तापस्य सम्बन्धः विशेषरूपेणास्ति। आयुर्वेदस्य विषयस्य व्यापकत्वात् दैविकं रूपेणास्ति। आयुर्वेदस्य विषयस्य व्यापकत्वात् दैविकं भौतिकञ्चापि तापं सम्बद्धमेव। त्रितापतप्ताय इयं कथा उत्तमाभेषज इति भेषजशब्दः औषधविशेषस्य वाचकः।

मानसिकरोगस्य लक्षणसंकेतो यथा —

कथं सुरा स्वर्गसुखोपभोगिनः
समागताः सम्प्रति लोकमादिमम्।
मुखाब्जमेषामतिशैत्यताडितं
प्रतीयते पद्ममिवाश्य निश्चितम्॥[२]

यस्य मनः प्रसन्नं न भवति तस्य मुखस्योपरि म्लानताय औदासिन्यस्य च भावा द्योतन्ते यथा शैत्यताडिते कमले सौन्दर्यं न दृश्यते म्लानताया याति तथैव मुखस्याभाऽपि सञ्जायते। देवर्षेर्नारदस्यागमनानन्तरं महत्या वीजाया ध्वनिभिश्च कंसोऽपि म्लानमुखो बभूव। यथा मन्त्रप्रभावेन नागराऽपि तत्क्षणं म्लानो भवति। आयुर्वेदस्यागदतन्त्रे तादृशं निरूपणं प्राप्यते। मन्त्रमाध्यमेन विषस्यापसारणमगदतन्त्रम्। रोगविषये कृष्णोदये प्रतिपादितमस्ति यत्

रोगः प्रारम्भकाले हि रोद्धव्यो यत्नतो नरैः
अन्यथाऽसाध्यतामेति हन्ति चान्तेसमाश्रितान्।

रोगस्योपेक्षा कदापि न कर्तव्या। लघुरोगोऽपि उपेक्षया असाध्यो- भवति।

कृष्णोदये रोगाणां निरोधार्थं यद् वर्णनं प्राप्यते तेन प्रतीयते यत् शरीरस्य रक्षणार्थ रोगस्य शमनमावश्यकमस्ति।

अनेन प्रकारेण प्रदर्शितेनात्र केनचिदुहारणेन प्रतीयते यत् कृष्णोदयमहाकाये आयुर्वेदसम्बद्धा विषया महत्त्वपूर्णा। वर्तमानकाले काव्यस्यास्याध्ययनं न केलमानन्दाय रसानुभूतये भवेदपितु शरीरस्य रक्षार्थं संकेतितोपदेशोऽपि स्वीकर्त्तव्यः।

---

१. कृष्णोदयम् - १/४
२. तत्रैव — १/१२

'मनुजा भ्रातरः सर्वे नीडं मे भुवनत्रयम्'

श्रीदुर्गादत्तशास्त्री

एतद्वाक्यं संस्कृतमाश्रितायाः भारतीयसंस्कृतेर्मेरुदण्डः। विश्वमोहिनी विश्वमङ्गलकारिणी भारतीयसंस्कृतिः सृष्टिरुदयादेव भूमण्डले गगने मार्तण्डवद्भासते, विराजते।

अयं स्वीयः परो वेति गण्यते क्षुद्रमानसैः।
उदात्तचरितानान्तु वसुधैव कुटुम्बकम्॥ १॥

भारतीयसंस्कृतिः सकलमेव संसारं परिवारसमं मनुते। न क्वापि, कदापि केनचिद् भेदभावं करोति।

देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य॥ २॥

विश्वेश्वरित्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम्।
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रयायै त्वयि भक्तिनम्राः॥ ३॥

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणी।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव॥ ४॥

हे देवि! अखिलस्य जगतः प्रसीद न केवलं भारतस्य। समस्तसंसारस्य रक्षां कुरु न केवलं भारतस्य। एवं न शतवारम् अपितु सहस्रवारं विश्वशब्दस्य प्रयोगः भारतीयधर्मशास्त्रेषु वर्तते।

अभयं मित्रादभयममित्रादभयं ज्ञानादभयं परोक्षात्।
अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु॥ ५॥

समस्तदिक्षु निवसन्तः समग्रजनाः भारतस्य मित्राणि भवन्तु। एवं विधं विशालहृदयं वहति भारतीया संस्कृतिः।

मानवता गुणाः सर्वे विद्यन्तेऽस्यां न संशयः।
धन्येयं संस्कृतं भाषा प्रसूः भारतसंस्कृतेः॥ ६॥

भारतीयसंस्कृतिरादिशति—

मातृवत्परदारेषु परद्रव्येषु लोष्ठवत्।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥ ७ ॥

नाभिलाषा पदस्यास्ति न राज्यस्य धनस्य वा।
इच्छामि संकटार्तानां प्राणीनां क्लेशवारणम् ॥ ८ ॥

भारतीयसंस्कृतिदीक्षिता भारतीया नार्त्तेभ्यः कष्टं जनयन्ति अपि तु दुःखार्तानां त्राणाय प्राणान् दातुम् अपि प्रतिक्षणम् उद्यता अवतिष्ठन्ते।

संसारोऽयं सुखेनास्तां न कोऽपि दुःखभाग्भवेत्।
त्राणाय हि विपन्नानां जीवनन्तु वहाम्यहम् ॥ ९ ॥

भारतीयसंस्कृतिरेवंविधगुणाकृष्टा एव मेगास्थनीज-ह्यूनत्सांग-फाहियानप्रभृतयः विदेशीयाः भारतं गुरुं मन्यमाना इतः सहस्रवर्षाणि पूर्वम् आध्यात्मिकं तत्त्वमाप्तुं भारतम् आजग्मुः। एवमियं भारतीयसंस्कृतिः अखिल-भूतले पदं दधाना भूरि भूरि यशः समर्जयत्। सत्यमुक्तम्—

एतद्देश-प्रसूतेभ्यो ज्ञानागारमनीषिभ्यः।
शिक्षेरन् स्वीयमाचारं भूतलेऽखिलमानवाः ॥ ३ ॥

रामायणं भारतीयसंस्कृतेरालोकस्तम्भः समुज्ज्वलदर्पणं वा। भूपतिः दशरथः भार्यायै कैकेय्यै प्रदत्तवर-पालनाय प्राणाधारं सुतं रामं वनं गमयित्वा प्राणाँस्तत्याज परं प्रणभङ्गं नाकरोत्।

पणानुपालनं धर्मो भारतस्यास्ति संस्कृतौ।
प्राणाः सन्तु न वा सन्तु पणभङ्गो न जायते ॥ ४ ॥

रामः पितुराज्ञया साम्राज्यमोहमुक्तः, राज्याभिषेकप्रस्तुतिमचिन्तयन् तपस्विवेषे वनं प्रययौ। नेषदपि तस्य मनसि विकार उत्पन्नः।

आहूतस्याभिषेकाय विसृष्टस्य वनाय च।
न मया लक्षितस्तस्य स्वल्पाकारविभ्रमः ॥ ५ ॥

श्रवणः अन्धौ मातापितरौ वीवधे, उपवेश्य तीर्थेषु भ्रामयामास। एषास्ति भारतीयानां मातृपितृभक्तिः।

सीता भर्त्रा रामेण भृशं वारितापि तेन सह वनं जगाम। एवम् अनसूयाऽरुन्धतीसावित्रीप्रभृतिभारतीय-नारीणां पातिव्रत्यगाथाः समस्तसंसारे सादरं गीयन्ते। लक्ष्मणः ज्येष्ठ-भ्रात्रा रामेण सह वनं प्रययौ। भरतः रामस्य पादुके सिंहासने निधाय तत्प्रतिनिधिरूपेण राज्यकार्यं चालयामास। एवंविधः त्यागः भारतमन्तरा न कुत्रापि लभ्यते।

लङ्कायाः भूपतिः रावणः सीताम् अपहृत्य वनं प्राणीनाय। रामरावणयोः भयंकरः सङ्गरः अजायत। रामेण जिता लङ्का। परं तत्र स्वाधिपत्यं न स्थापयामास अपितु रावणस्य भ्रातुर्विभीषणस्य स्वकराभ्यां राज्याभिषेक-मकरोत्।

भारतीयसंस्कृतेरेषा त्रिपथगा अविरतं प्रचलन्ती अद्यापि तद्वदेव विराजते ।

भारतेन जितः बङ्गदेशः परं तत्र स्वाधिपत्यं न साधितम् अपितु मुजीवबन्धोस्तत्राभिषेकः, कृतः । एतदेवाभिलक्ष्य रामागमनं प्रतीक्षमाणः कश्चिद् भक्तः गायति—

हे राघवायाहि, धरां त्वदीयां कथं विलम्बः क्रियते त्वयैषः ।
नायास्ययोध्यां यदि रावणारे ! दिल्लीं समायाहि दिनत्रयाय ॥ ६ ॥

त्वया प्रणाली नियतीकृतायां विजित्य लङ्कां ननु रावणस्य ।
कृत्वाभिषेकं निजपाणिनैव विभीषणस्यैव विचारसाधोः ॥ ७ ॥

सैव प्रणाली परिपालितास्ति तवाङ्घ्रिचिन्हानि विलोकमानैः ।
बङ्गं विजित्याखिलभूसमक्षं मुजीवबन्धोश्च कृतोऽभिषेकः ॥ ८ ॥

भारतीयसंस्कृतिः प्रतिशोधभावनायां न विश्वसिति अपितु अभद्राचरणपरायणानपि सद्व्यवहारेण आत्मीयान् कर्तुं प्रयतते । एकेन कविना सत्यं भणितम्—

पङ्कम्लानं यदि तु वसनं जायते दैवयोगा—
दम्लानं तद्भवति पयसा क्षालितं निर्मलेन ।

पङ्केनैव स्वयमवसनं पङ्किलं शोधयिष्यन्
संसारेऽस्मिन् सकलमनुजैर्हस्यते वालिशोऽसौ ॥ ९ ॥

अस्माकम् एकः प्रतिवासी देशः अस्मभ्यं द्रुह्यति । वयं पुनः पुनः प्रताडिताः अपि मित्रताहस्तं प्रसारयामः परमसौ नः सहनशीलतां दौर्बल्यं मन्यमानः न सज्जनतां प्रदर्शयति । सहस्रं निरागसजनानां वधं विधायापि तस्य सन्तुष्टिर्न जायते । वयं न निर्बलाः न च दुर्बलाः ।

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
चेतांसि भारतीयानां को न जानाति भूतले ॥ १० ॥

परं भारतीयसंस्कृतिर्वारयति अस्मान् हत्याश्रयणात् आतंकवादाद्वा ।

कपटिनः कपटाद्विरताः कदा ।
प्रतिपलं शठतां समुपाश्रिताः ।
समुपयान्ति च वामफलं खला-
स्तदपि ते छलयन्ति तपस्विनः ॥ ११ ॥

न मुञ्चति शठः शाठ्यमुपकारैः शतैरपि ।
दंडेन दंडनीयोऽसौ त्राणायात्र निरागसाम् ॥ १२ ॥

भारतीयसंस्कृतौ हिंसायै न स्थानम्—

अहिंसा परमो धर्मो हिंसापापं महत्तमम्।
हिंसातो दूरवर्ती यः स एव भगवत्प्रियः ॥ १३ ॥

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ।

भारतीयसंस्कृतेरङ्गभूतः बौद्धधर्मोऽपि हिंसायां न विश्वसिति ।

पाणातिपातो अकुसलं पाणातिपातवेरमणि कुसलम्। पाणं न हाने न च वातयेय्य नचानुजंग्या हनतं येरेस । सब्बेषु भूतेषु निधाय दंडं यावरयेचतरांसि लोके ॥ १४ ॥

अर्थात्—

चतुष्पादो द्विपादो वा न हन्तव्यो मनीषिभिः ।
दया सर्वभूतेषु सर्वोपरि विराजते ॥ १५ ॥

भारतीयसंस्कृतिगर्भप्रसूतः जैनधर्मः अपि हिंसायाः सर्वथा विरोधं करोति—

पुरिसा सच्चमेव समयिजाणाहि—

अच्चस आणाए से उवठ्ठिये भारं तरहि ॥ १६ ॥

अर्थात्—

सत्यमेवात्र वेद त्वम् असत्याद् धाव दूरतः ।
त्यागादेव च हिंसायाः तरत्वं मृत्युसागरम् ॥ १७ ॥

परसिअनभाषायामपि एकः महात्मा भणति—

रास्ती मुजिबे रजाए खुदास्त ।
कस न दीदम कि गुमशुद अज रहे रास्त ॥ १८ ॥

अर्थात्—

सत्ये प्रभोः प्रसादोऽस्ति हिंसा सत्यवरोधिनी ।
अतो हिंसापरित्यागः सुधीभिः परिकीर्तितः ॥ १९ ॥

अथ च—

मवाश दरपथे अजार वहरचे ख्वाही कुन ।
किदर तरीकेत मा गैर अजी गुनाहे नेस्त ॥ २० ॥

नाज्ञापयति मे धर्मः परेषां हिंसनं भुवि ।
हिंसातः परमं पापं नैवास्ति मम धर्मणि ॥

भारतीयसंस्कृतिः सकलसंसारम् ईश्वरव्याप्तं मनुते ।

कणे कणे प्रभोर्वासः प्रस्तरे प्रस्तरे तथा।
तत्तु स्थानं न पश्यामि प्रभुर्यत्र न राजते ॥ २१ ॥

एकः उर्दूपंडितः भणति—

डूबने का खौफ हमको तो फिर खाक हो।
हम तेरे किश्ती तेरी, साहिल तेरा ॥ २२ ॥

अर्थात्—

प्रभुर्वसति नौकायां नौका-दंडे तथेश्वरः।
सागरे भगवानेष निमज्जनभयं कुतः ॥ २३ ॥

क्रिश्चियनधर्मः अपि हिंसां नानुमोदते—

I hon shall not kill and yee shall he holy man unto me neither shall ye eat any flash that is torn of heats in the field.

अर्थात्—

अहं वदामि हे बन्धो! मानसं पावनं कुरु।
मांसं खाद न कस्यापि कुटीरेऽरण्यकेऽथवा ॥ २४ ॥

सकलप्राणिषु एक एवात्मा निवासं करोति।

यावानात्मनि वेदात्मा तावानात्मा परात्मनि।
य एवं सततं वेद सोऽमृतत्वाय कल्पते ॥ २५ ॥

परोपकारः भारतीयसंस्कृतेः विशिष्टो गुणः।

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम् ॥ २६ ॥

भारतीयाः स्वकायं समर्प्यापि परोपकारं कुर्वन्ति। महामुनिना दधीचिना स्वास्थीनि प्रदाय देवानां रक्षा कृता। महाराजः शिविः कपोतरक्षायै स्वमांसम् उत्कृत्योत्कृत्य तुलुयाम् अधारयत्।

परोपकारस्य सहस्रम् उदाहरणानि एतस्यां देवभूमौ दृश्यन्ते।

दन्ते निधाय तृणकं पदयोर्निपत्य कृत्वा च काकुशतमेतदहं ब्रवीमि।
हे भारतीयाः सकलं विहाय परोपकारकरणे कुरुतानुरागम् ॥ २७ ॥

अद्य धर्मस्य विषये विविधभ्रान्तयः विश्वं प्रपीडयन्ति! धर्मस्य नाम्नि केचिद् धर्मान्धाः जनाः परेषां शिरांसि कर्तयित्वा मिथ्या सन्तोषम् अनुभवन्ति। निरीहपशूनां वधं विधाय तन्मांसभक्षणेन तुष्टिम् अनुभवन्ति। नायं धर्मः प्रत्युत पापमेव।

अस्माकं धर्मशास्त्रेषु धर्मस्य परिभाषा एवं वर्णिता वर्तते—

धर्मेति धारणो धातुर् महात्म्ये चैव पाठ्यते।
धारणाच्च महत्त्वेन धर्म एव निरुच्यते॥ २८॥

यः स्यात्प्रभवसंयुक्तः स धर्म इति निश्चयः।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः॥ २९॥

विश्वामित्रस्मृतिः—

यमार्याः क्रियमाणं तु शंसत्यागमवेदिनः।
स धर्मोऽयं विगर्हन्ते तमधर्मं प्रचक्षते॥ ३०॥
विद्वद्भिः सेवितः सद्भिरनित्यमद्वेषिरागिभिः।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत॥ ३१॥

मीमांसा—

अलौकिकश्रेयःसाधनत्वेन विहितक्रियात्वं हि धर्मत्वम्।

वैशेषिक दर्शनम्—**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।**

भारतीयधर्मः इतरदेशधर्मवद् नैकबिन्दुसमाश्रितः। विशालोऽयं वटवृक्षः। एतस्य मूलं पातले। शीर्षं व्योम्नि।

पाताले मूलमस्यास्ति शीर्षं व्योम्नि विराजते।
शाखा दिक्षु विदिक्षु च धन्योऽयं धर्मपादपः॥ ३२॥

भारतीयधर्मवटवृक्षः प्रसूते विविधानि मधुर- फलानि। यथा—

क्षमा, करुणा, अहिंसा, परोपकारः, पातिव्रत्यम्, मातृ- पितृ- भक्तिः, पणपालनम्, औदार्यम् सहनशीलता-प्रभृतयः।

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥ ३३॥
इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥ ३४॥

श्रीमद्भगवद्गीतायामपि लिखितम्—

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥ ३५॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत॥ ३६॥

"धर्मार्थकाममोक्षाः" चतुर्वर्गः ।

चतुर्वर्गनिरूपणं केवलं भारतीयसंस्कृतौ वर्तते । चतुर्वर्गफलप्राप्तिरेव मानवजीवनस्य लक्ष्यं ज्ञायते ।

प्रथमं धर्माचरणम् द्वितीयम् अर्थार्जनम् । धनार्जनविषये अस्माकं धर्मशास्त्रैः प्रथममेव रेखा-आकृष्टा ।

ईशावास्यमिदं सर्वं यत्किञ्चिज्जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद्धनम् ।।

निन्दनीय-साधनैर्धनार्जनं न कर्तव्यम् । एवम् महत् पापम् ।

भ्रष्टाचारप्रसारेण भवामो निन्दिता वयं ।
यत्नः सम्भूय कर्तव्यः प्राप्तुं प्राचीनगौरवम् ।।

भ्रष्टैरूपायैर्धनमर्जितं यन्मानस्य हानिं कुरुते नितान्तम् ।
अतो न लोभः पुरुषेण कार्यो वदामि तथ्यं विदुषां समक्षम् ।।

अतो न धनस्य लोभः पुरुषेण कार्यः ।

कामः मानसिककामनानापूर्तिः । चतुर्थः मोक्षः ।

जन्ममरणबन्धनान्मुक्तिः ।

भगवान् भणति-'यद् गत्वा न निर्वतन्ते तद् धाम परमं मम,

एतत् परमधामप्राप्तिरेव मानवजीवनस्य चरमं लक्ष्यम् । येन पौनः पुन्येन जन्ममरणे न स्याताम् ।

हे प्रभो ! प्रार्थना मेऽस्ति नायामत्र पुनः पुनः ।
कुर्यां शुभानि कर्माणि जन्ममृत्युविमुक्तये ।। ३८ ।।

शून्यीभवदिदं विश्वं स्वरूपेण धृतं यतः ।
तस्माद् वस्तुस्वरूपं हि प्राहुर्धर्मं मनीषिणः ।। ३९ ।।

वस्तुनः स्वभावः अपि धर्म उच्यते । अनलस्य स्वभावः दहनं दाहनं वा । अनिलस्य स्वभावः शोषणम् । भास्करस्य स्वभावः तपनं तापनं वा । मेघानां स्वभावः वर्षणम् । चन्द्रस्य स्वभावः शीतलता । कुटिलस्य स्वभावः परपीडनम् । सरलस्य स्वभावः परसान्त्वनम् । भूमेः धर्मः सहनशीलता । एवं भारतीयसंस्कृतेः धर्मः—

भवन्तु सुखिनः सर्वे सन्तु सर्वे निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।। ४० ।।

धन्या वन्द्या भवति भुवने संस्कृतिर्भारतीया ।
विश्वस्यैषा सकलमनुजानीक्षते बन्धुदृष्ट्या ।।

दैवी वाणी धरति हृदये संस्कृतिं भारतीयाम् ।
रक्षैतस्याः सकलविधिभिः साधनीया सुधीभिः ।। ४१ ।।

मानसिक-पर्यावरण-समस्या संस्कृतञ्च

प्रो. वेदप्रकाशशास्त्री

निखिलमपि जगत् पर्यावरणदृष्ट्या द्विधा विलोक्यते। भौतिकपर्यावरणरक्षणोपाया यथा संस्कृतवाङ्मये विद्वद्भिरन्वेष्टव्यास्तथैव मानसिक-पर्यावरण-रक्षणोपाया अप्यन्वेष्टव्याः। मानसिकपर्यावरणशुद्धिं विना बाह्यपर्यावरणाभिरक्षणप्रकारा निरुपद्रवा न भूत्वा भवन्ति सोपद्रवाः। अत एव समग्रे संस्कृतवाङ्मये सततं द्विविधपर्यावरणदोषवारणाय सद्भिर्विद्वद्भिर्मनीषिभिः कवीश्वरैश्च सांसारिकजनाः संप्रेरिताः। मानसिक-पर्यावरणे मनसि प्रवर्तमाना शिवसंकल्पता वरीयसी परिकल्पिता। मनसो महत्त्वमुद्गिरद्भिर्वैदिकैर्महर्षिभिः शिवसंकल्पसूक्ते ये मन्त्रा आख्याता अतीव श्रुतिरमणीयास्ते सन्ति भासमानाः।

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विददेथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु॥

यत्प्रज्ञानमुतचेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीषुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु॥

ये प्रथमजाः पुराणा ऋषयो बभूवुस्तैः मानसिक-पर्यावरणशुद्ध्यर्थं संस्काराणां सुखवर्षिणी प्रहर्षिणी व्यवस्था संस्कृते संस्थापिता। संस्काराणां मानवजीवने प्राक्तनैविप्रैरेतावान् महिमा वर्धापितो यत् सः कदापि न रेचिष्यति।

मानसिक-पर्यावरण-विषयः केवलं प्रधानतया मानवयोनिमेव स्पृशति। अतः पुरुषयोनिमभ्युपेतानां प्राणिनां मानसिकं पर्यावरणं शुद्धं वाऽशुद्धं वा भवति। मनुष्याणामेव शुद्धं मानसिक-पर्यावरणं भौतिकमभौतिकञ्चोभयविधं पर्यावरणं परिशोधयति रचयति च सुखसम्पत्प्रदम्। तदेवाशुद्धं भूत्वा समग्रं जगत् जगद्व्यापिना दोषवह्निना व्याकुलयति कदर्थयति ज्वलयति सन्तापयति च अहर्निशम्। समये समये महर्षिनिर्दिष्टाः पूर्वजनस्वीकृताः परिपालिताश्च संस्काराः मनुष्याणां तान् मानसिकदुर्गुणान् निहन्तुं प्रभवन्ति ये मानसिकपर्यावरणं व्यथयन्ति।

मानसिकी पापवृत्तिरेव पर्यावरणविषवृक्षस्य बीजत्वमुपैति । अत एव मानसिकं पापमुन्मार्जयितुमेव स्मृतिकारेण कथ्यमेव कथितम्—

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥

गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ॥

स्वाध्यायप्रवचनाभ्यां मानसिकपर्यावरणस्य संशोधनं जायते । शास्त्रमधीत्य मनुष्यः पूर्वं स्वकीयं मनः परिष्करोति अथ चान्यानुपदिशन् श्रोतॄणां निर्मलयति मनः । अशुद्धं वायुं जलं वा शोधयितुं महद् द्रव्यमपेक्ष्यते परं परिशुद्धान्तःकरणस्य कस्यचिदेकस्यापि मुखान्निःसृता निर्मला सूनृता वाक् सहस्राणां श्रोतॄणां मनांसि पवित्रयति । अत एव स्वाध्यायरतो मानवः कथयति मनो मे पुनरेहि मनो मे पुनरागतम् मनो मे पुनरागतमित्यस्यायं विद्यते सारो यत् मे मनः सम्प्रति निर्दुष्टं जातम् । स्वाध्यायप्रवचनासक्तचित्तस्य जनस्य तनूरियं नूनमेव ब्राह्मी भवति—यथोक्तम्—

स्वाध्यायेन जपैर्होमैस्त्रैविद्येनेज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनूः ॥

स्वाध्यायप्रवचनयोर्मध्ये यद् यत्तिष्ठति तद्बलेन मानसिकं दूषणमपाक्रियते । तैत्तिरीयोपनिषदि ऋषिवचांसि यानि प्रकाशवन्ति सन्ति तानि समेषामुल्लासकराणि मनोविकारहराणि च— यथा

ऋतं च स्वाध्यायप्रवचने च, सत्यं च स्वाध्यायप्रवचने च ।
तपश्च स्वाध्यायप्रवचने च, दमश्च स्वाध्यायप्रवचने च ।

अग्निहोत्रं च स्वाध्यायप्रवचने च अतिथयश्च स्वाध्यायप्रवचने च ।

मानुषं च स्वाध्यायप्रवचने च प्रजा च स्वाध्यायप्रवचने च ।
प्रजनश्च स्वाध्यायप्रवचने च प्रजातिश्च स्वाध्यायप्रवचने च ।

सत्यमिति सत्यवचा राथीतरः, तप इति तपो नित्यः पौरुशिष्टिः ।
स्वाध्यायप्रवचने एवेति नाको मौद्गल्यस्तद्धि तपस्तद्धि तपः ।

मनसि मनोविकाराणां सञ्चरणनिराकरणाय तपस्वी तपस्यति मानसिकं तपः । मानसिक-तपश्चर्यासम्पन्नतायां पर्यावरणं तापहरं विभाति । मानसिकतपसः प्राक् शारीरं वाङ्मयञ्च तपश्चरणीयम् । तपसस्त्रैविध्यमेव सर्वाङ्गतया मानसिकपर्यावरणशोधनायालम्— गीतायां सम्यगुद्गीयते—

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥

अनुद्वेगकरं वाक्यं सत्यं प्रियं हितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥

दानेन मानसिक-पर्यावरणशुद्धिर्जायते । अदानभाव एव अरातिपदवाच्यः, अरातिरेव शुत्रर्भवति एतेन प्रतीयते यददानभाव एव परेषां मनसि शत्रुतां जनयति । रातिभावे व्यपगते सति वसति सद्यस्तत्रारातिभावः । वेदे निगद्यते—

मा प्रगाम पथो वयं मा यज्ञादिन्द्र सोमिनः ।
मान्तः स्थुर्नोऽरातयः ॥

गीतायामपि सात्त्विकं दानभावं विभावयता भगवता कृष्णेन प्रोच्यते—

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥

येषां पुरुषाणां मेधायां देववासः, दानवृत्तौ देवानां प्रवृत्तिः सख्यरूपे देवदृष्टिः, आयुषि च देवायुर्वसति तेषां मानसं शुद्धतामेति परेषामपि मानसं निर्माति निर्व्यथम् । यथा—

देवानां भद्रा सुमतिऋजूयतां देवानां रातिरभिनो निवर्तताम् ।
देवानां सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥

यथा वृष्टिमुत्पाद्य कृष्णो मेघो भवति धवलस्तथैव पुरुषो दानं दत्त्वा भवत्यवदातहृदयः । ऋगियमुपदिशति मानसिक-पर्यावरणदिगुन्मेषाय—

श्रध्दया देयम्, अश्रध्दया देयम्, भिया देयम् ।

ह्रिया देयम्, संविदा देयम् ।

येन भोजनेन भवति सात्त्विकं मनः, तदुद्दिश्य स्मृतिकारेण स्वर्णनिभं सुवर्णनिर्मितं वचनजातं निगदितम्—

विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः ।
विघसो भुक्तं शेषं तु यज्ञशिष्टं तथामृतम् ॥

यज्ञकर्मणि यज्ञवार्तायां यज्ञीयप्रसङ्गेषु च मानसिक-पर्यावरणं सुखं प्रयच्छति । यज्ञेन न केवलं भौतिकं पर्यावरणमेव शुध्यति अपितु मानसिकपर्यावरणस्यापि महती शुद्धिर्जायते । महाकविना कालिदासेन यज्ञधूममहिमानमुद्गिरता यन्निगदितं तदतीव रमणीयम्—

त्रेताग्निधूमाग्र्यमनिन्द्यकीर्तेस्तस्येदमाक्रान्तविमानमार्गम्।
घ्रात्वा हविर्गन्धिरजोविमुक्तः समश्नुते मे लघिमानमात्मा ॥

कृष्णोऽपि धूमः नासिकामार्गेणान्तर्निविश्य मानसं सुखं बहुतरं प्रयच्छन् यज्ञकर्तुर्धवलं यशस्तनोति— यथोक्तं महाकविना शब्दशक्तिमता बाणभट्टेन—

दिशामलीकालकभङ्गतांगतस्त्रयीवधूकर्णतमालपल्लवः ।
चकार यस्याध्वरधूमसञ्चयो मलीमसः शुक्लतरं निजं यशः ॥

दुर्भावा मानसिकं-पर्यावरणं दूषयन्ति, स्थिरं निर्मलं मानससरोवरं च विक्षेपकणिकाप्रक्षेपणेन व्याकुलयन्ति। मानसिकदुर्भावविघाताय सद्भावोद्भवाय च यज्ञकर्मणि प्रत्यहं सद्भिर्निधीयते मनः। महाकविना कालिदासेन अभिज्ञानशाकुन्तले यज्ञाग्नीनां पापहरत्वं स्वीकृतम्— यथा—

अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नतो दुरितं हव्यवाहै—
वैतानास्त्वां वह्नयः पावयन्तु ॥

भारतीया अभिवादनपरम्परा मानसिकपर्यावरणपोषिका वर्तते। यदा कश्चित्पुरुषो महान्तं मान्यं वदान्यमुद्वीक्ष्य प्रत्युत्थाय सत्करोति तथा तन्मनसि भवति कश्चिदुल्लासविशेषः। यः सत्कृतस्तस्यापि मनः प्रसन्नतामावहति। एवमुभयत्र मानसिकी स्थितिर्हर्षवर्षिणी भवति। नूनमेव अर्चनीयं देवकल्पं जनं पुरस्ताद् वर्तमानं विलोक्य प्राणानामूर्ध्वगतिर्वर्धते, परं प्रणमनक्रियायां सम्पन्नायां प्राणाः समा एव न विषमाः सन्ति। अत एवोक्तं—

ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥

कृतज्ञताभावो मानसिकपर्यावरणशोधकः। कृतार्थतां ज्ञापयन्तो जनाः जनानां मानसं हर्षकमलैर्विभूषयन्ति। ये न भवन्ति कृतज्ञास्ते तु कृतघ्ना भूत्वा सतां हृदये पीडां जनयन्ति। वाल्मीकिना महर्षिणा रामायणे समीचीनमुक्तम्।

उपकारेण वीरो हि प्रतीकारेण युज्यते।
अकृतज्ञो अप्रतिकृतो हन्ति सत्त्ववतां मनः ॥

कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये।
तान् मृतानपि क्रव्यादा कृतघ्नान् नोपभुञ्जते ॥

परगुणप्रशंसया मानसिकं पर्यावरणं परिशुद्ध्यति, परनिन्दया मानवानां जायते मानसिको ह्रासः। प्रशंसा मनसि ह्लादमयीं वीचिमालां जनयति, निन्दा मानसं भृशं मथ्नाति। यदा सज्जनाः परगुणप्रकाशने मिहिरायन्ते परदोषाच्छाने च तिमिरायन्ते तदा मानसिके पर्यावरणे दोषकलङ्ककणिकाविक्षेपो न जायते।

अत एवोक्तम्—

यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्येभ्यश्चरन्तीं गां निवारय ॥

वेदे परनिन्दा पापरूपिणी निगदिता तद्विनाशाय च स्तोत्रा प्रार्थना क्रियते—

संकुसुको विकुसुको निर्ऋतो यश्च निःस्वनः ।
ते अस्मद्यक्ष्ममनागसो दूराद्दूरमचीचतम् ॥

हितचिन्तनं पर्यावरणशोधकम् । यदा सर्वे जनाः परस्परं हितमेव कामयन्ते, तदा समेषां मनांसि भवन्त्यानन्दोल्लासमन्दिराणि ।

यदा जनानां मनसि वचसि काये सदैक्यमेव प्रतिष्ठति तदा समाजे सर्वेषां जीवने सदाऽनन्दत्रिस्रोतस्विनी सुखजलमावहन्ती नित्यं प्रवहति । अत एवोक्तं कवितावनिताविलासोल्लासकेन कालिदासेन—

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥
स्वस्ति प्रजाभ्यः परिपालयन्तां, न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ॥

अभद्रं ये भाषन्ते ते अभद्रं निगद्य मानसिकं पर्यावरणं दूषयन्ति तथैव अभद्रं श्रुतवतां खिद्यते स्वस्थं मनः । भद्रमस्माभिर्वक्तव्यम् भद्रं श्रोतव्यम् भद्रं द्रष्टव्यम् भद्रं प्रस्तोतव्यम् । अत एवोक्तं वेदे-भद्रं वद दक्षिणतो भद्रमुत्तरतो "वेदे-भद्रं पुरस्तान्नो वद भद्रं पश्चात् कपिञ्जल ॥"

सम्प्रति भौतिकमभौतिकञ्चोभयविधं पर्यावरणं दूषणग्रस्तं विद्यते । केवलं भारतीया प्राक्तनी ऋषीणां पद्धतिरेव पर्यावरणाभिरक्षणसक्षमा । सा पद्धतिः संस्कृतवाङ्मये विराजते । यदा जनाः संस्कृतवाङ्मये रुचिं परिकल्पयिष्यन्ति तदनुसारं चित्रयिष्यन्ति च चित्रं चरित्रं तदा पुनरपि पर्यावरणं निरन्तरायं निरामयं सुखानन्दोल्लासकरञ्च प्रभविष्यति ।

लोकसभ्यता संस्कृतञ्च

श्रीमती सि.एल्. सिसिली

भारतीयसभ्यता तस्याः वैशिष्ट्येनान्यदेशसंस्कारविकासप्रक्रियायां सुप्रधानं भागं वहति। बह्व्यः संस्कृतयः लोके प्रादुर्बभूवुः तिरोबभूवुश्च। तासु भारतीयसंस्कृतिः चीनदेशीयासंस्कृतिश्च भूमण्डलस्य संस्कृति-विकासक्रमे मूलभूते स्तः।

मानवसभ्यतायाः विकासः त्रिषु स्तरेषु विभक्तः। क्रि.पू. द्विसहस्रवर्षं यावत्, ततः परं ख्रिष्टाब्द-सप्तम-शतकपर्यन्तं, ततः अप्येतावत्कालपर्यन्तमिति। (प्रथमस्तरे तावत् ईजिप्त्, बालिलोनिया तथा चीनसंस्काराः। द्वितीय-विभागे ईजिप्त्-चीना-भारतीयसंस्कारः, ग्रीस, रोम् अजीरिया फोनीष्या तथा पेर्ष्या संस्काराश्च। तृतीयवि-भागे भवति आधुनिकसंस्कारः) जातासु संस्कृतिषु अद्यापि जीवति भारतीया तथा चीनासंस्कृतिः।

मानवस्याभ्युन्नत्युद्देश्यकसात्विकाचारव्यवहाराः काले परिपक्वतां प्राप्ताः संस्काररूपेण परिणमन्ति। कायिकं बौद्धिकमाध्यात्मिकमिति क्रमेण मानवः उन्नतिं प्राप। परम्परया लोकस्य आध्यात्मिकं बौद्धिकं सात्विकञ्च अवदानं बहुलीभूतम्। सामूहिकोन्नयनस्य उत्कृष्टावस्था चेयम्। नादृशोन्नयने आन्तरिकाः बाह्याश्च अनेके घटकाः वर्तन्ते। संस्कृतेः सततमुच्चतरोऽभ्युदयो मानवस्य तपसा चिन्तनेन कर्मव्यवसायेन च संभवति। संस्कृतिरेव समाजं निर्माति यत्र बहूनामैक्येन सर्वोदयः समुदेति। तादृशसंस्कारः तदानीमेव पूर्णो भवति यदा तत्र आध्यात्मिकचिन्ता तत्त्वदृष्टिश्च प्रस्फुटतां प्राप्नुयात्।

जातस्य संस्कारस्य अनुस्यूतस्यन्दनार्थं संस्कृतेः दार्ढ्याय च भौतिकधार्मिकतयोः सन्तुलनं अवश्यमेव पालनीयम्। भारतीयचीनासंस्कारयोः वैशिष्ट्यम् एतदस्ति यद् आभ्यां (भौतिक-बौद्धिक-धार्मिक-भावेषु) अनि-वार्या इयं सन्तुलितावस्था स्वीकृता।[१] भारते मानवजीवनस्य सर्वोच्चमुद्देश्यं पूर्वमनीषिभिः एवं निर्णीतमासीत्। अत्र सर्वविधदुःखस्य मूलकारणमस्ति अज्ञानम्। तस्य विनाशार्थं नरेण निरन्तरं यत्नः कर्तव्यः। सांख्ययोगादिदर्श-नानि ज्ञानमार्गं उपदिशन्ति। एतदेव अध्यात्मविद्या। एवंविधचिन्तानामनुभवानाञ्च विनिमयार्थं संस्कृतभाषा भवति।

---

१. देवराजदत्तः —An outline of world civilization.In the Case of Rome exerssive materialism Caused the extinction of Rome. "History of Anient Civilization."

संस्कृतभाषायाः महत्वम्

"Culture can survive only if the knowledge is passed on" संस्कृतमाध्यमेन साहित्ये अलङ्कारशास्त्रे विज्ञाने ज्योतिषे वास्तुशास्त्रे गणिते न्याये व्याकरणे भाषा- विज्ञाने आयुर्वेदे अध्यात्मदर्शने तथा इतरेष्वपि ज्ञानविज्ञानयोः शाश्वतिकानाम् आविष्काराणां प्रचारः अभवत् । शास्त्रीयरूपेण स्वरसम्बन्धिनीम् अक्षरमालां विकासयित्वा, भाषायाः प्रारम्भकाले एव भाषाशास्त्रं संस्कृतम् अस्ति ।[१] इण्डो आर्यन् संयोगः (intellect) भाषाशास्त्र- निर्माणे हेतुभूतः । अस्याः भाषासाहित्यं सामूहिक- सांस्कारिकावस्थाः ज्ञातुं पठितुं च सहायकाः । Sanskrit is the Reservior.

सांस्कृतिकज्ञानस्य भुवि समृद्धानि साधनानि सन्ति । तेषु ऋग्वेदः प्रारम्भकालीनस्य निदानमस्ति, अवशिष्टस्य वैदिकसाहित्यं तथा रामायणमहाभारतानि । भारतीयसंस्कृतिविन्यासे वेदानामनुत्तमं महत्त्वमुल्लेख्यम् वेदपुराणादिके विपुलविषयानधिकृत्य सञ्चितो ज्ञानानिधिरुपलभ्यते । वेदाश्रिता उपनिषद्पुराणादयः सांस्कारिक-स्रोतस्वनीं वर्धयति ।

भारतीयसंस्कारस्य विश्वप्रसारः

विश्वसंस्कारविकसनप्रक्रियायां सुप्रधानं भागं वहति भारतीयः संस्कारः । देवतात्मकता, सर्वप्राणिहितैषिता, मधुमत्वं, कर्मफलभोगः प्रभृतयः अस्याः विशेषताः । संस्कृते विकसिताः ज्योतिष- गणित- वृक्षायुर्वेदप्रभृतयः शास्त्रशाखाः विश्वप्रसिद्धाः ।

भारतीयसंस्कारस्य धार्मिकप्रभावः

अशोकस्य धर्मविजयेन भारतीया संस्कृतिः एष्या-यूरोप्-अफ्रीका-महाद्वीपानां जनेषु प्रासरत् । तत्र यहूदीधर्मे इस्लामधर्मे च प्रत्यक्षाप्रत्यक्षरूपेण भारतीयधर्मस्य सौरभमनुद्रष्टुं शक्यते ।

चीनदेशीयसंस्कारे भारतीयसंस्कारस्य प्रभावः नितरामस्ति । बौद्धतत्त्वानि चीन-संस्कारस्य नवीनतां प्राप्तुं सक्षमाणि । बुद्धदेवस्य अहिंसा तथा आत्मसंयमनं इति तत्त्वद्वयं जनैरङ्गीकृतम् ।

१. इस्लामधर्मस्याङ्गभूते सूफीसम्प्रदाये ब्रह्मवादजीवन्मुक्ति- योग- समाधि- विषयाणां सिद्धान्तः दृश्यते ।

२. The intellectual development of China was inferior to that of Greece or India and inter Spiritual and ethical ideals she was influenced and inspried by India.

१. Sanskrit is more perfect and copious than the Greek and Latin and more equistic and eloquent than either. — Prof. Bopp.

चीनदेशीया: बुद्धभूमिं तीर्थानि च प्रत्यक्षीऽकर्तुं समुत्सुका: भारते पर्यटका: आसन् । इमे बौद्धाचार्यान् विहारांश्च चिरकालं समुपास्य धर्मग्रन्थान् च कृतवन्त: । पञ्चमशताब्दे फाहियान: भारतं समागत्य श्रमेण मनोयोगेन च बौद्धसांस्कृतिकसौरभं सामादृत्य चीनं प्रत्यावर्तत् । षष्ठसप्तमशताब्दद्वये चीनत: शतश: बौद्धभिक्षव: बौद्धशास्त्रेषु शिक्षिता बभूवु: । ह्वेनसांग: ७४ बौद्वग्रन्थानन्ववदत् । इत्सिंग: चीनभाषायामनुवादं चकार । ततोऽपि महत्वपूर्णा कृतिरस्ति संस्कृत-चीनीशब्द-कोशरचना । आधुनिक युगेऽपि प्राचीनसांस्कृतिकप्रवृत्तीनां संस्कार: चीनप्रभृतिदेशेषु भृशं विभान्ति ।

भारतीय-ज्ञानविज्ञानशिल्पकलासाहित्यादीनां सांस्कृतिकधारा भूय: योरोपाफ्रीकामहाद्वीपयो: इरानद्वारेण प्रवाहितमासीत् । ईरानदेशे प्राङ्मुस्लिमयुगे पारसीकानां कतिपयवर्षसहस्त्रं यावद् भाषासंस्कृती वैदिकार्याणामिवास्ताम् । अद्यापि पारसीकभाषाया: शब्दावली अविरलं संस्कृत शब्दकोषच्छायान्विता प्रतिभासते । ज्योतिषगणितायुर्वेदादिविषयकभारतीयपुस्तकानाम् अरबीफारसीभाषाभ्यामनुवादोऽभवत् । तदनन्तरं तेषां ज्ञानं स्पेनदेशे गत: । तत: तेषां प्रसार: यूरोपीयविश्वविद्यालयेषु समभवत् [१] ।

१. दिनकर— संस्कृति के चार अध्याय ।

माध्यन्दिनसंहितायां पर्यावरणचेतना

प्रो. मानसिंहः

सामाजिको मानसिकः प्राकृतिकश्चेति भेदेन परिवेषो वर्तते त्रिविधः। तत्र मानवसमाजसम्बन्धस्तु सामाजिको मानवमानसविषयको मानसिकः, प्राकृतिकतत्त्वसम्बन्धश्च प्राकृतिकः। शुक्लयजुर्वेदीयायां माध्यन्दिनसंहितायां वाजसनेयिनामृषीणां त्रिविधस्यापि परिवेषस्य चिन्तनं समवलोक्यते। तत्र प्रथमं तावत् सामाजिकः परिवेषो विचारविषयतां समानीयते। कल्याणकारी, विनाशरहितो विद्वेषविहीनो धनप्रदश्च पन्था अनुसर्त्तव्य इत्यृषीणामादर्शः—

प्रति पन्थामपद्महि स्वस्तिगामनेहसम्।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥ (४.२९)

अत एवानेकेषु मन्त्रेषु हिंसावृत्तिकलुषितमानसानां विनाशकानां रक्षसाम्, औदार्यविधुराणां परपीडनपराणामरातीनाञ्च बाधनेऽपनोदने, पराभवे, विनाशे च वाञ्छा तेषां व्यक्तिमापद्यते—

इदमह रक्षोऽभि तिष्ठामीदमह रक्षोऽव बाध

इदमह रक्षोऽधमं तमो नयामि। (६.१६)

शर्मास्यवधूत रक्षोऽवधूता अरातयः। (१.१४, १९)

परपूत रक्षः परापूता अरातयोऽपहतं रक्षः। (१.१६)

प्रत्युष्ट रक्षः प्रत्युष्टा अरातयो निष्टप्त रक्षो निष्टप्ता अरातयः ॥ (१.७, २९)

इदमह रक्षसां ग्रीवा अपि कृन्तामि। (६.१)

हत रक्षः स्वाहा रक्षसां त्वा वधायावधिष्म रक्षोऽवधिष्मामुमसौ हतः ॥ (९.३८)

वि पाजसा पथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः। (११.४९)

विनाशकानां विनाशे नास्ति कोऽपि दोषः— "धूर्वन्तं धूर्वतं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः।" (१.८)। एवमेव सततं प्रकृत्यैव शात्रवमाचरतामसाधूनां सपत्नानामपसारणे तेजोविनाशने वधे च माध्यन्दिनानामृषीणामुत्कटः कश्चिदभिलाषो दरीदृश्यते—

अग्ने जातान् प्र णुदा नः सपत्नान्... । (१५.१)

सहसा जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व। (१५.२)

प्र णुदा नः सपत्नान्।(१५.२)

ये नः सपत्ना अप ते भवन्तु।(३४.४६)

शत्रूयतामभि तिष्ठा महा सि॥(३३.१२)

ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युदधामि भ्रातृव्यस्य वधाय।(१.१७,१८)

अस्माकं शत्रून्परि शूर विश्वतो दूर्मा दर्षीष्ट विश्वतः (८.५३)

शत्रूणां हिंसकानाञ्च विनाश एव जायते मानवसमाजे विश्वतोऽभयम्—

"जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः।"(७.३७) ।

अभये च निरुपद्रवा निर्बाधाश्च सर्वा कल्याणकारिण्यो जनक्रियाः। समाजे स्तेनैस्तस्करैः पापकर्मभिश्च जनैर्नैव भाव्यम्। ते हि सर्वे भद्रापघातिनः—

मा व स्तेन ईशत माघश सः।(१.१)

दष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्कराँश्उत।(११.७८)

ये जनेषु मलिम्लव स्तेनासस्तस्करा वने।
ये कक्षेष्वघायवस्ताँस्ते दधामि जम्भयोः॥(११.७९)

एवमेव मत्सरान्धितधियां निन्दानन्दममन्दमनुभवतां कुटिलाचारमाचरतां द्वैषैकधर्माणां जानानामपसारणं, बाधनं वधश्च ऋषिभिश्चिकीर्ष्यते मुहुर्मुहुः—

यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः।
निन्दाद्यो अस्मान्धिप्साच्च सर्वं तं मस्मसा कुरु॥(११.८०)

अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिम।(३८.२०)

ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः।(२.२५)

अग्नीषामौ तमपनुदतां योऽस्मान्द्वेष्टि यं च वयं द्विष्मो

वाजस्यैनं प्रसवेनापोहामि।... इन्द्राग्नी तमपनुदतां योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेना—पोहामि।(२.१५)

बधान देव सवितः परमस्यां पृथिव्या शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्। (१.२५,२६)

बाधतां द्वेषो अभयं कृणोतु।(२०.५१)

यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः।(१५.१५,१६,१८,१९,१६,६४,६५,६६)

द्विषतो वधः।(१.२४)

द्विषतो वधोऽसि।(१.२८)

सामाजिकस्वास्थ्यस्यापि सामाजिकपरिवेषाय वर्तते महत्यावश्यकता । अत एव प्राणापानव्यानोदानसमानाख्यानां प्राणानां, चक्षुःश्रोत्रवाङ्मनः— प्रभृतीनां शरीरावयवानामात्मनश्च यज्ञसंयोजनाभिलाषो,[१] यज्ञेन शरीरावयवानां धनसम्पत्त्यादीनां समेषां पदार्थानाञ्च वृद्ध्यै कामना[२] च याजुषेषु मन्त्रेषु दृश्यते । एवमेवायुःप्राणापानव्यानादीनां चक्षुःश्रोत्रवाङ्मनसामात्मनश्च रक्षार्थं, पुष्ट्यर्थं, तृप्त्यर्थं ज्योतिः प्राप्तये चाभ्यर्थनाप्यवलोक्यते—

आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे
पाहि श्रोत्रं मे पाहि वाचं मे पिन्व मनो मे जिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ ॥ (१४.१७)

अग्निरायुर्वर्चोदानाय, तनूरक्षणाय, शरीरोनत्वापूर्तये च प्रार्थितः—

तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि
वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥ (३.१७)

त्वष्टा शरीरस्य न्यूनत्वमनुमार्ष्टुं याचितः—

त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ।

वाक्प्राणचक्षुःश्रोत्रनाभिमेढ्रपायुप्रभृतीनां चारित्र्यस्य च शोधनेऽपि कश्चित्तीव्राभिलाषो व्यक्तिमापन्नः—

वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं
ते शुन्धामि नाभिं ते शुन्धामि मेढ्रं ते शुन्धामि पायुं ते
शुन्धामि चरित्राँस्ते शुन्धामि ॥ (६.१४)

पुत्रपौत्रादिप्रजायुक्तं, रोगमुक्तं, यक्ष्मादिरोगशून्यं, स्तेनाद्युपद्रवविहीनं, पापिजनविरहितं, गवादिधनसम्पन्नञ्च जीवनमेवास्ति यजुर्वेदीयानां जनानामभिलषितम्—

प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघश सो
ध्रुवा अस्मिन् गोपतौ स्यात । (१.१)

"सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपोषाः पोषैः"(८.५३) इत्यृषीणां मनोरथः । सर्वत्र कल्याणप्रदानाय देवास्तैः प्रार्थिताः—

न शर्म यच्छतम् । (३४.२८)

यूयं पात स्वस्तिभिः सदा नः । (३४.४०)

अनेकेषु मन्त्रेष्वायूरक्षायै, सम्पूर्णायुःप्राप्तये तद्वृद्धये च प्रार्थना गोचरीभवति—

मा न आयुः प्र मोषीः । (२१.२)

आयुर्मे पाहि । (१४.१७)

अस्थूरि णौ गार्हपत्यानि सन्तु शत हिमाः । (२.२७)

१. माध्यन्दिनसंहिता, २२.३३,९,२१ ।

२. सैव, १८.१-१५, ६.३१ ।

विश्वमायुरशीय स्वाहा। (८.६२)

पुनन्तु मा... पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै। (१९.३७)

प्रण आयू षि तारिषत्। (२३.३२)

प्र ण आयू षि तारिषः। (३४.८)

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छत समाः" (४०.२) इति याजुषोपदेशः। मानवैर्भद्रश्रवणदर्शनादिकर्मभिः सुस्थिराङ्गशरीरसमन्वितैर्देवहितकर्मपरायणैरेव विश्वायुः प्राप्तिः करणीया—

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवा सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥ (२५.२१)

जीवैर्जीवानां परस्परमायुर्विनाशो न विधेयः—

मा म आयुः प्रमोषीर्मो अहं तव। (४.२३)

स एक एव परमेश्वरो जगति सर्वस्याभ्यन्तरतो बाह्यतश्च विद्यते—

"तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।" (४.५)। सर्वास्वपि प्रजासु स ओतः प्रोतश्च—" सर्व स ओतः प्रोतश्च विभूः प्रजासु। (३२.८)। ब्राह्मणक्षत्रियवैश्यशूद्राः सर्वेऽपि वर्णाः परस्परं रुच्या स्नेहेन वा व्यवहरेयुः—

रुचं नो धेहि ब्राह्मणेषु रुच राजसु नस्कृधि।
रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम्॥ (१८.४८)

सर्वविधान् मानवान् प्रत्यादरभावः स्थापनीयः सर्वविधं भेदभावं विहाय;[१] ये समाजेऽधमवर्गीयास्तक्षकरथकारकुलालकर्मारनिषादपुञ्जिष्ठमृगयुश्वपतिप्रभृतयस्तेऽपि समादरणीयाः सद्भावस्य च भाजनम्—

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमः कुलालेभ्यः कर्मारेभ्यश्च
वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः॥
(१६.२७)

नमः श्वभ्यः श्वपतिभ्यश्च वो नमः। (१६.२८)

कल्याणी वेदवाक् न केवलं चतुर्वर्णेभ्य एवापि तु सर्वजनेभ्य आविर्भूता—

यथेमां वाचं कल्याणीमावदानि जनेभ्यः।
ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च॥ (२६.२)

एवंविधो मिथः सद्भावः समाजे सौमनसं जनयति। तच्च सामाजिकपर्यावरणपरिशोधनाय कल्पते।

विशुद्धो मानसिकः परिवेषस्तु सर्वाधिकं महत्त्वं भजते। असौ तु सामाजिकप्राकृतिकपर्यावरणयोरपि हेतुभूतः। अतो माध्यन्दिनसंहितायां मनःशुद्ध्यर्थमपि निराकरणीयानि स्वीकर्तव्यानि चानेकानि तत्त्वानि निर्दि-

१. सैव, १६.३०-३६।

ष्टानि । मानवेनानृतं परित्यज्य सदैव सत्यं वरणीयम्— "इदमहमनृतात्सत्यमुपैमि ।"(१.५ । जनानां कृते तान् प्रति वा न दुष्टभाषणं करणीयम्— "प्रजां मा निर्वादिष्टम् ।"(५.१७)) । न कस्यचिदपि धनस्य ग्रहणाय लोभ: कार्य:—

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृध: कस्य स्विद्धनम् ।। (४०.१)

न कञ्चिदपि प्रति क्रौर्यमाचरणीयम्— "यत्ते क्रूरं यदास्थितं तत् आप्यायताम् ।"(६.१५) । नापि च कस्यचिद् हिंसा कार्या— "सवधिते मैनं हिंसी: ।"(४.१) ।[1] । कौटिल्यं न कदापि समाश्रयणीयम्—

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम स्वाहा ।। (७.४३, ४०.१६)

मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् । (१.२,८)

दूरमेव सर्वपापेभ्य: स्था...यं, तेभ्यश्चात्मरक्षा विधेया—

मा पाह्य हस: । (४.१०)

पुनर्न पाह्य हेस: । (१२.९,४०)

वि मा पाप्मना पृङ्क्तम् । (९.४)

अप न: शोशुचदधम् । (३५.२१)

यदि दिवा यदि नक्तमेना सि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्व हस: ।। (२०.१५)

यदि जाग्रद्यदि स्वप्न एना सि चकृमा वयम् ।
सूर्यो मा तस्मादेसो विश्वान्मुञ्चत्व हस: ।। (२०.१६)

यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ।
यच्छूद्रे यदर्ये यदेनश्चकृमा वयं यदेकस्याधि
धर्माणि तस्यावयजनमसि ।। (२०.१७)

केवलं भद्रेणैव सम्पर्को विधेय:—

सं मा भद्रेण पृङ्क्तम् । (९.४)

अन्विदनुमते त्वं मन्यासै शं च नस्कृधि । (३४.८)

मन: शिवसङ्कल्पं भवेत्समेषामिति त्वत्यन्तमावश्यकम् । न ह्यशिवेन मनसा शिवं भद्रं वा सम्पाद्यते । शुद्धं हि मानसं शिवसङ्कल्पसमन्वितं भवति नाशुद्धम् । भद्रसङ्कल्पेनैव मनसा मानसपरिवेषशुद्धि: । अतो माध्यन्दिनसंहितायामनेकत्र सुमनस्कत्वं मनस: शिवसङ्कल्पयुक्तञ्च चिकीर्षितम्—

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा स शिवेन । (२.२४;८, १४, १६)

---

१. निरुक्तम्, १.१५-१६: "स्वधिते मैन हिंसीरित्याह हिंसन् ।... आम्नायवचनादहिंसा प्रतीयेत ।"

यथा नः सर्वमिज्जगदयक्ष्म सुमना असत् ।(१६.४)

यथा नः सर्व इज्जनोऽनमीवः सङ्गमे सुमना असत् । (३३.८६)

तन्मे मनःशिवसङ्कल्पमस्तु । (३४.४, २, ३, ४, ५, ६)

सर्वाणि भूतान्यात्मनि सर्वभूतेषु चात्मानमनुभूय सर्वत्र व्यवहरणीयम्—

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न वि चिकित्सति ।। (४०, ६)

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।। (४०.७)

माध्यन्दिनसंहितायां प्राकृतिकं पर्यावरणमपि चिन्तितम् । देवः सविता पवित्रीकरणाय प्रार्थितः— "त्वा सविता पुनातु ।" (१.३) । वाजजिदग्निर्वाजं प्रति सरतीति मतम्— "अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं वाजजित सम्मार्ज्मि ।" (२१.५) । पृथ्वी तु सुव्रतानांमातामृतस्यच पालयित्री, रक्षायै च तस्या आह्वानम् "महीमु षु मातर सुव्रतानाममृतस्य पत्नीमवसे हुवेय" सास्ति बलदा, भद्रकरी, सुखप्रदा, सुस्थितिदायिनी, ऊर्जस्वती पयस्वती च— "सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च ।" (१.२७); स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सुप्रथाः । अप नः शोशुचदघम् ।" (३५.२१;३६.१३) । कृषिकर्मणे, क्षेमाय, धनसम्पत्त्यै पोषाम च तस्या ग्रहणं क्रियते— "कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा ।" (९.२२) । तस्या हिंसा प्रतिषिद्धा, दृढीकरणञ्च समुपदिष्टम्— "पृथिवीं दृ हं पृथिवीं मा हिं सीः ।" (१३.१८) । न केवलं पृथ्वीमेवापि त्वन्तरिक्षं द्युलोकञ्च प्रत्यप्यादरभावो गोचरीभवति— "पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा ।" (२२.२९) । रक्षितावेव द्युलोकपृथ्वीलोकौ जीवान् रक्षतः— "अवतां त्वां द्यावापृथिवी अव त्वं द्यावापृथिवी ।"(२.९) । एवञ्चान्तरिक्षमपि । अतस्तेषां सन्तापो न करणीयो हिंसा वा न विधेया—

अररो दिवं मा पप्तः । (१.२६)

आ द्यावापृथिवी अभि शोचीर्माऽन्तरिक्षं मा वनस्पतीन् ।(११.४५)

द्यां मा लैखीरन्तरिक्षं मा हि सीः पृथिव्या सम्भव ।(५.४३)

पर्यावरणप्रदूषणेनैव तेषां सन्तापो हिंसा वा भवति । अप्रदूषिता एव तेऽभीप्सितं ददति, जनान् च रक्षन्ति—

मधु नक्तमुतोषसो मधुमत्पार्थिव रजः ।
मधु द्यौरस्तु नः पिता ।। (१३.२८)

प्रदूषितो वायुः केवलं रोगानेव वहत्यतो माध्यन्दिनसंहितायां वातोऽस्मभ्यं भेषजं वात्विति प्रार्थितमृषिभिः— "तन्नो वातो मयोभु वातु भेषजम् ।" (२५.१७) । शुद्धो हि वायुरौषधमिव रोगान्विविधान् हिनस्ति । ऋषिभिः समुद्रेभ्यो जलेभ्यश्चादरभावोऽभिव्यक्तः— "अर्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ।"(२२.२५); "अद्भ्य स्वाहा ।"(२२.२९) । आपो हि देव्यो मतास्ताः पवित्रकारिण्यः— "देवीरापो अग्रेगुवो अग्रेपुवः"(१.१२), सुखस्योत्पादिकाश्च— "आपो हि ष्ठा मयोभुवः"(११.५०; ३६.१४) । ता हि पापशोधिकाः—

द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।
पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ (२०.२०)

ता हि पीता बलवृद्धिकारिण्य उदरे सुखकर्योऽयक्ष्मा अनमीवा अनागसोऽमृतस्वरूपिण्यश्च भवन्त्विति स्तुतिः—

श्वात्राः पीता भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः।
ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृधः ॥ (४.१२)

नद्यः, समुद्राः सलिलञ्चानन्दं जनयन्ति— "सिन्धुश्छन्दः समुद्रश्छन्दः सरिरं छन्दः"(१५.४)। आपोऽभीष्टसिद्ध्यै पानाय चाभिस्रवन्तु कल्याणकारण्यश्चास्मभ्यं भवन्त्विति वाजसनेयिनामृषीणां कामना—

शं नो देवीरभिष्टय आपो भवन्तु पीतये।
शं योरभि स्रवन्तु नः। (३६.१२)

वर्तते पयःसङ्गमने तेषामिच्छा— "सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन।"(८.१४,१६)। अपां यः शिवतम उत्तमश्च रसस्तस्य ग्रहणे विद्यते तेषामुत्कटोऽभिलाषः—

अपां रसस्य यो रसस्तं वो गृह्णाम्युत्तमम्...। (९.३)

योवः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः। (११.५१;३६.१५)

मातर इवास्मान् आपो देव्यः शोधयन्ति, सर्वान् दोषान् चास्माकं दूरीकुर्वन्ति— "आपो अस्मान्मातरः शुन्धयन्तु...। विश्वं हि रिप्रं प्रवहन्ति देवीः।" (४.२)। अत आपोऽस्माकं मित्राणि सन्त्वित्यृषीणां बलवानभिलाषः— "सुमित्रिया न आप ओषधयः सन्तु।" (६.२३; २०.१९; ३५.१२; ३८.१३)। तस्मान्न प्रदूषणेनापां हिंसा कार्या— "माऽपो मौषधीर्हिंसीः।"(६.२२)

पशुरक्षणमपि पर्यावरणरक्षाङ्गभूतमेव। ग्रामीणानामारण्यानाञ्च सर्वेषां पशूनामुत्पत्तिः पुरुषाद् ब्रह्मण एव जाता— "पशूँस्ताँश्चक्रे वायव्या नारण्या ग्राम्याश्च ये।" (३१.६)। इश्वर एव तेषामपि स्वामी— "य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम।"(२३.३)। वाजसनेयिसंहितायामजाविगोऽश्वानडुहादिपशूनां क्षेमसुख शान्त्यर्थमभिलाषोऽभिव्यक्तः—

उपहूता इह गाव उपहूता अजावयः ।... क्षेमाय वः शान्त्यै

प्रपद्ये शिवं शग्मं शंयोः शंयोः। (३.४३)

समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्मघवन्त्सं स्वस्त्या ॥(८.१५)

उरुधारा पयस्वती पुनर्मा विशताद्रयिः। (८.४२)

दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः... जायताम्। (२२.२२)

पशुपालनेन पशुप्राप्तिर्भवति— "पशुभिः पशूनाप्नोति।" (१९.२०)। पशून् पशुपालकान् च प्रत्यादरः स्पष्टं दृश्यते वाजसनेयिनामृषीणां मनसि— "नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमः।"(१६.२४)। विद्यते तेषां मानसे पशूनां कल्याणार्थं महती चिन्ता—

यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्। (१६.४८)

शंनो अस्तु द्विपदे शं चतुष्पदे। (३६.८)

पशून्मे तर्पयत। (६.३१)

भषेजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम्। सुखं मेषाय मेष्यै। (३.५९)

एवमेव च तेषां रक्षार्थमपि—

द्विपादव चतुष्पात् पाहि। (१४.८)

यजमानस्य पशून्पाहि। (१.१)

शस्य पशून्मे पाह्यथर्व पितुं मे पाहि। (३.३७)

पशूनामश्रुमोचनमात्रेणैव रोदित्यृषीणां हृदयम्— "उस्रावेतं धूर्षाह्यौ युज्येथामनश्रू अवीरहणौ ब्रह्मचोदनी। स्वस्ति यजमानस्य गृहान् गच्छतम्॥"(४३३)। तेषां हिंसायास्तु मनागपि विचारो नोदेति तेषां मनसि। अतो मन्त्रेषु पशुहिंसाप्रतिषेधो दरीदृश्यते—

घृतं दुहानामदितिं जनायाग्ने मा हि सीः॥(१३.४९)

मा नो गोषु मा नो अश्वेषु रीरिषः। (१६.१६)

यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च॥(६.२२)

विद्यते वाजसनेयिनामृषीणां चेतसि काचिद् बलवत्यन्नप्राप्तेरिच्छा—

अन्नपतेऽन्नस्य नो देहि। (३४.५८)

अग्नेः प्रियं पाथोऽपीतम्। (२.१७)

सवितान्नस्य पवित्रीकरणाय वाचस्पतिश्च स्वादुकरणाय प्राथ्यर्ते— "दिव्यो गन्धर्वः केतपूः केतं न पुनातु वाचस्पतिर्वाजं नः स्वदतु स्वाहा।"(९.१; ११.७)। रोगरहिताय बलकारिणेऽन्नायैवेयं याचना न तु दूषिताय रोगकराय वा—

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः।
प्र-प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे॥ (११.८३)

अतोऽग्निरन्नमविषं कर्तुमभ्यर्थितः— "पाहि दुरद्मन्या अविषं न पितुं कृणु।"(२.२०।

समुपलभ्यते वाजसनेयिनामृषीणां मानसेऽरण्यानां (वनानां वा) पत्ये, वृक्षाणाञ्च पत्ये, वनस्पतिभ्यश्च समादरभावः—

अरण्यानां पतये नमः। (१६.२०)

वनानां पतये नमः। (१६.१८)

वृक्षाणां पतये नमः। (१६.१९)

नमो वृक्षेभ्यो हरिकेशेभ्यः ।(१६.१७)

वनस्पतिभ्यः स्वाहा ।(२२.२८,२९)

एतादृश एव भावो वृक्षाणां मूलेभ्यः, शाखाभ्यः, पुष्पेभ्यः, फलेभ्यश्चापि दृग्गोचरीभवति— "मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा ।" (२२.२८) । ओषधिभ्योऽप्येतादृश्येव दृष्टिः— "ओषधीभ्यः स्वाहा ।" (२२.२८,२९) । अतो न वृक्षौषधीनां हिंसा करणीया । वनस्पतयः शतवल्शा भूत्वा विरोहन्त्विति ऋषीणां मनसि भावना— "अतस्त्वं देव वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वय रुहेम ।"(५.४३) । स्तेना व्रजमिव रोगजातमाक्रमन्ति शरीररोगान् च हरन्त्योषधयः—

अति विश्वा परिष्ठा स्तेन इव व्रजमक्रमुः ।
ओषधीः प्राचुच्यवुर्यत्किं च तन्वो रपः ॥ (१२.८४)

अतः कदाप्योषधीनां मूलादेर्हिंसा नैव कार्या— "पृथिवि देवयजन्योषध्यास्ते मूलं मा हि सिषम् ।" (१.२५) । ओषधयः पुष्पवत्यः, सुफलाः, रसवत्यो मधुमत्यश्च भवन्त्वित्यृषीणामभिलाषः—

ओषधयः प्रति गृभ्णीत पुष्पवतीः सुपिप्पलाः ।(११.४८)

फलवत्यो न ओषधयः पच्यन्ताम् ।(२२.२२)

समाप ओषधीभिः समोषधयो रसेन ।... मधुमतीर्मधुमतीभिः पृच्यन्ताम् ।(१.२१)

ता अस्मभ्यं मधुमतीर्भवन्तु ।(९.२३)

माध्वीर्न सन्त्वोषधीः ।(१३.२७) [१]

अत ओषधीनां हिंसा नैव कार्या, तास्तु सर्वथा रक्षणीया— "माऽपो मौषधीर्हि सीः ।" (६.२२) । ता अस्मान्न हिंसन्तु, सुमित्रत्वञ्चास्मभ्यमाचरन्त्विति समीचीनैवेयं कामना— "सुमित्रिया न आप ओषधयः सन्तु ।" (६.२३;२०.१९;३५.१२;३८.२३) ।

इत्थमतिसूक्ष्मा व्यापिका सर्वतोभद्रकाङ्क्षिणी च वर्तते माध्यन्दिन-संहितायां क्रान्तदर्शिनामृषीणां पर्यावरणचेतना ।

१. द्रष्टव्यं माध्यन्दिनसंहितायामोषधिवर्णनम्,१२.७८-१०१ ।

संस्कृतवाङ्मये पर्यावरणविज्ञानम्

डॉ. रुरुकुमारमहापात्रः

सम्प्रति विश्वेऽस्मिन् पर्यावरणमिति विषये बहुशः चर्चा बहुत्र प्रचलति। प्रतिदिनमेव तद्विषयमाधारीकृत्य संगोष्ठ्यः वार्ताः परिचर्चाः सभाः इत्यादयः समायोज्यन्ते। अतः अस्मिन् प्रसङ्गे पर्यावरणं नाम किमिति स्वतः मनसि जिज्ञासा समुदेति। यस्मिन् वातावरणे वयं निवसामः, जलं पिबामः, भोजनं कुर्मः पवनं जिघ्रामः, तदेव वातावरणं पर्यावरणमिति उच्यते। पर्यावरणमिति शब्दः परि उपसर्गपूर्वकादा उपसर्गपूर्वकाच्च 'वृ' वरणे इति धातोः ल्युट् प्रत्यये निष्पन्नः। यद् किञ्चिदपि अस्मान् परिवृणोति, जीवनञ्च प्रभावयति तत्सर्वमेव पर्यावरणम्। एवं सति वनवृक्षपुष्पपर्वतनदीनिर्झरसरोवरतपोवनोपवनाश्रमाकाशजलपृथिवीवायुतेजःसमुद्रपशुपक्षिणः इत्येतद् सर्वमेव पर्यावरणम्। सूत्ररूपेण प्रकृतिरेव पर्यावरणमिति ज्ञायते।

संस्कृतवाङ्मयं ज्ञानविज्ञानानामेकः ईदृशो वटवृक्षोऽस्ति यस्मिन् वेदाः पुराणानि आरण्यकोपनिषदः आयुर्वेदः ज्योतिषं रसायनं पर्यावरणादयः सर्वेऽपि वैज्ञानिकविषयाः विराजन्ते। कस्यापि विषयस्य विशिष्टं ज्ञानमेव विज्ञानम् इति कथ्यते। अत्र केवलम् उक्तेषु विज्ञानेषु पर्यावरणविज्ञानम् इति विन्दुमाश्रित्य किञ्चिन्निरूप्यते। यतो हि अद्य पर्यावरणस्य प्रदूषणं जगतः भीषणतमसमस्यारूपेण मानवसमाजस्य सम्मुखे विराजते। सम्प्रति न केवलं इयं वसुन्धरा एव प्रदूषणेनाक्रान्ता अपि तु जलं, वायुः, आकाशः तेजोराशिम् आदित्यमण्डलमपि प्रदूषणेन आच्छादितमस्ति। अन्तरिक्षे पृथिव्याः रक्षाकवचभूतायाम् 'ओजोन' इति नाम्ना प्रसिद्धायां झिल्लिकायामपि छिद्राणि जातानि येन अस्माकमियं पृथिवी अचिरमेव प्राणिनां कृते न वासयोग्या भविष्यति। पर्यावरणप्रदूषणस्य परिमाणम् उत्तरोत्तरं वर्धत एव। स्वार्थसाधने संलग्ना मानवाः गङ्गादीनां महानदीनां जलानि दूषयन्ति, वनानि छिन्दन्ति, वन्यजीवान् घातयन्ति। इदानीं वायुमण्डले कार्बनडाई-आक्साइड वाष्पस्य मात्रा उत्तरोत्तरं वृद्धिं गच्छति। पृथिव्या उर्वराशक्तिरपि अनुदिनमपचीयते। प्रकृतेः मनोहराणि दृश्यानि विकृतिमाप्नुवन्ति महानगरेषु तैलजेन धूमेन तु प्राणिनां श्वसनमपि कठिनं जातं परं स्वार्थान्धा मानवाः पर्यावरणस्य रथार्थं नाद्यापि चिन्तयन्ति। अस्मिन् सन्दर्भे पर्यावरणविषये जनजागरणमानेतुम् अस्माकं शास्त्रकारैः ऋषिभिश्च पर्यावरणस्य संरक्षणार्थं परिष्करणार्थञ्च ये विचाराः उपायाश्च आविष्कृताः, तेषामुल्लेखः क्रियते।

पुरा भारते ऋषिभिः पर्यावरणप्रदूषणस्य परिष्काराय अत्युत्तमा प्रक्रिया आविष्कृता। विभिन्नगुणयुक्तानां सुगन्धितपदार्थानां होमात् उत्सृष्टो धूमः परिवेशस्य संरक्षणं करोति। इयं होमप्रक्रिया यज्ञः इति उच्यते। यज्ञे समिधायाः प्रज्वलनेन दहनप्रक्रिया मन्दं मन्दं भवति। अस्यां प्रक्रियायामुत्सृष्टः अङ्गाराम्लवाष्पः चतसृषु दिक्षु

विस्तृता सती हरितगृहप्रभावं जनयति । यज्ञस्य प्रभावेन अङ्गराम्लवाष्पस्य परिचक्रं स्थिरं तिष्ठति । यज्ञादुत्सृष्टः अङ्गाराम्लवाष्पः सुगन्धितैलानां, कृमिनाशकानां पदार्थानां मिश्रणमेव । तस्य मिश्रणस्य स्वल्पं परिमाणमपि नानासुवासयुक्ते रसायने परिवर्तितः भूत्वा पर्यावरणं परिशोधयति । मानवसदृशमेव पदार्थानामपि तिस्रः सत्ताः विद्यन्ते । भौतिकं, सूक्ष्मं, कारणञ्च । यज्ञप्रक्रियायां प्रयुक्तानां सर्वेषां पदार्थानां कारणसत्ताः समुत्पाद्यन्ते । याज्ञिकानां चेतनाचेतनात्रस्थायां वाञ्छितं परिवर्तनं यज्ञेन सम्भवति । यज्ञाग्नेः धूमः सुगन्धं विस्तीर्य पर्यावरणस्य विषाणून् विनाशयति । पवित्राग्नये समर्पितानां पदार्थानां सूक्ष्मशक्तिषु यज्ञस्य विशिष्टः प्रभावोऽन्तर्निहितोऽस्ति ।

यज्ञकर्मणि शुद्धमन्त्रोच्चारणैः ऋत्विजः स्वरविज्ञानेन पर्यावरणं प्रकम्पयन्ति । प्रकम्पनाद्ध्वनितरङ्गाः उत्पद्यन्ते । ध्वनिः शक्तौ रूपान्तरितः भवति । शब्दानां चयनं, अन्तर्ग्रथनं, विनियोगश्च मन्त्रशास्त्रे भवति । प्रयुक्तानां पदार्थानां कारणसत्तायामतिविशिष्टशक्तिर्जायते । मन्त्रस्यैव प्रभावेन पदार्थाः औषधतुल्यं गुणं प्राप्नु-वन्ति । सामान्यप्रक्रियायामग्नौ क्षिप्तं हविष्यं केवलं सुगन्धमेव तनोति । यज्ञप्रक्रियायां तु पवित्राग्नौ समर्पितस्य सामान्यहविष्यस्य प्रभावोऽपि असामान्यः भवति । मन्त्राणामुच्चारणादुत्पन्नः ध्वनिः ऊष्मा च एते शक्ती द्वे परस्परौ सम्बद्धौ भूत्वा भौतिकं, मनोवैज्ञानिकमाध्यात्मिकं च लाभं प्रदत्तः । अत एव यज्ञस्य विषये यजुर्वेदे लिखितम्—

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते हनाकम् महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवा ॥

यज्ञाग्नेश्चापि—

अग्ने वाजद्विवाजं त्वा सरिष्यन्तं वाजजितं सम्मार्जिम ।
नमो देवेभ्यः स्वधा पितृभ्यः सुयमे भूयास्तम् ॥

आदिमहाकाव्ये रामायणेऽपि बहुशः यज्ञस्य महत्त्वं निर्दिष्टमस्ति । तद् यथा लक्ष्मणः रामं कथयति—

अश्वमेधो महायज्ञः पावनः सर्वपावनम् ।
पावनस्तव दुर्धर्षो रोचतां रघुनन्दनः ॥

विष्णुधर्मोत्तरपुराणेऽपि यज्ञस्य महत्त्वं प्रतिपादयता महर्षिणा व्यासेन लिखितम्—

वह्निदत्तेन हविषा तृप्तिमायान्ति देवताः ।
तास्तृप्तास्तर्पयन्त्येव नरः आप्तः समृद्धिभिः ॥

अपि च—

होमेन पापं पुरुषो जहाति होमेन नाकं च तथा प्रयाति ।
होमस्तु लोके दुरितं समग्रं विनाशयत्येव न संशयोऽत्र ॥

अग्निहोत्रात्परम् अन्यत् पूतं कृत्यं नास्ति लोके । पद्मपुराणे अस्य वर्णनमेवमुपलभ्यते—

अग्निहोत्रात्परं नान्यत्पवित्रमिति पठ्यते ।
सुकृतेनाग्निहोत्रेण प्रशुद्ध्यन्ति भुवि द्विजाः ॥

सम्प्रति भौतिकवादं प्रति आकृष्टाः मानवाः यज्ञादिं न कुर्वन्ति। यज्ञादीनामभावात् अद्यत्वे कुत्रचित् अतिवृष्टिः क्वचिदनावृष्टिः, क्वचित् जलप्लावनम्, अग्निकाण्डानि, भूस्खलनं, चक्रवातादयः प्राकृतिकाः प्रकोपाश्च यत्र तत्र सर्वत्र दृश्यन्ते। मार्कण्डमहर्षिणा कालिकापुराणे एतदेव प्रतिपादितम् तथा—

यज्ञाभावात्तु देवानामन्नं सर्वक्षयङ्गतम्।
पर्जन्यश्च ततो नष्टस्ततो वृष्टिर्नचाभवत्॥

वृष्ट्यभावे तु लोकानामाहारः क्षीणताङ्गता।
दुर्भिक्षे व्यसनोपेते सर्वलोके द्विजोत्तमः॥

यद्यपि भागवतादिषु सर्वेष्वेव पुराणेषु पर्यावरणस्य संरक्षणात्मकानि वाक्यानि मिलन्ति तथापि अस्माकं गारुडं पुराणं तु मन्ये पर्यावरणशास्त्रमेवास्ति। अस्य पुराणस्य श्रवणमद्यापि गृहे गृहे कस्यापि आत्मीयस्य जनस्य मृत्योरनन्तरं शान्तचित्तैः तस्य सम्बन्धिभिः मित्रैः बान्धवैश्च सर्वैः एकाग्रचित्तैः क्रियते। तत्र पापिनां कृते नरकगमनस्य भयं पुण्यशालिनां कृते स्वर्गादिसुखानि बहुशः निरूपयन् प्रकारान्तरेण पर्यावरणस्य संरक्षणार्थमेव प्रेरयति मानवान् इदं पुराणम्। कीदृशः पापी कीदृशं नरकमाप्नोति इत्यस्मिन् विषये लिखितं गरुडपुराणस्य चतुर्थाध्याये—

कूपानां च तडागानां वापीनां देवसद्मनाम्।
प्रजागृहाणां भेत्तारस्ते वै नरकगामिनः॥ (ग.पु. ४-३३)

अन्यच्च

ये शारीरं मलं वह्नौ प्रक्षपन्ति जलेऽपि च।
आरामे पथि गोष्ठे वा ते वै नरकगामिनः॥ (ग.पु. ४-४२)

पर्यावरणसंरक्षार्थं तुलसीविटपस्य महत्त्वं प्रतिपादयता लिखितम्—

तुलसीविटपस्थेयं गृहे यस्याऽवतिष्ठते।
तद्गृहं तीर्थरूपं हि न यान्ति यमकिङ्कराः॥ (ग.पु. ४-७)

गङ्गाजलं कीदृशं पुण्यदायकं भवति—

यस्तु सूर्यांशुसन्तप्तं यो गाङ्गसलिलं पिबेत्।
स सर्वयोनिनिर्मुक्तः प्रयाति सदनं हरेः॥ (ग.पु. ९-२६)

वर्तमाने पर्यावरणसम्बन्धे ऋग्वेदे अथर्ववेदे च अग्नि, इन्द्र, उषः, पृथिवी, वरुण, आदित्य, सूर्य, वायु, पर्जन्य, पूषन् इत्यादीनां स्तुत्यात्मकानि बहूनि सूक्तानि सन्ति, यत्र मानवस्य कल्याणकामना दृश्यते। तद्यथा—

शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा।
शन्न इन्द्राबृहस्पतिः शन्नो विष्णुरुरुक्रमः॥

शन्नो वातः पवतां शन्नस्तपतु सूर्यः।
शन्नः कनिक्रदद् देव पर्जन्योऽभिवर्षतु॥

परं मित्रादयः देवाः तदैव मानवाय कल्याणं कर्तुं समर्थाः भवन्ति यदा वयं पृथिव्यादीनां पञ्चनामपि भूतानां प्रदूषणं वारयिष्यामः। अस्मिन् सन्दर्भे निम्नोक्तमुपनिषद्वाक्यमवधेयम्। उपनिषत्सु उक्तम् अनन्तं वै भवः अनन्ता वै विश्वे देवाः इति। अनेन वाक्येन पिण्डगतेन मांसेन सह पृथिव्याः सम्बन्धः, शोणितेन सह जलस्य सम्बन्धः प्राणानां वायुना सह सम्बन्धः संसूच्यते। तदेवं पिण्डब्रह्माण्डयोः परस्परम् अन्योन्याश्रयः सम्बन्धः सूच्यते। शुक्लयजुर्वेदस्य मन्त्रेणापि पिण्डस्य ब्रह्माण्डस्य च समवायसम्बन्धः सूच्यते तद् यथा—

चन्द्रमा मनसो जातः चक्षोः सूर्योऽजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥

कथनस्य तात्पर्यमिदमस्ति यत् भूतेषु एकस्य रक्षणेन भौतिकस्य पिण्डस्य अस्माकं शरीरस्य रक्षणं स्वतः एव जायते। एकस्य विनाशेन पिण्डस्यापि विनाशः सुनिश्चित एव।

उपनिषत्सु लिखितम्— एतस्मादाकाशः सम्भूतः आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथ्वी इति। एतेषां पञ्चभूतानां सात्त्विकेभ्यः अंशेभ्यः ज्ञानेन्द्रियाणि, राजसेभ्यः अंशेभ्यश्च कर्मेन्द्रियाणि प्रादुरभूवन्। वेदान्तदर्शने अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, अनान्दमयादयः पञ्चकोशाः निरूपिताः। पञ्चकोशावधारणा पर्यावरणस्य भौतिकं स्वरूपमभिव्यनक्ति। सृष्टेः अङ्गानां पृथिव्यादीनां संरक्षणेन परब्रह्मणः आनन्दरूपस्य रक्षा सम्भवति। यदि आकाशे रासायनिकधूमानां संघट्टः, कर्णभेदितीव्रध्वनीनां व्याप्तिश्च न स्यात् तदा तस्यैव सात्विकांशाज्जातमस्माकं श्रवणेन्द्रियं सुरक्षितं स्थास्यति। एवञ्च वाय्वादीनां विशुद्धया तेषां सात्विकांशात् उत्पन्नानां त्वगादीन्द्रियाणां रक्षणेन स्वास्थ्यस्य रक्षा सम्भवति। एवमेव पञ्चभूतानां सात्विकांशेभ्यः अन्तः करणसहितानि पञ्चज्ञानेन्द्रियाणि समुत्पन्नानि। यदि अन्तःबाह्यकरणानाम् उत्पत्तेः मूलकारणानि आकाशादीनि भूतानि एव धूमादिभिः प्रदूषितानि स्युस्तदा तेभ्यः उत्पन्नानि करणानि अपि स्वतः एव दोषयुक्तानि भविष्यन्ति। एवञ्च पृथिव्यादीनां भूतानां वनस्पतिलतावृक्षादीनां नदीनां पर्वतानाञ्च प्रभावः मानवजीवने स्पष्टरूपेण द्रष्टुं शक्यते। अतएव भगवद्गीताकारेणापि लिखितम्—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥

एवं भूमेरारभ्य अहंकारपर्यन्तं सर्वमपि पर्यावरणमस्मिन् विपुले संस्कृतवाङ्मये विस्तरेण वर्णितम्। यथा धूमादिभिः भौतिकं पर्यावरणं प्रदुष्यति तथैव कामक्रोधादिभिः मानसिकं पर्यावरणं विकृतं भवति। सदाचारेण सामाजिकं पर्यावरणं रक्षितुं शक्यते कदाचारेण च एतदपि प्रदुष्यति।

संस्कृतवाङ्मयस्याऽध्ययनेनैव सुस्पष्टमिदं यत् संस्कृतकविभिः यादृश्या सूक्ष्मया दृष्ट्या पर्यावरणस्य प्रत्येकं पक्षः चित्रितः तया पर्यावरणं तत्प्रदूषणं प्रति च तेषां पूर्णप्रतिश्रुतयः सूच्यन्ते। अभिज्ञानशाकुन्तले महाकविकालिदासेन भगवतः शिवस्य तनुरूपेण पञ्चमहाभूतानि वर्णितानि। तद्यथा—

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।

यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ (अभि.शा. १-१)

आहुतिद्रव्याणां धूमः केवलशारीरिकीं मानसिकीं वा शुद्धिं न तनोति अपि तु पर्यावरणमपि नो शुद्ध्यति इति तु वैज्ञानिकैरपि स्वीकृतम् । एषः विषयः रघुवंशे प्रतिपादितोऽस्ति यथा—

अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥ (रघुवंशम् - १-५३)

परन्तु अत्याधुनिकमानवस्य लिप्साऽनियन्त्रिता जीवनमशान्तञ्च । सर्वत्र आलस्य-आवेश-संशय-क्रोध-मद-मोह-लोभमत्सरेत्यादीनां शत्रूणां साम्राज्यमेव वर्तते । प्रदूषितभावनया लोकव्यवहारं नैतिकशिष्टाचारश्च न कुत्रापि दृश्येते । सम्पूर्णं पर्यावरणमेतेन विक्षोभेनाक्रान्तम् । सम्प्रति स्वार्थान्धाः मानवाः वृक्षान् छिन्दन्ति, पर्वतान् उत्खनन्ति नदीनां स्रोतांसि अवरोधयन्ति । तासु विषयुक्तमलादीनां विसर्जनेन सर्वत्र प्रकृतेः पदार्थेषु असन्तुलनं जायते । व्यावसायिकप्रतिष्ठानेभ्यः निर्गतेभ्यः मलेभ्यः रासायनिकतत्त्वानां सम्मिश्रणेन जलस्य प्रदूषणं जायते । अत एव प्रदूषणनिराकरणाय वेदेषु निर्दिष्टम् — पृथ्वीम् यच्छ, पृथ्वीं दुह पृथ्वीं मा हिंसी इति । कथनस्य अयमाशयोऽस्ति यदि वयं पर्यावरणं रक्षिष्यामस्तदा अस्माकं जीवनमपि संरक्षितं भविष्यति । यदि पर्यावरणं प्रदूषयिष्यामस्तदा अस्माकं जीवनमपि विविधैः रोगैः संकटैश्च आपन्नं भविष्यति अत एव यज्ञैः दानैः तपसा च अस्माभिः पर्यावरणस्य संरक्षणमवश्यं करणीयमिति शम् ।

संस्कृत वनस्पति-विज्ञान में वनस्पतियों का नामकरण

डॉ. अभिमन्यु

संस्कृत में वनस्पतियों के विज्ञान के लिए वैदिक साहित्य में अथर्ववेद का महत्त्वपूर्ण स्थान है । अथर्ववेद यदि वेद है तो आयुर्वेद उसका उपवेद है ।[१] अतः आयुर्वेद के साथ घनिष्ठ सम्बन्ध होने के कारण अथर्ववेद उसका मूल स्रोत सिद्ध होता है । वनस्पतियों के नामकरण के सम्बन्ध में अथर्ववेद से उपयोगी सूचनाएँ प्राप्त होती हैं । अथर्ववेद में वनस्पतियों का वर्णन और नामकरण बाह्य आकृति (रचनात्मक दृष्टि से) के आधार पर किया गया है । अथर्ववेद में उन वृक्षों को 'विशाखा' की संज्ञा दी गयी है, जिनकी शाखाएँ फैली हुई हैं । जिनकी पत्तियाँ लम्बे-लम्बे गुच्छों में हों, उन्हें 'मञ्जरी' कहा जाता है । बाद में पुष्प के बौर को मञ्जरी कहा गया है । फैली हुई लताओं को '**प्रस्तृणवती**' और लताओं को '**स्तम्भिनी**' कहा गया था । जिन वृक्षों में गाँठ या जोड़ हैं, उन्हें '**कण्डिनी**' कहा गया है ।[२]

पाणिनि ने भी वृक्षों का नामकरण बाह्य आकृति के आधार पर किया था । उनके अनुसार, वृक्षों के नामकरण का आधार बाह्य आकृति के विविध अवयव, अर्थात् पुष्प, मूल, फल, पत्र आदि हो सकते हैं ।[३] जिसमें शंख के समान श्वेत पुष्प आते हों, उसे शंखपुष्पी कहा जाता है । जिसकी बहुत सी जड़ें हों, उसे बहुमूली कहा जाता है । फलों का नाम प्रायः वृक्षों के आधार पर प्रचलित था, जैसे— आमलक वृक्ष का फल आमलकी और जम्बू वृक्ष का फल जम्बू । अष्टाध्यायी से यह भी विदित होता है कि वनस्पतियों का नामकरण उनके पुष्पित होने के आधार पर भी किया जाता था, जैसे— माधवी, माध्यम् आदि ।[४]

पुराणों में विष्णुपुराण, भागवतपुराण, वायुपुराण, मत्स्यपुराण, अग्निपुराण आदि अग्रगण्य हैं, जिनमें वनस्पतियों के सम्बन्ध में प्रभूत जानकारियाँ मिलती हैं । विष्णुपुराण में वृक्ष के विभिन्न अवयवों को आधार बनाकर नामकरण किया गया है । वहाँ नामकरण का आधार पत्र, पुष्प, स्कन्ध आदि को बनाया गया है । पर्ण की आकृति के अनुसार वनस्पतियों का नामकरण किया जाता है, जैसे— अश्वपर्णक, मूषिकापर्णी आदि । विष्णुपुराण

---

१. इह खलु आयुर्वेदो नाम यदुपाङ्गमथर्ववेदस्य । सु.सू.,१।६

२. द्रष्टव्य— S.C. Banerji, Flora and Fauna in Sanskrit Literature, p. 12-13

३. अष्टाध्यायी,४/१/६४

४. अष्टाध्यायी,४/३/४३

में रचनागत नामकरण के आधार का एक यह भी वैशिष्ट्य दृष्टिगोचर होता है कि उस समय आकृतिमूलक आधार में सूक्ष्मता आ गयी थी । एकपत्र, द्विपत्र, त्रिपत्र तथा सप्तपर्ण के उल्लेख से यह स्पष्ट है ।[१]

उपचार में उपयोगिता और व्यवहार में आवश्यकता के आधार पर भी वनस्पतियों का नामकरण किया जाता था, जैसे— व्रणाभी, गोधूम आदि । आयुर्वेद के बृहत्त्रयी आदि ग्रन्थों में वनस्पतियों का उल्लेख वर्ग के कण के आधार पर किया गया है । वहाँ वनस्पतियों की उनकी उपयोगिता, गुण और कर्म के आधार पर वर्णित है । वास्तव में वनस्पतियों के नामकरण का आरम्भ द्रव्यगुण के ग्रन्थों, विशेषतः निघण्टु ग्रन्थों से हुआ है । द्रव्यगुण का विषय व्यापक है । इसका इतना महत्त्व है कि यदि आयुर्वेद के अन्य अङ्ग एक पलड़े में रख दिये जायें और अकेले द्रव्यगुण को एक पलड़े में रख दिया जाये, तब कहीं साम्य हो सकता है ।[२] स्पष्ट है कि अकेला द्रव्यगुण आयुर्वेद के अन्य सात अङ्गों के बराबर है । इस द्रव्यगुण के भी आठ अंग माने गये हैं, यथा—

नाम रूपं गुणः कर्म प्रयोगो योगसंज्ञितः ।
अष्टाङ्गं स्याद् द्रव्यगुणं संयोगः कल्प एव च ।।[३]

इससे विदित होता है कि द्रव्यगुण की सरणि नाम, रूप, गुण, कर्म, प्रयोग आदि में सन्निहित है । निघण्टु ग्रन्थों में विभिन्न द्रव्यों के नाम का संग्रह किया जाता है । हेमचन्द्र के अनुसार नामसंग्रह ही निघण्टु है ।[४] आयुर्वेद में निघण्टु ग्रन्थों का अत्यधिक महत्त्व है । राजनिघण्टु के लेखक का कथन है—

निघण्टुना विना वैद्यः विद्वान् व्याकरणं विना ।
आयुधं च विना योद्धा त्रयो हास्यस्य भाजनम् ।।[५]

अर्थात् ऐसा वैद्य, जिसे निघण्टु नहीं आता; ऐसा विद्वान्, जिसे व्याकरण नहीं आता और ऐसा योद्धा, जो आयुध, अर्थात् हथियार के बिना लड़ाई के मैदान में उतारा जाता है, ये तीनों हँसी के पात्र बन जाते हैं ।

आयुर्वेद के ग्रन्थों में कहा गया है कि वैद्यों को द्रव्यों, विशेष रूप से वनस्पतियों के नाम रूप के ज्ञान के लिए सर्वत्र प्रयास करना चाहिए । पता नहीं, किस देश की भूमि में कौन सा द्रव्य या वनस्पति प्राप्त हो जाये ।[६] महर्षियों ने वनस्पतियों के नाम, रूप आदि के ज्ञान का स्रोत गोपालों, वनवासियों, तपस्वियों आदि को माना है ।

---

१. द्रष्टव्य— विष्णुपुराण, ७/३७-३९
२. द्रष्टव्य— प्रियव्रत शर्मा, द्रव्यगुण-वि. (पंचम भाग), भूमिका भाग, पृष्ठ १६
३. वही, पृष्ठ, १६
४. द्र.— शब्दकल्पद्रुम, जिल्द— २
५. राजनिघण्टु
६. नदीषु शैलेषु सरःसु चापि पुण्येष्वरण्येषु तथाश्रमेषु ।
सर्वत्र सर्वाः परिमार्गितव्याः सर्वत्र भूमिर्हि वसूनि धत्ते ॥
प्रियव्रत शर्मा, द्रव्यगुणविज्ञान (पंचम भाग), पृ. ४ पर उद्धृत ।

चरक का कथन है कि जो लोग भेड़-बकरियाँ चराते हैं, और गोपाल, वनवासी आदि हैं, वे औषधियों को नाम रूप से जानते हैं ।[१]

सुश्रुत ने भी उपर्युक्त कथन का प्रबल समर्थन करते हुए कहा है कि गोपाल, व्याघ्र, वन में रहने वाले तथा तापस हैं और मूलाहार करनेवाले हैं । उनके द्वारा वनस्पतियों के नाम आदि का ज्ञान (व्यक्ति) प्राप्त किया जा सकता है ।[२] कालिदास ने भी अरण्यवासियों को वनस्पतियों के नाम-ज्ञान का स्रोत माना है । उन्होंने रघुवंश में वसिष्ठ आश्रम की ओर यात्रा में प्रवृत्त राजा दिलीप और रानी सुदक्षिणा का वर्णन करते हुए लिखा है—

हैयङ्गवनीमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ।।[३]

इससे विदित होता है कि घोषवृद्धों को वन्य वृक्षों के नामों का सम्यक् ज्ञान था । राजा दिलीप और रानी सुदक्षिणा ने उनसे वनस्पतियों के नाम पूछकर अपनी उत्सुकता शान्त की थी ।

ऊपर दिये गये विवरण से स्पष्ट है कि वैद्यों को वनस्पतियों की प्रामाणिकता वनवासियों के द्वारा जान लेनी चाहिए । इस विषय में नरहरि ने एक सुझाव दिया है कि द्रव्यों (वनस्पतियों) का परिचय तो वनवासियों से प्राप्त कर लेना चाहिए, परन्तु उनके रस-वीर्य-विपाक आदि की जानकारी अपनी प्रयोगशाला में प्रयोग करके प्राप्त करनी चाहिए ।[४]

अवधातव्य है कि एक ही द्रव्य की जाति, आकृति, वर्ण, वीर्य, रस, प्रभाव आदि के अनुसार अनेक नाम होते हैं और कतिपय द्रव्य एक ही नाम से पहचाने जाते हैं । कोई व्यक्ति किसी द्रव्य को किसी एक नाम से जानता है । वह उस द्रव्य को अपने ज्ञान के आधार पर नाम दे देता है । एक अन्य व्यक्ति अपने सुने हुए ज्ञान के आधार पर उस द्रव्य का वही नाम रख देता है । यह भी सम्भावित है कि तीसरा व्यक्ति उस द्रव्य को किसी तीसरे ही नाम से सम्बोधित करता है । ऐसी अवस्था में वैद्य के लिए आवश्यक हो जाता है कि वह अनेक मनुष्यों से उस द्रव्य का नाम पूछकर, उसे देख-छूकर, उस द्रव्य की जाति और लक्षण जानकर उसका परिचय प्राप्त करे ।[५]

---

१. ओषधीर्नामरूपाभ्यां जानते ह्यजपा वने ।
अविपाश्चैव गोपाश्च ये चान्ये वनवासिनः ॥ (च.सू. १)

२. गोपालास्तापसा व्याधा ये चान्ये वनचारिणः ।
मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते ॥ (सु.सू. ३७)

३. रघुवंश, १/४५

४. तेभ्यः सकाशादुपलभ्य वैद्यः पश्चाच्च शास्त्रेषु विमृश्य बुद्ध्या ।
विकल्पयेद् द्रव्यरसप्रभावान् विपाकवीर्याणि तथा प्रयोगात् ॥ राजनिघण्टु

५. एकन्तु नाम प्रथितं बहूनामेकस्य नामानि तथा बहूनि ।
द्रव्यस्य जात्याकृतिवर्णवीर्यरसप्रभावादिगुणैर्भवन्ति ॥
नाम श्रुतं केनचिदेकमेव तेनैव जानाति स भेषजं तु ।
अन्यस्तथान्येन तु वेत्ति नाम्ना तदेव चान्योऽथ परेण कश्चित् ॥

यह विधि एक द्रव्य या वनस्पति के नाम-विनिश्चयन के लिए अत्यन्त उपयोगी सिद्ध हो सकती है।

नामकरण के आधार

निघण्टु ग्रन्थों में वनस्पतियों के नामकरण अनेक आधारों पर किये गये हैं। निघण्टुओं में प्रमुख राजनिघण्टु में वनस्पतियों के नाम रूढ़ि, प्रभाव, देश्योक्ति, लाञ्छन, उपमा, वीर्य, इतराह्वय आदि के आधार पर किये हैं।

आटरुषक, गुडूची, दुण्टुक आदि नाम रूढ़ि पर आरूढ़ हैं। कृमिघ्न, हयमार आदि नामों का आधार प्रभाव है। मागधी, वैदेही, कैरात आदि नामों को विशिष्ट देश के आधार पर पुकारा जाता है। कुछ नाम ऐसे भी हैं, जो वनस्पतियों के लक्षणों को घोषित करते हैं। जैसे— राजीफल, चित्रपर्णी आदि। कुछ वनस्पतियों के नाम पशुओं के साथ साम्य देखकर रखे गये हैं। इनका आधार उपमा, अर्थात् साम्य है, जैसे— मेषशृंगी, अजकर्ण आदि। कुछ नाम वनस्पतियों के वीर्य, विपाक आदि के आधार पर दिये गये हैं, जैसे— कटुका, मधुक, अमृता आदि। कुछ वनस्पतियों को इतराह्वय के आधार पर सम्बोधित किया जाता है, जैसे— शक्राह्व, काकाह्वा आदि।

